Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

# ॥ श्रीरामचरित्रं ॥

( कर्ता—पंडितश्रीदेवविजयगणी )

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

वीरसंवत्—२४४१. विक्रमसंवत—१९७१. सने—१९१५.

किं. रु.–८–०–०

☞ श्रीजैनभास्करोदय प्रेस. जामनगर.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्रीजिनाय नमः ॥

## ॥ अथ श्रीरामचरित्रं प्रारभ्यते ॥

( कर्ता—श्रीदेवविजयगणी )

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज. ( जामनगरवाळा )

अथ श्रीसुव्रतस्वामि—जिनेंद्रस्यांजनद्युतेः ॥ हरिवंशमृगांकस्य । तीर्थे संजातजन्मनः ॥ ॥ १ ॥ बलदेवस्य पद्मस्य । विष्णोर्नारायणस्य च ॥ प्रतिविष्णो रावणस्य । चरित्रं परिकीर्त्यते ॥ ॥ २ ॥ अथास्मिन् जंबूद्वीपे भारते क्षेत्रे लवणाब्धौ योजनसप्तशतविस्तृतः सर्वासु दिक्षु राक्षसनामा द्वीपोऽस्ति, तद्द्वीपमध्ये त्रिकूटनामा पर्वतः, स उच्चत्वेन नवयोजनानि, पंचाशद्योजनानि विस्तीर्णत्वेन, दीर्घत्वेन शतयोजनानि, तदुपरि स्वर्णसप्तप्राकारपरिखागृहतोरणालंकृता जिनभवनभूषिताष्टोत्तरशतद्वारा लंका नाम पुरी आसीत, यतः—शतयोजनविस्तीर्णा । सप्तप्राकारवेष्टिता ॥ अष्टोत्तरशतद्वारा । योजनत्रिंशदीर्घिना ॥ १ ॥ लंकापुरी व्यंतरदेवेन भीमराक्षसेंद्रेण श्रीअजित

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वामिवारके निष्पादिता, पाताललंकापि षट्योजनानि भूमध्यमतिक्रम्य सपादयोजनशतप्रमाणा समचतुरस्त्रा स्फटिकवप्रा मणिकपिशीर्षैर्विराजमाना मणिरत्नतेजोभिः सूर्यातिरेकप्रकाशशोभिता प्रतिपक्षशत्रुसमूहैरस्तंभिता भीमराक्षसेंद्रेण स्वपूर्वभवपुत्रघनवाहनकृते कृता. अथ लंकापाताललंकयो राज्यं राक्षसीं विद्यां चापि घनवाहनाय दत्वा भीमेंद्रः स्वस्थानं गतः. तत्पुत्रो घनवाहनोऽपि पुत्राय महारक्षसे राज्यं दत्वाजितस्वामिपादांते प्रव्रज्य शिवं ययौ. सोऽपि महारक्षाः स्वनंदने देवरक्षसि राज्यं दत्वा प्रव्रज्य शिवं ययौ.

एवं राक्षसद्वीपे असंख्येषु पुरुषेषु केषुचित्स्वर्गं केषुचिच्च मोक्षं गतेषु श्रीश्रेयांसतीर्थे तत्पुरीद्वयपतिः कीर्तिधवलः कीर्तिधवलो नाम राक्षसश्चाभूत. तयोः पुत्रः श्रीकंठनामा, पुत्री श्रीकंठा नाम्नी चाभूद्देवीव रूपतः. इतश्च वैताढ्यगिरौ रत्नपुरेश्वरः पुष्पोत्तरनामा राजा, तेन स्वपुत्रपद्मोत्तरस्यार्थमतींद्रराजपुत्री श्रीकंठा याचिता. परमतींद्रेण स्वपुत्री पद्मोत्तराय न दत्ता गुणिनेऽपि श्रीमतेऽपि, किंतु कीर्तिधवलराक्षसेश्वराय लंकास्वामिने दत्ता दैवनियोगतः. तां श्रीकंठां कीर्तिधवलपरिणीतां श्रुत्वा पुष्पोत्तरो नृपोऽतींद्रेण सह वैरायतेस्म. इतश्चैकस्मिन् दिने श्रीकंठेन मेरुपर्वतान्निवृ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्तेन पुष्पोत्तरदुहिता पद्मा व्युदैक्ष्यत, पद्मयापि श्रीकंठो दृष्टः, तयोरन्योऽन्यमनुरागोऽभूत्. विज्ञाय तदभिप्रायं । श्रीकंठस्तां स्मरातुरः ॥ आदाय व्योममार्गेण । गंतुं प्रववृते द्रुतं ॥ १ ॥ श्रीकंठस्तां गृहीत्वा यदा गतस्तदा चेटिकाः पूत्कुर्वतिस्म. तदनु पद्मोत्तरो भ्राता सन्नह्य तस्यान्वधावत. ततः श्रीकंठोऽपि पलायमानो द्रुतं कीर्तिधवलराक्षसेंद्रं शरणं गतस्तं भगिनीपतिं च ज्ञात्वा, पद्माहरणवृत्तांतं च कथयित्वा स तत्र स्थितः. इतश्च पुष्पोत्तरः पद्मोत्तरपुत्रेण युतो धावन् सैन्यैर्दिशः प्रच्छादयन् युगांतसागर इव समागात. ततः कीर्तिधवलो राक्षसेश्वरो दूतमुखेन पुष्पोत्तरमभाषयद्युष्माभिर्विचार्य कर्तव्यं संग्रामादि, अविचार्य कार्यं न कार्यं, यतः—अपरीक्षितं न कर्तव्यं । कर्तव्यं सुपरीक्षितं ॥ पश्चाद्भवति संतापो । ब्राह्मणी नकुलं यथा ॥ १ ॥ अविमृश्य प्रयासो मुधा स्यात्, यतः कन्या ह्यवश्यं कस्मैचिद्दातव्या, अनया त्वयं स्वयं वृतो वरः, वरेण चापि कन्येयं स्वयं वृता, यतः—वरं वरयते कन्या । माता वित्तं पिता श्रुतं ॥ बंधुः स्वाजन्यमिच्छेच्च । मिष्टान्नमपरे जनाः ॥ ॥ १ ॥ अतो युद्धं न युज्यते, वधूवरयोरेतयोर्विवाहमेव यूयं कुरुत? ततः पद्मापि दूतीमुखेन स्वतातंप्रति ज्ञापयामास, भो तात मयैष एव वरो वृतः, वरेणाप्यहं वृता, इति श्रुत्वा पुष्पोत्तरपद्मोत्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रौ शांतकोपौ जातौ. ततस्तौ तयोर्विवाहं कृत्वा धनधान्यादिकं दत्वा शांतकोपौ स्वस्थानं जग्मतुः. यतः प्रायो विचारचंचूनां कोपः प्रणामावधिरेव.

तत्रैव लंकानगर्यां स्थितयोस्तयोः श्रीकंठपद्मयोः सुखेन काले याते सति एकस्मिन् दिने कीर्तिधवलेन राक्षसेन प्रोक्तं यद्यूयमत्रैव राक्षसद्वीपे तिष्टत, वैताढ्यपर्वते युष्माकं भूयांसो विद्विषोऽधुना वर्तते, तेभ्यो दूरस्थितिरेव वरं, यतः—शकटात्पंचहस्तेषु । दशहस्तेषु वाजिनः ॥ हस्तिनः पंचहस्तेषु । देशत्यागश्च दुर्जनात् ॥ १ ॥ एवं विचार्यात्रैव स्थीयतां. तथात्रैव राक्षसद्वीपस्य नातिदूरे वायव्यां दिशि वानरनामा द्वीपोऽस्ति योजनशतत्रयप्रमाणस्तत्रैव स्थीयतां, अन्येऽपि द्वीपा बर्बरकुलसिंहलविमलाश्वमुखनरमुखगजमुखप्रमुखा मदीयाः संति पृथिवीखंडसन्निभाः. एतेषां द्वीपानां मध्यादेकस्मिन् यूयं राजधानीं विधाय सुखेन तिष्टत? यथावयोर्वियोगो न भवति. इत्याकर्ण्य स्नेहपरवशः श्रीकंठो वानरद्वीपनिवासं प्रत्यपद्यत. ततः श्रीकंठस्त्रिशतयोजनमितं वानरद्वीपं गतः, तत्र द्वीपे किष्किंधनामा पर्वतोऽस्ति, तस्मिन् पर्वते तेन किष्किंधानाम्नी नगरी स्थापिता, तस्यां नगर्यां श्रीकंठं कीर्तिधवलो राज्ये स्थापयामास. तत्र वानरद्वीपे एकस्मिन् दिने श्रीकंठेन राज्ञा भ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यांसो वानरा दृष्टाः. तेषां वानराणां रक्षणाय राज्ञा अमारिपटहो वादितः, य एतान् हन्यात् स हंतव्य इत्युक्त्वा वानररक्षां कारयतिस्म. राजा त्वन्नपानादिकं वानरयोग्यं भक्ष्यं सदा दापयति, ततः सर्वेऽपि लोकास्तथैव कुर्वंति, यतः—राज्ञि धर्मिणि धर्मिष्ठाः । पापे पापाः समे समाः ॥ राजानमनुवर्तंते । यथा राजा तथा प्रजाः ॥ १ ॥ अनया रीत्या ते वानराः सुखिनो जाताः. इतस्तन्नगरवासी लोको रथेषु यानेषु छत्रेषु गृहेषु प्रासादेषु वानरानेवालेखयति, यत्र कुत्रापि च याति तत्रापि वानरविद्यया वानररूपाणि कृत्वा याति तन्निवासिलोकः कौतुकात्. ततश्च लोके वानरा एते इत्युक्तिर्जाता जगति, वानरद्वीपवासाच्च ते वानराः, न पुनस्ते सत्यं वानराः, यतः—वानरद्वीपराज्येन । वानरैर्लक्ष्मभिस्तथा ॥ वानरा इति कीर्त्यंते । तत्स्था विद्याधरा अपि ॥ १ ॥ तत्राथ श्रीकंठसुतो वज्रकंठो बलवांस्तेजस्वी विद्यावान् महाविद्याधरः सुखमनुभवन्नास्ते. अथैकदा श्रीकंठः सन्नासीनो व्योममार्गेण नंदीश्वरयात्रायै शाश्वतार्हतां वंदनाय देवान् गच्छतोऽद्राक्षीत्. तान् दृष्ट्वा तस्यापि मनसि श्रद्धा जाता यदहमपि नंदीश्वरे देवैः सह यामि, इति विचिंत्य सोऽपि विमाने उपविश्य देवैः सह नंदीश्वरे यातिस्म. ततः श्रीकंठस्याकाशमार्गे गच्छतो मानुषोत्तरे पर्वते विमानं स्ख-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लितं नदीवेग इव मार्गवर्तिनि पर्वते, तदा श्रीकंठस्य राज्ञो मनसि महादुःखं संजातं, अहो! मया प्राग्जन्मनि तपो न तेपे, येन मे नंदीश्वरयात्रामनोरथो नापूर्यत. ततस्तेन दुःखेन निर्वेदमापन्नः सन् स साधुसमीपे दीक्षां कक्षीचक्रे, तीव्रं तपस्तप्त्वा च सिद्धिक्षेत्रमियाय सः. श्रीकंठपुत्रो वज्रकंठः, एवमसंख्येषु नृपेषु गतेषु तत्पट्टे श्रीमुनिसुव्रतस्वामितीर्थे घनोदधिरथ इति नाम्ना राजाभूत्, लंकापुर्यामपि तदा कीर्तिधवलादसंख्येषु नृपेषु गतेषु तडित्केशनामा राजा जज्ञे श्रीमुनिसुव्रतस्वामितीर्थे. तयोर्लंकाकिष्कंधेशयोः परस्परं स्नेहो जज्ञे.

एकस्मिन् दिने तडित्केशो लंकाधीशः सपरिवारः क्रीडां कर्तुं नंदनवने गतः. तत्र वने जलकेल्यांदोलनादिषु प्रवृत्ते राज्ञि कश्चित्कपिर्द्रुमात्समुत्तीर्य श्रीचंद्रायाः पट्टराज्ञ्याः कुचौ नखैर्विलिलिखे. तद् दृष्ट्वा तडित्केशो वानरं बाणेन जघान, यतोऽसह्यो हि स्त्रीपराभवः. सोऽपि वानरो बाणप्रहारविधुरः क्वचिद्गत्वैकस्य साधोः प्रतिमास्थस्याग्रे पपात, सोऽपि साधुस्तस्मै वानराय नमस्कारप्रदानेन परलोकसंबलं दत्तवान्. सोऽपि वानरो नमस्कारप्रभावेणाब्धिकुमारेषु भुवनपतिदेवेषु देवो जातः. तत्रावधिज्ञानेन ज्ञात्वा तमुपकारिणं मुनिमुपेत्य वंदित्वा स्तुत्वा च स तस्याग्रे नृत्यं चक्रे.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ कुपितोऽसौ तडित्केशोऽन्यानपि प्लवंगमान् स्वसुभटैर्हक्कयामास. ततः सोऽब्धिकुमारो रुष्टः प्लवंगरूपाणि विकृत्य वृक्षशिरसि स्थित्वा शिलासमूहै राक्षसानुपद्रवयामास. ततो राक्षसैः संभूय पूजां कृत्वा धूपोत्क्षेपपूर्वं विज्ञप्तोऽसौ यथा त्वं कोऽसि किंचोपद्रवसीति राज्ञा विज्ञप्तः शांतकोपो देवो जातः. ततो लंकेशस्तेन देवेन सह तं मुनिमुपेत्य वंदित्वा वैरकारणं पृष्टवान्, भगवन्! वानरेण सह किं मे वैरकारणं? मुनिरप्याचख्यौ, श्रूयतां? राजन्! त्वं पूर्वभवे श्रावस्त्यां मंत्रिनंदनोऽभूः, एष सुरः पूर्वभवे काशीदेशे वाणारस्यां पापप्रियः पाराधिरभूत.

अथान्यदा तेन मंत्रिनंदनेन साधुसमीपे दीक्षा गृहीता, ततो मह्यां विहरन् स साधुः काशीदेशे वाणारस्यामगात्, तत्र तेन पापेन लुब्धकेन स दृष्टः, अपशकुनमिति च ज्ञात्वा बाणेन निपातितः स साधुर्मृत्वा माहेंद्रकल्पे देवोऽभूत्, ततश्च्युत्वा त्वं तडित्केश इति नाम्ना लंकाधिपो जातः, सोऽपि लुब्धकस्तस्मिन्नेव दिने विद्युत्पातेन मृतो नरके गतः, ततो निर्गत्य भवं भ्रांत्वा सोऽयं कपिर्जातः, हे राजन्! एतत्ते वैरस्य कारणं. एतां वार्तां श्रुत्वा शांतकोपः स सुरस्तं महामुनिं नत्वा लंकेशं समनुज्ञाप्य स्वस्थानं गतः. एतत् श्रुत्वा वैराग्योन्नतमनास्तडित्केशः सुकेशे निजतनये रा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्यं न्यस्य संयमं लात्वा केवलज्ञानमवाप्य मोक्षं जगाम. किष्किंधानाथो घनोदधिरथोऽपि निजपुत्रे किष्किंधिनाम्नि राज्यं संस्थाप्य दीक्षां लात्वा मोक्षं गतः. इतश्च वैताढ्ये रथनूपुरचक्रवालाख्यं पुरमस्ति, तत्राशनिवेगनामा विद्याधरोऽस्ति, तस्य पुत्रौ विजयसिंहविद्युद्वेगनामानावभवतामशनिवेगस्य दोर्दंमाविवापरौ.

तत्रैव वैताढ्ये आदित्यपुरे माल्यवान्नामा राजाभूत, तस्य श्रीमालेति कन्यका, राज्ञा तस्याः स्वयंवरः कारितः, तस्मिन् स्वयंवरेऽनेकविद्याधरनरेंद्राः समागत्योच्चेषु मंचेषूपविष्टाः शोभंते पालके विमाने वैमानिका इव. प्रतिहार्या वर्ण्यमानान् विद्याधरनरेंद्रान् सर्वानपि विमुच्य तया श्रीमालया किष्किंधिर्वव्रे, सा तत्कंठे वरमालां निचिक्षेप दोर्लतासत्यंकारमिव, तद् दृष्ट्वा विजयसिंहः सिंहपराक्रमो भृकुटीभीषणो बभाषे, अहो एते वैताढ्यान्निष्काशिता आसन् दुर्नयकारिणश्चौरवत्, तत्केनामीहानीता दुर्विनीताः कुलपांशनाः! हन्म्येतान् दुराचारान् पशूनिवेत्युक्त्वोत्थितोऽशनिवेगतनयो यमोपमः, एवमन्येऽपि वानरा राक्षसा वैताढ्यवासिनो विद्याधरा अशनिवेगसैनिकाश्च संग्रामं चक्रिरे मिथः, यथा—दंतादंतिप्रवृत्तेभै—स्फुल्लिंगीकृतांबरः ॥ कुंताकुंतिमिलत्सादी। शराशरिमिल-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्रथी ॥ १ ॥ खड्गाखड्गिपतत्पत्ति—रसृक्पंकिलभूतलः ॥ रणस्ततः प्रववृत्ते । कल्पांत इव दारुणः॥ ॥ २ ॥ एवं तस्मिन् संग्रामे जायमाने किष्किंधिलघुभ्राता विजयसिंहस्य शिरः क्षुरप्रबाणेनाछिद-त्तरोः फलवत्, विजयसिंहे मृते तत्सैन्यं भग्नं, यतः—मेघहीना हता देशाः । पुत्रहीनं हतं कुलं ॥ वस्त्रहीनं हतं रूपं । हतं सैन्यमनायकं ॥ १ ॥ ततः किष्किंधिनाथः श्रीमालामुद्वाह्य जयश्रिय-मिव महामहेन विमानमारोप्य सपरिछदः किष्किंधां समागात्.

इतश्चाशनिवेगः पुत्रवधोदंतं श्रुत्वा अकांमाशनिपातवत किष्किंधानगर्यामागात्. लंकाकि-ष्किंधातः सुकेशिकिष्किंधिभ्रातरावपि निरीयतुः. उभयोरपि सैन्ययोः संग्रामो जज्ञे, ततो राक्षस-वानरसैन्यानि दिशोदिशं पलायितानि. ततो लंकाकिष्किंधानायकौ सपरिवारौ पलायित्वा पाताल-लंकायां जग्मतुः. ततः प्रशांतकोपोऽशनिघोषः शत्रुनिष्काशनाक्रांतमना निर्घातनामानं खेचरं लं-काकिष्किंधयो राज्ये निवेश्य स्वयं वैताढ्ये रथनूपुरचक्रवालनगरे आजगाम महामहेन. अन्येद्यु-रशनिघोषः साधुसंयोगात्सहस्रारे सुते राज्यं न्यस्य दीक्षामुपपेदे. अथ पाताललंकायां स्थितयो-र्लंकाकिष्किंधानाथयोर्मध्ये सुकेशिलंकानाथस्येंद्राण्यां पट्टराज्यां त्रयः पुत्राः संजाता माली १ सु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माली २ माल्यवांश्चेति ३. किष्किंधाधिपतेः किष्किंधिराज्ञः श्रीमालायां पट्टराज्ञ्यां द्वौ पुत्रौ संजातावादित्यरजा ऋक्षरजाश्चेति महाभुजौ. अपरेद्यू राज्ञा किष्किंधिना सुमेरौ यात्रां कृत्वा निर्वृतेन मधुनामा पर्वतो दृष्टः, तत्र मनोरमोद्याने तस्य मनो रंतुं विशश्राम. तेन तत्रैव नवीनं किष्किंधिनाम पुरं कृत्वा कैलाशे यक्षराडिव स तस्थिवान्. सुकेशिनोऽपि त्रयः पुत्रा निजं राज्यं शत्रुभिर्हृतं श्रुत्वा क्रुधा ज्वलंतोऽग्नय इव वीर्यशालिनो लंकायां समागत्य निर्घाताभिधं खेचरं रणांगणे निपातयामासुः.

एवं लंकाराज्ये माली राजाभवत्, किष्किंधायां चादित्यराजाभवत्. इतश्च वैताढ्यगिरौ रथनूपुरचक्रवालनगरेऽशनिवेगसूनोः सहस्रारनरेंद्रस्य चित्तसुंदर्या पट्टराज्ञ्या गर्भे कश्चिद्देवो महर्द्धिकः समुत्पन्नः, गर्भस्यानुभावेन च तस्या दुःपूरो दोहदो जातो यदहमिंद्रेण सह भोगाननुभवामि. अथापूर्यमाणेन तेन दोहदेन सा दुर्बला जाता वक्तुमशक्यत्वात्. ततः सहस्रारनृपेणातिनिर्बंधेन पृष्टा सा यथातथमुवाच. ततः सहस्रारनृपः सहस्राक्षरूपं विधाय दोहदं पूरयामास. ततः संपूर्णदोहदा पूर्णे मास्यन्यूनविक्रमं प्राचीव सूर्यं सा राज्ञी पुत्रं प्रसवयामास, इंद्रसंभोगदोहदात्तस्येंद्र इति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाम दत्तवान्. क्रमेण स इंद्रो वृद्धिं गतः, समये पित्रा तस्य बह्वयो विद्याधर्यः परिणायिताः, बह्वयो विद्याश्च शिक्षिताः, ततस्तस्मै राज्यं दत्वा सहस्रारो धर्मरतोऽभवत्. राज्यं कुर्वता च तेनेंद्रेण सर्वे विद्याधराः साधिताः. सर्वे देशाश्च वशीकृताः, ततस्तेनेंद्रेण स्वकीयेंद्रतुल्या ऋद्धिर्निष्पादिता यथा—दिक्पालाश्चतुरश्चक्रे । सप्तानीकान्यनीकपान् ॥ तिस्रः परिषदो वज्र—मस्त्रमैरावणं द्विपं ॥ ॥ १ ॥ रंभादिका वारवधू—र्मंत्रिणं च बृहस्पतिं ॥ नैगमेषिसमाख्यं च । पत्त्यनीकस्य नायकं ॥ ॥ २ ॥ एवं विद्याधरैरिंद्र—परिवाराभिधाधरैः ॥ इंद्रोऽहमेवेति धिया । सोऽखंडं राज्यमन्वशात् ॥ ॥ ३ ॥ तस्य चत्वारो दिक्पाला यथा—ज्योतिःपुरेश्वरध्वजराजस्य पुत्र आदित्यकीर्तिराज्ञीकुक्षिसमुद्भवः सोमनामा विद्याधरो दिक्पालः प्राच्यामासीत्. १. मेघपुरेश्वरमेघराजपुत्रो वरुणाकुक्षिसमुद्भवः पश्चिमदिक्पतिर्वरुणनामा विद्याधर आसीत. २. कांचनपुरेश्वरस्वरनाम्नो राज्ञः पुत्रः कनकवतीकुक्षिसमुद्भव उत्तरदिक्पतिः कुबेर इति नाम्ना विद्याधर आसीत्. ३. किष्किंधानगर्यधिपकालराजपुत्रः श्रीप्रभाराज्ञीप्रसूतो दक्षिणदिक्पतिर्यमनामा विद्याधर आसीत्. ४. एवं स राज्यं कुर्वाणो विहरन्नास्ते.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवंविधं तं महर्ध्या राज्यं कुर्वाणं विलोक्य लंकाधिपो मालिनृपतिर्गर्धेनोऽन्यमिन्नमिव न सेहे. ततो माली राजा स्वभ्रातृभिर्मंत्रिनिर्वानरैश्च परिवृतो विविधैर्वाहनैश्च युतः प्रचचालेंद्रंप्रति. मार्गे गच्छतां तेषामपशकुनान्यजवन्, यथा—अंगारजस्मेंधनपंकधूलि—पर्णार्ककर्पासतुषास्थिकेशाः ॥ कृष्णांजनावस्करकृष्णधान्य—पाषाणविष्ठाभुजगौषधानि ॥ १ ॥ तैलं गुर्म चर्म वसा विभिन्ना । तिक्तं च नार्म लवणं तृणं च ॥ तक्रार्गलाशृंखलवृष्टिघाताः । कार्ये कचितत्रिंशदियं न शस्ता ॥ २ ॥ स्वपादयानस्खलनं दशानां । खंजः कचिद्यानपलायनं च ॥ द्वाराभिघातध्वजवस्त्रपाताः । प्रस्थानविघ्नं कथयंति यातुः ॥ ३ ॥ मार्जारयुद्धारवदर्शनानि । कलिः कुटुंबस्य परस्परस्य ॥ चित्तस्य कालुष्यकरं च सर्वं । गंतुं प्रयाणप्रतिषेधनाय ॥ ४ ॥ भूरयः खगमृगाः समाकुला—स्तुच्यकालविहितारवाश्च ये ॥ ते जवंति परदेशयायिनां । देहिनां मरणकारिणो ध्रुवं ॥ ५ ॥

इत्याद्यपशकुनान्यवलोकयन् नैमित्तिको बभाषे, राजन्! विचार्य गंतव्यं संग्रामे, यत एतेऽपशकुनानि निवारयंति त्वां, सुमालिनापि निवारितोऽपि मंत्रिणा च निषेधितोऽपि दोर्बलगर्वितो मालिराट् तद्वचनं न मन्यतेस्म, ततः सबलवाहनोऽसौ वैताढ्यगिरिं जगाम. इंद्रोऽप्यैरावणारूढः पा·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णिना वज्रमुल्लालयन् हुंकारमुखरितांबरश्चतुर्भिर्लोकपालैर्वृतः सेनासमन्वितो मालिना सह रणाय दुढौके. तत इंद्रराक्षससैन्ययोः संग्रामो बभूव, स्यंदनैः स्यंदनानां, गजैर्गजानां, वाजिभिर्वाजिनां, पादात्यैश्च पादचारिणां संग्रामः समभवदिति, यथा—निपेतुः स्यंदनाः क्वापि । शिखराणीव भूभृतां ॥ पलायंते गजाः क्वापि । वातोध्धूता इवांबुदाः ॥ १ ॥ पेतुर्भटानां मूर्धानो । राहुशंकाप्रदाः क्वचित् ॥ कृत्तैकपादाः केऽप्यश्वा—श्चेलुर्मंदानिला इव ॥ २ ॥ अमर्षादिंद्रसैन्येन । मालिसैन्यमभज्यत ॥ बलवानपि किं कुर्या—त्प्राप्तः केसरिणा करी ॥ ३ ॥ ततः पुनरपि संग्रामे लंकाधीशेन मालिनेंद्रसैन्यं त्रासितं. ततः क्रोधारुणमुख इंद्रोऽपि वज्रमुल्लालयन् मालिना सह दुढौके, मालिनृपं च शस्त्रवृष्टिं कुर्वाणमिंद्रस्तीक्ष्णवज्रेणावधीत्. हतं च मालिनं ज्ञात्वा तत्सैनिका राक्षसा वानराश्च नष्टाः, पलायित्वा च पाताललंकामलंचक्रुः. इंद्रोऽपि राक्षसान् जित्वा राक्षसीविद्यां च हृत्वा वैश्रवणाय राज्ञे राज्यं दत्वा स्वपुरं ययौ.

सुमालिराज्ञश्च प्रीतिमत्यां सहचारिण्यां रत्नश्रवाः पुत्रः संजज्ञे पाताललंकायां, क्रमेण संप्राप्तयौवनो रत्नश्रवा एकस्मिन् दिने विद्यासाधनार्थं कुसुमोद्याने गतः, तत्र स एकत्र रहःस्थाने शुचि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माल्यधरो विलेपनानुलिप्तगात्रो जपस्रग्धरो नासाग्रन्यस्तदृग्द्वंद्वश्चित्रित इवास्थात्. एवं सप्तदिनांते तस्य मानवसुंदरीनाम्नी विद्या सिद्धिं गता. तस्मिन्नेव समये काचिद्विद्याधरी पितृशासनात्तस्य रत्नश्रवसः पुरः स्थिता, दृष्टा पृष्टा च तेन का त्वं? केन हेतुना च समागतेति पृष्टा सती सा जगौ श्रूयतां राजन्! कौतुकमंगलं नाम नगरं, तत्र व्योमबिंदुर्नाम्ना विद्याधरः, तस्य द्वे पुत्र्यौ स्तः, एका कैशिका, अपरा कैकशी च. कैशिका यक्षपुरेश्वरविश्रवसो राज्ञो दत्ता, तत्पुत्रो वैश्रवणनामा योऽधुना लंकाराज्यं करोति. अहं तु कैशिकाया लघुभगिनी कैकशीनाम्नी नैमित्तिकगिरा पित्रा तुभ्यं दत्तात्रागता, अतस्त्वं मम पाणिग्रहणं कुरु? ततो रत्नश्रवा राजा तत्रैव बंधुवर्गं समाहूय कैकशीं परिणीतवान्, तत्र च पुष्पपुरं नाम नवं नगरं कृत्वा स तया सह भोगान् बुभुजे. अन्यदा कैकशी रत्नश्रवोराज्ञी स्वप्ने सिंहं ददर्श. एवं कुंभिकुंभस्थलभेदनतत्परं सिंहं स्वप्ने दृष्ट्वा हर्षिता सा राज्ञे जगौ, राज्ञोक्तं हे प्रिये! तव महान् पुत्रो भविष्यति. अथ क्रमेण सा कैकशी गर्भं बभार. गर्भानुभावतो सा निष्टुरारावा बभूव, दर्पणे चाविद्यमाने सा खड्गे स्वाननं ददर्श, साहंकारं मुखं बभार, विद्विषां मूर्ध्नि पादं दातुमियेष.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्यादिदारुणान् भावान् वितन्वती सा सुखेनास्थात्, संपूर्णे च समये शुभलग्ने शुभमुहूर्ते 'शुभवेलायां शुभदिने पूर्णे मासि राज्ञी कैकशी पुत्रं सुषुवे, स च क्रमेण साधिकद्वादशवर्षसहस्रायुरजायत, तृतीये दिने तस्य चंद्रसूर्ययोर्दर्शनं कारितं, षष्ठे दिने षष्ठिजागरणादिकं कृतं, द्वादशे दिनेऽशुचिजातकर्मणि निवृत्ते तस्य दशमुख इति नाम दत्तं, यतः—भीमेंडेण पुरा दत्तं । नवमाणिक्यनिर्मितं ॥ चकर्ष पाणिना हारं । पार्श्वस्थितकरंडकात् ॥ १ ॥ कंठे चिक्षेप तं हारं । बालः सहजचापलात ॥ जगाम विस्मयं तेन । कैकशी सपरिछदा ॥ २ ॥ अन्वयावद्देवतात्र—द्योऽपूजितव पूर्वजैः ॥ न शक्यो वोढुमन्यैर्यै—र्नवमाणिक्यनिर्मितः ॥ ३ ॥ अश्वनागसहस्रेण । निधानमिव रक्ष्यते ॥ हार आकृष्य कंठेऽसौ । चिक्षिपे शिशुना तव ॥ ४ ॥ नवमाणिक्यसंक्रांत—मुखत्वात्तस्य तत्क्षणं ॥ नामधेयं दशमुख । इति रत्नश्रवा व्यधात ५ ॥ अथैकस्मिन् दिने स रत्नश्रवाश्चिंतयति, यन्मेरौ चैत्यवंदनाहेतवे गतवता तेन सुमालिना चतुर्ज्ञानधरो मुनिः पृष्टो हारवृत्तांतं, साधुनोक्तं य एनं हारं कंठे धारयिष्यति, सोऽर्धचक्री भविष्यति, तर्हि नूनमयं मम पुत्रो दशमुखोऽर्धचक्री भविष्यतीति निश्चितं. ततः कैकशी द्वितीयं सुतं भानुस्वप्नेन सूचितमसूत भानुकर्ण इ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ति नामानं, कुंभकर्ण इति च द्वितीयनामानं. पुनरपि कैकशी शशांकस्वप्नसूचितं बिभीषणनामानं तृतीयं सुतमसूत. ततः कियत्यपि काले गते कैकशी चंद्रतुल्यनखत्वाच्चंद्रनखां सूर्पनखामिति च व्याख्यातां सुतां सुषुवे, सपादषोडशधनुःशरीरसमन्वितास्ते त्रयोऽपि सहोदरा यथासुखं रेमिरे, गतभयाः कामचारिणो गगनगामिनः सुरसमप्रभाः संसदि स्थिता देवराजा इव ते राजंते. ॥ इति श्रीमत्तपागच्छे भट्टारकश्रीहीरविजयसूरिराज्ये आचार्यश्रीविजयसेनसूरियौवराज्ये पंडितश्रीदेवविजयगणिविरचिते श्रीरामचरित्रे गद्यबंधे राक्षसवंशवानरवंशोत्पत्तिरावणकुंभकर्णबिभीषणजन्मवर्णनो नाम प्रथमः सर्गः समाप्तः ॥ श्रीरस्तु ॥

---

॥ अथ द्वितीयः सर्गः प्रारभ्यते ॥

अथैकस्मिन् दिने सानुजो दशमुखो विमानारूढमाकाशे यांतं वैश्रवणं नृपं ददर्श. तदा दशमुखेन माता कैकशी पृष्टा, हे मातः कोऽयं विमानारूढो महामहेन याति? मात्रोक्तं वत्स! एष मे भगिनीसुतो वैश्रवणनामा सकलविद्याधरश्रेष्ट इंद्रसुभटो ज्येष्टो याति. अथ ततः प्रभृति दशमु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खो लंकाराज्यकृते बहूनुपायानचिंतयत्. जनन्या प्रोक्तं वत्स! पूर्वं भीमव्यंतरेंद्रो मेघवाहननृनुजे पूर्वभवनिजतनयाय राक्षसवंशकंदाय राक्षसद्वीपं लंकाराज्यं पाताललंकां राक्षसीविद्यां च शत्रुप्रतीकाराय ददौ. संप्रति मेघवाहनक्रमायातत्वत्पितामहसुमालिसकाशादिंद्रेण सा राक्षसी विद्या हृता, लंकाराज्यं गतं, त्वत्पितामहोऽपि पाताललंकायां तिष्ठति, तव शत्रवः सुखेन क्रीडंति, तेन मम तत्र पितुश्च जीवितं तेनाधुना सशल्यं वर्तते, हे पुत्र! अथ त्वं पुनरपि लंकाराज्ये स्थितः कदा मया दृक्ष्यसे? कदा चाहं वीरपुत्रवती भविष्यामीति चिंतामहं करोमि. बिभीषणो वक्ति हे मातस्त्वं वीरपुत्रवत्येवासि, यतोऽयं ते दशकंधरो महाशौर्यवान् वीरपुत्रोऽस्ति, अतो विषादेनालं, त्वमस्य पुत्रस्य पराक्रमं न वेत्सि, अस्य पुरतः क इंद्रः? को वैश्रवणः? के लोकपालाः? का विद्या? के विद्याधराः? के राजानः? के देवाः? के मानवाश्च? सर्वेऽप्येते तृणतुल्याः. किंच हे मातरयमार्यो दशग्रीव आस्तां, एकः कुंभकर्णोऽपि सकलां महीं वशीकर्तुमीश्वरः. दशमुख उवाच—दोर्वीर्येणापि निर्जेतुं । शक्तोऽस्म्यहं जगज्जनान् ॥ तथापि हि प्रयोक्तव्या । विद्याशक्तिः क्रमागता ॥ १ ॥ तद्विद्यां साधयिष्यामि । निरवद्यां समंततः ॥ अनुजानीहि यास्यामि । तत्सिद्ध्यै सानुजो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽप्यहं ॥ २ ॥ एवमुक्त्वा नमस्कृत्य । पितरौ सानुजोऽपि सः ॥ ताभ्यां स चुंबितो मूर्ध्नि । भीमारण्यमुपाययौ ॥ ३ ॥ अथ तत्र ते त्रयोऽपि महात्मानो महाभीषणेऽरण्ये सिंहशार्दूलभयंकरे जटामुकुटमंडिता अक्षमालाधरा नासाग्रन्यस्तदृग्द्वंद्वाः श्वेतांशुकधराः सर्वकामदां सौख्यदामष्टाक्षरीं विद्यां साधयित्वा षोडशाक्षरं मंत्रं दशकोटिजापात्मकं जपितुमारेभिरे. इतश्च जंबूद्वीपपतिः सुरः सांतःपुरपरिवारस्तत्रायातस्तान् ददर्श. तेषां विद्यासाधनविज्ञाय स देवसुंदरीः प्रेरयामास. ततस्तेषां क्षोभाय चक्रिरे ता हावभावविलासविभ्रमान्, यतः—हावो मुखविकारः स्या—द्भावश्चित्तसमुद्भवः ॥ विलासो नेत्रजो ज्ञेयो । विभ्रमो भ्रूसमुद्भवः ॥ १ ॥ कथयामासुश्च तास्तान्प्रति भो भो मंत्रसाधकाः! शृणुत किं भवतां विद्यासिद्ध्या? अस्माभिः सह यूयं स्वेच्छया रमध्वं? यथा सर्वा विद्याः, सर्वे मंत्राः, सर्वाश्च सिद्धयः प्रकटीभवंति.

इत्याद्यनेकवचनविलासैस्तास्तांश्चालयितुं लग्नाः, परं ते न चुक्षुभुः. ततो जंबूद्वीपपतिः स्वयं प्रकटीभूयाब्रवीद्भो भो मुग्धाः! युष्माभिः कोऽयमारब्धो ध्यानाडंबरः! यूयं नूनं केनचिद्धूर्तेन वंचिताः स्थ, युष्माकं यत्किमपि विलोक्यते तत्प्रार्थयत, परं मुच्यतामयं ध्यानाडंबरः, इति श्रुत्वापि ते न

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चुक्षुभुः. ततो जंबूद्वीपाधिपतिः किलकिलारावकारिणो विहितविविधदुष्टोपायान् पर्वतशृंगनिपातनपरांश्च व्यंतरान् प्रेरयामास, तथापि ते न चुक्षुभुः. ततस्ते व्यंतरा रत्नश्रवसं कैकशीं चंद्रनखां च विकृत्य तेषामग्रे चिक्षेप, ते च साश्रुनयनाः करुणस्वरं चक्रंदुर्यथा हे पुत्रा एते वयं लुब्धकैः पशव इव निर्दयैरेतैर्युष्माकं पश्यतां हन्यामहे, उत्तिष्ठातो वत्स दशकंधर! हे कुंभकर्ण! भो बिभीषण! अस्मांस्त्रायस्व? हे पुत्र दशकंधर! तवाहंकृतिः क्व गता, तव शक्तिश्च क्व विलीना? तव पुरत एते पापा अस्मान् यमसदनं नयंति. तथापि ते न चलिताः. ततो देवेन मायया दशकंधरकंधरां छित्वा कुंभकर्णबिभीषणयोः पुरतः पातिता, तां दृष्ट्वा भ्रातृभक्तितः कुंभकर्णबिभीषणौ किंचिच्चलितौ, कोपवशं च गतौ, रावणस्तु परमार्थज्ञो न चलितो मनागपि मनसि, गिरींद्र इव निश्चलश्चासीत. तदाकाशे साधुसाध्विति देववाणी प्रकटीभूता, सर्वेऽपि व्यंतराः पुष्पवृष्टिं चक्रुः. तस्मिन् समये सहस्रविद्या द्योतितांबरास्तत्र समभ्येयुः, सर्वाभिश्च संभूय वृतः स दशाननः. ताश्च विद्या यथा—

प्रज्ञप्ती रोहिणी गौरी । गांधारी च तथा परा ॥ नभःसंचारिणी काम—दायिनी द्योतितांबरा ॥ १ ॥
अणिमा लघिमा क्षोभ्या । मनःस्तंभनकारिणी ॥ श्रुतिदाना तपोरूपा । दहनी विपुलोदरी ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शुभप्रदा रमारूपा । दिनरात्रिविधायिनी ॥ वज्रोदरी समाकृष्टि—दर्शनी अजरामरा ॥ ३ ॥ अनि· लस्तंभिनी तोय—स्तंभिनी गिरिदारिणी ॥ अवलोकिनी तु वह्निर्हि । घोराधारा भुजंगिनी ॥ ४ ॥ वारुणा भुवनावंध्या । दारुणी मदनाशिनी ॥ भास्करी रूपसंपत्ति—राशानी विजया जया ॥ ५ ॥ वर्धिनी मोचनी चैव । वाराही कुटिलाकृतिः ॥ चित्रोद्भवकरी शांतिः । कौबेरी वशकारिणी ॥ ६ ॥ योगेश्वरी बलोत्साही । चंमाली विप्रधर्षिणी ॥ दुर्निवारा जगत्कंप—कारिणी भानुमालिनी ॥ ७ ॥ एवमाद्या महाविद्याः । पूर्वसुकृतकर्मणा ॥ स्वल्पैरेव दिनैः सिद्धा । दशास्यस्य महात्मनः ॥ ८ ॥ अष्टभिः कुलकं ॥ समृद्धिनी १ जृंभिणी २ सर्वापहारिणी ३ व्योमगामिनी ४ इंद्राणी ५ चैताः पंच विद्याः कुंभकर्णस्य सिद्धाः. सिद्धार्था १ शत्रुदमनी २ निर्व्याघाता ३ खगामिनी ४ चेति च· तस्रो विद्या बिभीषणस्य सिद्धाः. ततो जंबूद्वीपाधिपो दशमुखं क्षमयामास, यथा ममापराधं क्षम्य· तामित्युक्त्वा स तत्रैव वने स्वयंप्रभानाम्नीं नगरीं दशमुखकृते कृतवान्, तत्र रावणस्य राज्यं संस्था· प्य स्वस्थानं गतोऽणाढिकनामा स सुरः. अथ रावणं विद्यासिद्धं विज्ञाय तन्मातापितरौ सकलप· रिवारपरिवृतौ तत्रैयतुः, तैश्च महामहश्चक्रे । सोदरास्ते त्रयोऽपि हि ॥ मानिताः पूजिता बाढं । पु·

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ण्यैः सर्वत्र पूज्यते ॥ १ ॥ उपवासैरथो षड्भि—श्चंद्रहासमसिं वरं ॥ दशास्यः साधयामास । पुण्यैः सर्वं हि साध्यते ॥ २ ॥

तस्मिन् समये वैताढ्यगिरौ दक्षिणश्रेण्यां सुरसंगीतनाम्नि नगरे मयूरनामा विद्याधरोऽस्ति, तस्य हेमवतीनाम्नी पट्टराज्ञी, तयोः पुत्री कल्पवल्लीस्वप्नोपशोभिता मंदोदरीनामास्ति, क्रमेण वर्धमानाष्टवार्षिकी सा जाता, पित्रा पाठिता सकलविद्याग्राहिता च क्रमेण यौवनं प्राप्ता, यथा—शुचिनेत्रद्वयं यस्या । वक्त्रं चंद्रोपमं शुभं ॥ स्मरपाशोपमौ कर्णौ । कपोलौ दर्पणोपमौ ॥ १ ॥ नाशिका तैलधारेव । कामचापोपमौ भ्रुवौ ॥ दशना हीरकतुल्या । विद्रुमप्रवराधरौ ॥ २ ॥ मयूरस्य कलापेन । तुल्यं कचकबंधनं ॥ ईदृग्विधस्वरूपां तां । दृष्ट्वा लोकोऽप्यचिंतयत ॥ ३ ॥ श्यामा यौवनशालिनी मधुरवाक्सौभाग्यभाग्योदया । कर्णांतायतलोचनातिचतुरा प्रागल्भ्यगर्वान्विता ॥ रम्या बालमरालमंथरगतिर्मत्तेभकुंभस्तनी । बिंबोष्ठी परिपूर्णचंद्रवदना भृंगालिनीलालका ॥ ४ ॥ पीनोरूः पीनगंभा लघुसमदशना पद्मनेत्रांतरक्ता । बिंबोष्ठी तुंगनाशा गजपतिगमना दक्षिणावर्तनाभिः ॥ स्निग्धांगी वृत्तवक्त्रा पृथुमृदुजघना सुस्वरा चारुकेशी । भर्त्ता तस्याः क्षितीशो भवति च सुभगा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुत्रमाता च नारी ॥ ५ ॥ एवंविधां निजपुत्रीं दृष्ट्वा मयराजो विद्याधरः कुमाराणां गुणगणविलो- कनेन तद्योग्यवराभावे मनसि चिंतामापन्नश्चिंतयति, अथेयं कन्या मया कस्य देयेति, ततो नृप- पृष्टेन मंत्रिणोक्तं स्वामिन्! चिंतां मा कुरु? अस्या कन्याया उचितो वरो मया लब्धोऽस्ति, मय- राज्ञोक्तं को वरः? मंत्रिणोक्तं लंकानाथो रत्नश्रवसः सुतो दशमुखनामा योग्यवरोऽस्ति, यतः— कुलं च शीलं च सनाथता च । विद्या च वित्तं च वपुर्वयश्च ॥ वरे गुणाः सप्त विलोकनीया— स्ततः परं भाग्यवशा हि कन्या ॥ १ ॥ अतः स्वामिंस्तस्मै देयेयं मंदोदरी, तस्या अप्ययं योग्यो वरोऽस्ति, ईदृशोऽन्यः कोऽपि वरो नास्ति राजसु विद्याधरेष्वप्यद्रिषु मेरुरिव.

इति श्रुत्वा मयराट् सांतःपुरपरिवारः ससैन्यः सबांधवो मंदोदरीं लात्वा दशमौलये दातुं च- चाल. स्वपुरुषैस्तं ज्ञापयित्वा ते सर्वेऽपि स्वयंप्रभपुरं ययुः. सुमालिप्रमुखा ज्ञातिवृद्धा अपि तं वि- वाहं मेनिरे. ततस्तैः सर्वैः कुटुंबपरिवारसंयुक्तैः शुभलग्ने शुभमुहूर्ते शुभग्रहनिरीक्षितकल्याणवत्यां वेलायां तयो रावणमंदोदर्योर्विवाहो विहितः. विवाहं कृत्वा मयराट् स्वस्थानं गतः, रावणोऽपि तया मंदोदर्या सहेंद्र इंद्राण्येव, ईश्वरः पार्वत्येव भोगान् बुभुजे. अथैकस्मिन् दिने रावणो व्योममार्गेण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रीडायै मेघरवगिरिं ययौ, तत्र गिरिसरोवरे षट्सहस्रप्रमाणाः खेचरकन्यका रममाणा रावणेन दृष्टाः, ताभिः कन्याभिश्च स रावणोऽपि दृष्टः, ततः सानुरागाः पाणिग्रहाय च साग्रहास्ताः कन्यास्तेन गांधर्वविवाहेन परिणीताः, यतः—ताः सरागाः सरागेण । दशग्रीवेण कन्यकाः ॥ गांधर्वेण विवाहेन । सर्वा अप्युपयेमिरे ॥ १ ॥ ततः कंचुकिभिस्तत्स्वरूपं तासां पितृभ्यो ज्ञापितं, ततस्ते सर्वे विद्याधराः कुपिताः संभूयानुदशकंधरं दधाविरे, तदा ता नवोढा दशकंधरंप्रति प्रोचुः, स्वामिंस्त्वं विमानं त्वरितं प्रेरय? यतोऽमरसुंदरनामा विद्याधरोऽन्यैर्विद्याधरैर्वृतः पृष्ठे समायाति, रावण उवाच हे सुंदर्यो यूयं मम दोर्बलं पश्यत? इत्युक्त्वा विमानस्थो रावणः संग्रामाय सज्जीभूय स्वविद्यास्त्रैर्विद्याधरास्त्राणि खंडयन् कांश्चिन्नागपाशैर्बंधयन् सिंहनादेन तां विद्याधरचमूमनाशयत. ततो दुर्धृष्योऽसौ दशास्यः प्रेयसीभिः पितृभिक्षां ययाचे, ततो रावणेन कृपया मोचितास्ते विद्याधरभूपाः स्वं स्वं स्थानं जग्मुः. रावणोऽपि प्रेयसीयुतो विद्याधरैः परिवृतश्च स्वयंप्रभपुरं समागतस्ताभिः प्रेयसीभिः सुखमनुभवन्नास्ते.

अथ कुंभपुराधीशस्य महोदरराजस्य स्वरूपनयनापट्टराज्ञीकुक्षिजां नवयौवनां तन्मिन्मालाना

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भ्रीं कन्यकां तडित्समप्रभां कुंभकर्णः परिणीतवान्. वैताढ्यदक्षिणश्रेणिनृपणज्योतिःपुरेशितुर्वीरसे· ननाम्नो नृपस्य विष्णुराज्ञीकुक्षिजां पंकजश्रीनाम्नीं पंकजोरुलोचनां बिभीषणः परिणीतवान्. रावण· मंदोदर्योः सुखमनुभवतोर्देवेंद्रस्वप्नसूचितो देवेंद्रसमतेजा इंद्र इति नाम्ना पुत्रोऽभवत्. कियत्यपि गते काले मंदोदरी राज्ञी मेघस्वप्नसूचितं द्वितीयं नंदनं मेघवाहननामानं प्रसूतवती. अथैकस्मिन् समये कुंभकर्णबिभीषणौ वैश्रवणाश्रितां लंकामुपद्रवतुः, सोऽपि वैश्रवणो दूतेन रावणपितामहं सुमालिनमित्यवोचत्, भो राजन्! वार्यतां रावणावरजौ कुंभकर्णबिभीषणौ दुर्मदौ स्ववीर्यगर्वितौ पातालंलंकास्थावन्यवीर्यमजानंतौ पातालंलंकाकूपभेकौ लंकोपद्रवं कुर्वाणौ, एतावत्कालं मया ता· वुपेक्षितौ, अथाहं नोपेक्षां करिष्ये, तत श्रुत्वा क्रुद्धो रावणो दूतं जगाद, अरे! एष वैश्रवणः क इवेंद्रत्वं वहति? सपरिवारं तं यदि हन्मि, तदैवाहं रावणः, दूतत्वात्त्वं त्ववध्योऽसि, अतो गच्छ स्व· स्थानं. गतो दूतो वैश्रवणाय यथोक्तं निवेदितवान्.

तत् श्रुत्वा वैश्रवणोऽपि कुपितः. अथ ससोदरो रावणः सपरिवारः ससैन्यो लंकानगर्यां गतः, वैश्रवणोऽपि लंकातः ससैन्यो निर्गत्य संग्रामं चक्रे, मिथः कृते संग्रामे रावणो जितः, वैश्रवणश्च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पराजितः सन्नेवमचिंतयत्, संग्रामे भग्नोऽहमिंद्रस्य कथमास्यं दर्शयिष्ये? यतः—सरसो नष्टपद्मस्य । भग्नदंतस्य दंतिनः ॥ शाखिनश्छिन्नशाखस्या—लंकारस्य च निर्मणेः ॥ १ ॥ नष्टज्योत्स्नस्य शशिन—स्तोयदस्य गतांभसः ॥ परैश्च भज्यमानस्य । मानिनो धिगवस्थितिं ॥ २ ॥ तदलं मम राज्येना—नेकानर्थप्रदायिना ॥ उपादास्ये परिव्रज्यां । द्वारं निर्वाणवेश्मनः ॥ ३ ॥ इति निर्विण्णचित्तः पुनर्वैश्रवणश्चिंतयति, कुंभकर्णबिभीषणौ मम बांधवौ, रावणोऽपि मम बंधुर्येन मे वैराग्यमुत्पादितं, एवं ध्यात्वा शस्त्रादिकमाभरणालंकारादि च त्यक्त्वा तत्वनिष्ठः स स्वयमेव परिव्रज्यामुपाददे. ततः स तं साधुं नत्वा रावणो रचितांजलिरेवमुवाच, भो महाभाग! भो भ्रातस्त्वं राज्यं कुरु? एवं रावणे प्रोच्यमानेऽपि वैश्रवणः प्रतिमास्थितः किंचिन्नोचे, यतः स शिवंगम्यासीत्. एवंविधं तं निरीहं वैश्रवणं साधुं ज्ञात्वा क्षमयित्वा तत्पादौ च प्रणम्य वैश्रवणसत्कं पुष्पकं विमानं लात्वा रावणो लंकाराज्यं गृहीत्वा सपरिवारः सुखेनास्थात्.

अथैकस्मिन् दिने रावणः पुष्पकविमानारूढो भ्रातृभिः परिवृतः सम्मेतशिखरयात्रां कृत्वा तत्रार्हत्प्रतिमां च नत्वा महास्तोत्रेण स्तुत्वा नाट्यं कृत्वा मुदितमनाः सम्मेतशैलादवतरन् कोलाहलं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रुत्वा स्वसेवकान् पृष्ठतिस्म, ततः प्रतिहार ऊचे राजन्! वनात्कश्चिद्धस्तिरत्नमत्रागात. स च सप्तहस्तोन्नतो नवहस्तायतः पिंगलनेत्रः श्वेतवर्ण उन्नतकुंभद्वयभासुरः सुस्वरः सप्तांगभूप्रतिष्ठितश्चास्ति. तत् श्रुत्वा रावणस्तं हस्तिनं वशीकृत्य तदुपर्यारोहत्. ततस्तेन तं सुलक्षणं विज्ञाय तस्य भुवनालंकार इति नाम दत्तं, तत्रारूढश्च रावण ऐरावणारूढ इंद्र इव शुशुभे. इतश्च घातजर्जरः पवनवेगनामा कश्चिद्विद्याधरः समागत्य रावणं व्यजिज्ञपत्, भो देव! पातालंलंकागतकिष्किंधिनृपनंदनौ किष्किंधाराजधानीस्थितावादित्यरजाऋक्षरजानामानौ यमेन युध्ध्वा द्वावपि तौ भ्रातरौ बद्धौ, कारायां क्षिप्तौ, नरकावस्थां च प्रापितौ, तौ च क्रमायातौ तव सेवकौ स्तः, अतो भो स्वामिंस्त्वं तौ कारागृहान्मोचय? तयोर्यः पराभवः स तवैव पराभवः. रावण उवाच भो पवनवेग! येन मम सेवकौ कारागृहे क्षिप्तौ तस्याहं तत्फलं दर्शयिष्यामि, इत्युक्त्वा पुष्पकविमानारूढो विद्याधरचमूपरिवृतो रावणो यमदिक्पालपालितां किष्किंधापुरीं गतः, तत्र यमस्यातिदारुणांस्त्रपुपानशिलास्फालनपर्शुच्छेदादिकलितान् सप्तापि नरकान् क्लिश्यमानांश्च पत्तीन् दृष्ट्वातीवरुष्टो दशाननस्तान् परमाधार्मिकांस्त्रासयन् नरकान् भंजन् स्वपत्तीन् मोचयामास, महान् पुरुषः कस्य सौख्याय न स्यात्? अथ ते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नरकपाला यमं विज्ञपयामासुः, स्वामिन्! रावणेन नरकान् भंक्त्वा सर्वेऽपि बंदिनः कारागृहान्मोचिताः. एतद्वचनं श्रुत्वा यमो यमोपमः क्रोधारुणलोचनः सैन्यपरिवृतो रावणंप्रति दधावे. तत्र सादिनः सादिभिः, हस्तिपका हस्तिपकैः, रथिनो रथिभिः, पदातयः पदातिभिश्च सह महत्संग्रामं चक्रिरे. ततो रावणबाणजर्जरो यमराजः कंठगतप्राणो रथनूपुरनाथमिंद्रनामानं शरणं गत उवाच—

यमः शक्रं नमस्कृत्य । जगादैतत्कृतांजलिः ॥ जलांजलिर्मयादायि । यमत्वाय प्रभोऽधुना ॥ १ ॥
रुष्य वा तुष्य वा नाथ । करिष्ये यमतां न हि ॥ जभितो हि दशग्रीवो । यमस्यापि यमोऽधुना ॥ २ ॥ विद्राव्य नरकारक्षा—न्नारकास्तेन मोचिताः ॥ निजक्षात्रव्रतश्चोच्चै—र्जीवन्मुक्तोऽस्मि चाहवात् ॥ ३ ॥ जित्वा वैश्रवणं तेन । लंकापि जगृहे युधि ॥ तद्विमानं पुष्पकं च । विजितं सुरसुंदर ॥ ४ ॥

यमस्यैतद्वचः श्रुत्वा क्रुद्धं संग्रामतत्परं चेंद्रं कुलवृद्धा मंत्रिणः संग्रामान्निषेधयंतिस्म. तैर्निषिद्ध इंद्रो यमाय सुरसंगीतपुरराज्यं दत्वेंद्रो रथनूपुरचक्रे क्रीडति. ततो रावण आदित्यरजसे किष्किंधां ददौ, ऋक्षरजसे च ऋक्षपुरं ददौ, स्वयं च लंकायां ययौ. अथ लंकायां गते रावणे लंकाराज्यं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शोभितं, यथा—रजनी चंद्रेण, नभः सूर्येण, प्रासादो देवेन, पुष्पं भ्रमरेण, राजा छत्रेण, नगरं दुर्गेण, काननं कल्पवृक्षेण, योगी ध्यानेन, धनी दानेन, यतिर्निर्ममत्वेन, शूरः सत्वेन, गजो मदेन, तुरगो जवेन, सरो राजहंसेन, मस्तकमवतंसेन, वनं सिंहेन, सुवर्णं रत्नेन, राज्यममात्येन, भोज्यं लवणेन, मेरुर्नंदनेन, कुलं सुपुत्रेण, भानुर्दिनेन, राजा न्यायेन, नारी विलासेन, नदी जलेन, पुष्पं परिमलेन, दंता मुखेन, विद्युन्मेघेन, मंडपस्तोरणेन, सुभटो रणेन, वक्षो हारेण, खं नक्षत्रेण, तथा लंका रावणेन शुशुभे.

अथ किष्किंधाधिनाथस्यादित्यरजसः कपिराजनंदनस्येंदुमालिन्यां जातो वालिनामा पुत्रो बलवान् रणरसिको बाहुबली चाभवत. एकस्मिन् दिने साधुसमीपं गतोऽसौ वाली धर्मं शृणोतिस्म, यथा—अस्थिरेण शरीरेण । स्थिरं कर्म समाचरेत् ॥ प्रायेण हि प्रयास्यंति । प्राणाः प्राघूर्णका इव ॥ १ ॥ देवपूजा गुरूपास्तिः । स्वाध्यायः संयमस्तपः ॥ दानं चेति गृहस्थानां । षट् कर्माणि दिने दिने ॥ २ ॥ इत्यादिधर्मं श्रुत्वा धर्मपरायणः स प्रत्यहमासमुद्रां जंबूद्वीपमर्यादां पृथ्वीं प्रदक्षिणीकृत्य देवान् ववंदे. कतिचिद्दिनानंतरं तस्यादित्यरजसः श्रीप्रभाराज्ञीकुक्षौ सुग्रीव इति द्वितीयः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुत्रोऽभूत्. ऋक्षपुराधीशस्य ऋक्षरजसो हरिकांताकुक्षिजौ नलनीलनामानावुभौ सुतावभूतां. इत आदित्यरजा राजा बलशालिने वालिने राज्यं दत्वा व्रतं लात्वा तपस्तप्त्वा शिवं ययौ, वालिराजापि सुग्रीव निजभ्रातरं यौवराज्ये न्यधात. यतः—सम्यग्दृष्टिं च सुग्रीवं । न्यायवंतं महौजसं ॥ सानुरूपं यौवराज्ये । सुग्रीवं वाल्यपि न्यधात ॥ १ ॥ अत्रांतरे रावणश्चैत्यवंदनार्थं भुवनालंकारगजारूढो मंदोदर्या सहितो मेरुपर्वते ययौ. तस्मिन् समये मेघप्रभात्मजः खरदूषणविद्याधरश्चंद्रनखां जातरागां जातरागो हृत्वा पातालंलंकां ययौ, तत्रस्थमादित्यरजसः सूनुं चंद्रोदरं निर्वास्य स्वयं तद्राज्यं जग्राह. एतद्वृत्तांतं श्रुत्वा क्रुद्धं रावणं खरघाताय यांतं मंदोदरी वारयामास राजन् कोऽयं कदाग्रहः? यतः कन्या ह्यवश्यं कस्मैचिद्देयैवं, सूर्पणखया च स्वयमेवानुरूपो वरोऽसौ वृतोऽस्ति, तथैव स खरदूषणोऽपि ते विक्रमी सेवकोऽदूषणोऽस्ति, अतोऽथ प्रधानपुरुषं प्रेष्य तयोरुद्वाहं कुरु? प्रसद्य च तस्मै पातालंलंकाराज्यं देहि? एवं मंदोदर्या प्रेरितो रावणस्तथैव चक्रे. ततः पातालंलंकाराज्यं कुर्वन् खरदूषणः सूर्पणखया सह भोगान् बुभुजे रावणाज्ञया.

इतो निर्वासितश्चंद्रोदरो नृपोऽनुराधया पत्न्या सह वने गतः, तत्रानुराधा गर्भिण्यभूत्, तस्मि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न् समये चंद्रोदरो मृतः, अनुराधा च तत्र सुतमसूत, तस्य च विराध इति नाम दत्तं. स च विराधो यौवनं प्राप्तो मदोत्कटं विद्याद्यलंकृतं खरदूषणे च वैरं कुर्वाणं वालिनरेश्वरं सिषेवे. अथैकस्मिन् दिने रावणो दूतमनुशिष्य किष्किंधापतिं वालिनंप्रति प्रेषयामास, सोऽपि दूतो गत्वा वालिनं व्यजिज्ञपत्, हे राजन्नहं रावणस्य दूतोऽस्मि, रावणो मन्मुखेनेति वक्ति, यदस्माकं पूर्वजः कीर्तिधवलस्तेन तव पूर्वजः श्रीकंठो वैरिभयाद्रक्षितः, तयोः प्रीतिरभूत, प्रीत्या च वानरद्वीपे स स्थापितः, तदादित आवयोः परिवारे परस्परं भूयसी प्रीतिश्चलिता, मम पूर्वजेन त्वत्पूर्वजो राज्ये स्थापितः, अतस्त्वं मम सेवको मम सेवां कुरु? यथावयोः प्राग्वत्स्नेहो वर्धते, प्राग्वन्मम सेवां कुर्वतस्तव राज्यं च वृद्धिं यास्यति, तत् श्रुत्वा वालिना प्रोक्तं भो दूत! न जानाम्यहं यदावयो राक्षसवानरयोः क्षीरनीरवत्संबंधोऽस्ति, परमहं तु देवगुरुं विनान्यस्य कस्यापि सेवां न जानामि. यतः—देवं सर्वज्ञमर्हतं । साधुं च सुगुरुं विना ॥ सेव्यमानं न जानामि । मोहः कः स्वामिनस्तव ॥ १ ॥ ततो दूतेनोक्तं भो राजेंद्र क्रमागतं स्नेहं त्वं मा खंडय? दशमौलेर्विप्रियं कुर्वतस्तव सौख्यं न भविष्यति. वालिनोक्तं तव स्वामी दर्पोत्कटो वर्तते, तस्य दर्पमहं हरिष्यामि.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततो विसृष्टो दूतो गतो रावणं नत्वेत्यूचे, भो रावणराजेंद्र! वाली तवाज्ञां न मन्यते, किं बहूक्तेन? तत श्रुत्वा रावणः क्रोधोध्धुरस्कंधः ससैन्यः पुष्पकविमानारूढो युद्धाय किष्किंधां ययौ. यतः—पुष्पैरपि न योधव्यं। किं पुनर्निशितैः शरैः॥ युद्धे विजयसंदेहः। प्रधानपुरुषक्षयः॥ १॥ सन्नह्य वालिराजोऽपि। राजमानो भुजौजसा॥ तमभ्यगाद्दोष्मतां हि। प्रियो युद्धातिथिः खलु॥ ॥ २॥ ततः प्रववृते युद्ध—मुभयोरपि सैन्ययोः॥ गंडशैलागंडशैलि। द्रुमाद्रुमि गदागदि ॥३॥ तत्राचूर्यंत शतशो। भ्रष्टपर्वतवद्रथाः॥ मृत्पिंडवदभिद्यंत। महांतोऽपि मतंगजाः॥ ४॥ कुष्मांडवदत्रुटयंत। स्थाने स्थाने तुरंगमाः॥ चंचापुरुषवद्भूमा—वपात्यंत च पत्तयः॥ ५॥ एवं प्राणिसंहारं प्रेक्ष्य वालिवानरो दशास्यंप्रत्यूचे, भो रावण! भवतः प्राणिवधः कर्तुं न युज्यते, तर्हि किं पुनः पंचेंद्रियवधः! त्वं श्रावको विवेकी दोष्मान् जनक्षयं कुर्वन् किं न लज्जसे? एवं वालिना संबोधितो रावणो दयावान् युद्धकुशलो द्वंद्वयुद्धं मेने. ततस्तौ द्वावप्यन्योन्यं द्वंद्वयुद्धेन युयुधाते शस्त्राशस्त्रैर्मंत्रामंत्रैर्बाणाबाणैश्च.

एवं चिरं युध्ध्वा रावणश्चंद्रहासखड्गं कृष्ट्वा वालिनंप्रति हंतुं धावितः, तेन खड्गेन शोभितो रा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वण एकशृंगो गिरिरिव, एकदंतो गज इव दृश्यते. एवमापततं रावणमवलोक्य कुपितो वाली चिंतयति, किमेनं चंद्रहाससहितं पाताले क्षिपामीति विचिंत्य तं करे धृत्वा वामकक्षाकोटरे च क्षिप्त्वा वालिराट् चतुःसमुद्रं बभ्राम. भ्रांत्वा च सचंद्रहासं रावणंप्रति स बभाषे, भो रावण! किं तव काचिद्भक्तिरस्ति? रावणेनोक्तं मुंच मुंच गतशक्तिं मां, ततः कृपालुना वालिना रावणो मुक्त उक्तं च—वीतरागं सर्वविद—माप्तं त्रैलोक्यपूजितं ॥ विनार्हतं न मे कश्चि—न्नमस्योऽस्ति कदाचन ॥ ॥ १ ॥ अथ त्वं मया मुक्तः. तव पूर्वजोपकारं स्मृत्वा मया तुभ्यं राज्यं दत्तं, त्वं सुखेन राज्यं भुंक्ष्व? अहं परिव्रज्यामादास्ये, अन्यथा मयि राज्यं कुर्वाणे त्वयि राज्यं कुतो भवेत्? किष्किंधायां च तव सेवकः सुग्रीवो भवतु. एवं कथयित्वा रावणाज्ञया सुग्रीवं किष्किंधाराज्ये संस्थाप्य वालिराट् स्वयं गगनचंद्रर्षिपादमूले व्रतमग्रहीत्. संयमं च लात्वैकादशांगीं पठित्वा विविधाभिग्रहपरः स तपस्तेपे. कदाचित्स प्रतिमाधरः, कदाचिद्ध्यानवान्, कदाचित्कायोत्सर्गस्थः, कदाचिद्योगासनस्थः, कदाचिन्मौनपरः, कदाचिद्वैयावृत्तिकरः, कदाचिद्देशनासक्तः, कदाचिद्गुरुभक्तश्च. एवं स विहरति. अथ कदाचित् सोऽष्टापदे गत्वा मासक्षपणं विधाय पारणकं करोतिस्म, पुनः कायोत्सर्गेण मासक्ष-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पणं कृत्वाचाम्लेन पारणकं करोति, एवं च कुर्वाणस्य तस्यानेका अणिमालघिमादयो लब्धय उत्पन्नाः. एवं स वालिमुनिर्बहुवर्षाणि यावत्तपस्तेपे.

इतश्च सुग्रीवराजोऽपि श्रीप्रभां स्वपुत्रीं दशमौलये दत्वा तस्य सेवकीभूय वालिपुत्रं चंद्ररश्मिं यौवराज्यपदे कृत्वा सुखेन राज्यं करोतिस्म. अथ श्रीप्रभां परिणीय रावणोऽपि लंकायां गतः, तत्रापि तेनान्येषां विद्याधराणां बह्व्यः कन्यका उपयेमिरे. अथैकस्मिन् दिने रावणो नित्यालोकपुरे नित्यालोकविद्याधरेशितुः कन्यकां रत्नावलीनाम्नीमुद्वोढुं यातिस्म. अष्टापदोपरि गच्छतस्तस्य पुष्पकं नाम विमानं स्खलितं सद्यो वप्रे सैन्यमिव, पर्वते नदीपूरमिव, आलानस्तंभे च गज इव. तद् दृष्ट्वा रावणश्चुकोप, तत्क्षणमेव स विमानं मुक्त्वाधोऽवततार, ततोऽष्टापदे कायोत्सर्गस्थं वालिमुनिं दृष्ट्वा स चिंतयति, अहो! एष दुराचारो मुनिवेषेणाद्यापि कषायं न मुंचति, अनेनैव मे विमानं स्खलितं, तत्फलं तस्य दर्शयिष्यामीति विचिंत्य स तंप्रत्युवाच, भो वेषविडंबकवालिन् नूनं तवाद्य पापं प्रकटीभूतमस्ति, येन त्वया मम विमानं स्खलितं, अद्याहं त्वां गिरिसहितं समुद्रे क्षेप्स्यामि. अहो! तेन क्रोधांधेन रावणेन साधुहत्यातीर्थभंगाद्यपि न चिंतितं, अतो धिक्क्रोधं, यतः—क्रो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धो मूलमनर्थानां । क्रोधः संसारवर्धनः ॥ धर्मक्षयंकरः क्रोध—स्तस्मात्क्रोधं विवर्जयेत् ॥ १ ॥ संतापं तनुते भिनत्ति विनयं सौहार्दमाच्छादय—त्युद्वेगं जनयत्यवद्यवचनं सूते विधत्ते कलिं ॥ कीर्तिं कृंतति दुर्मतिं वितरति व्याहंति पुण्योदयं । दत्ते यः कुगतिं स हातुमुचितो रोषः सदोषः सतां ॥ २ ॥ ततः क्रोधांधः स रावणोऽष्टापदं विदार्य तदधः प्रविश्य विद्यासहस्रं स्मृत्वाष्टापदं तडित्तडिति कुर्वाणं बाहुभ्यामुद्दधार.

अथाष्टापदं कंपमानं दृष्ट्वा वालिमुनिरवधिज्ञानेन तत्कारणं ज्ञात्वा कायोत्सर्गं च पारयित्वा सावधानोऽनेकलब्धिनिधानः प्राणिरक्षणपरो भरतेश्वरकारितजिनचैत्यरक्षास्मरणतत्परो रागद्वेषं विनैव केवलं रावणशिक्षानिमित्तं तीर्थरक्षार्थं च निजवामपादांगुष्टेनाष्टापदमूर्धानं किंचिदपीडयत. तेन संकुचितो रावणो मुखेन रुधिरं वमन्नरावीत्, तदादितो लोके तस्य रावण इति नाम जातं. ततः कृपापरेण मुनिना मुक्तो रावणोऽनुतापवान् वालिनं नत्वा रचितांजलिरुवाच, भो साधो! कृपापरेण त्वया ममापराधः क्षंतव्यः, मयाऽज्ञानिना भवद्भक्तिर्न ज्ञाता. हे प्रभो त्वमेव मे प्राणदातासीत्युक्त्वा तं मुनिं त्रिःप्रदक्षिणीकृत्य दशास्यः स्तौतिस्म—अहो ते निर्जितं कोहो । अहो मा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णो पराजिउ ॥ अहो निरकिआ माया । अहो लोहो वसीकउ ॥ १ ॥ अहो ते अज्जवं साहु । अहो ते मद्दवं वरं ॥ अहो ते उत्तमा खंति । अहो ते मुत्ति उत्तमा ॥ २ ॥ इहंसि उत्तमो भंते । पछा होसिहि उत्तमो ॥ लोगुत्तमोत्तमं ठाणं । सिद्धिं गछसि नीरउ ॥ ३ ॥ एवं तं स्तुत्वा रावणोऽष्टापदस्थे भरतकारिते चैत्ये सांतःपुरो गतः, तत्र निजखड्गादिराजचिह्नानि मुक्त्वा तेनाष्टप्रकारैर्जिनपूजा कृता, यथा—वरपुप्फ १ गंध २ अरकय ३ । पईव ४ फल ५ धूव ६ नीरपत्तेहिं ७ ॥ नेवज्ज ८ विहाणेण य । जिणपूआ अठहा भणिआ ॥ १ ॥ इत्यादिकां पूजां विधाय आरात्रिकमंगलप्रदीपपूर्वं गीतनृत्यवादित्रवादनं कुर्वतस्तस्य वीणातंत्री त्रुटिता, तदा रावणो वादित्ररंगभंगभयाज्जिनभक्तितत्परो निजभुजास्नसां समाकृष्य तया च तंत्रीं संधयित्वा वीणामवादयत्, अंतःपुरीभिश्च सम्यग्नर्तितं.

इतस्तत्र धरणेंद्रः समागात्, तेन च सा रावणभक्तिर्दृष्टा. संतुष्टोऽसौ रावणंप्रत्युवाच, भो रावण! अर्हद्भक्तेस्तव मुख्यं फलं मोक्षः, तथापि त्वं किंचिन्मत्तो याचस्व? तदा रावणेनामोघं शस्त्रं याचितं, ततो धरणेंद्रोऽमोघविजयानाम्नीं विद्याशक्तिं तस्मै दत्वा तिरोदधे. रावणोऽपि नवीनैरष्टो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्तरशतकाव्यैर्जिनमस्तवीत्, यथा—अनध्ययनविद्वांसो । निर्द्रव्यपरमेश्वराः ॥ अनलंकारसुभगाः । पांतु युष्मान् जिनेश्वराः ॥ १ ॥ ये देव भवतः पादौ । भवत्पादाविवाश्रिताः ॥ ते लभंतेऽद्भुतां भव्याः । श्रियं त इव शाश्वतीं ॥ २ ॥ कलेव चंद्रस्य कलंकमुक्ता । मुक्तावलीवोरुगुणप्रपन्ना ॥ जगत्त्रयस्याभिमतं दधाना । जैनेश्वरी कल्पलतेव मूर्तिः ॥ ३ ॥ एवं तीर्थनाथान्नमस्कृत्य स नित्यालोकपुरे गतः. तत्र रत्नावलीमुद्वाह्य पुनरसौ लंकायामागतः. वालिमुनिरपि निर्मलं संयमं पालयन् घनघातिकर्मक्षयतः केवलज्ञानमाप्तवान्, सुरासुरैरपि तस्य केवलमहिमा चक्रे. वालिकेवल्यपि धर्मोपदेशं ददौ, यथा—धम्मेण कुलं पत्तइ । धम्मेण य दिव्वरूअसंपत्ति ॥ धम्मेण धनसमिद्धी । धम्मेण सुविछडा कीत्ति ॥ १ ॥ धम्मेण विण जइ चिंति—आइं लप्भंति जीव सुरकाइं ॥ ता तिहुअणंमि सयले । कोवि न दुक्खिओ हुज्जा ॥ २ ॥ निर्दंतः करटी हयो गतजवश्चंद्रं विना शर्वरी । निर्गंधं कुसुमं सरो गतजलं छायाविहीनस्तरुः ॥ रूपं निर्लवणं सुतो गतगुणश्चारित्रहीनो यति—र्निर्देवं भुवनं न राजति यथा धर्मं विना मानवः ॥ ३ ॥ इत्यादिधर्मदेशनां कृत्वा सिद्धानंतचतुष्को वालिमुनिर्मोक्षमगमत्. ॥ इति वालिमुनिकथा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इतश्च वैताढ्यगिरौ ज्योतिःपुरे नगरे ज्वलनशिखनामा विद्याधराधिपोऽस्ति, तस्य श्रीमतीनाम्नी पट्टराज्ञी, तयोस्तारानाम्नी पुत्री, सा च साहसगतिनाम्ना विद्याधरेण सुग्रीवेणापि च याचिता, ततो ज्वलनशिखविद्याधरेण नैमित्तिकः पृष्टो मम पुत्री एतयोरुभयोर्मध्ये कस्य दीयते? नैमित्तिकेनोक्तं राजन्! साहसगतिरल्पायुः, सुग्रीवकपीश्वरश्च दीर्घायुरस्ति, इति नैमित्तिकेन कथितो राजा सुग्रीवाय स्वकन्यां ददौ, यथा—हरिणाक्षी गजगमना । प्रहसितवदना मनोरमा रामा ॥ सुललितवचना श्यामा । बिंबोष्ठी नव्रदीपशिखा ॥ १ ॥ ततो राज्ञा सुग्रीवेण परिणीता सा तारा, तद्वियोगार्दितः साहसगतिर्दिने दिने कृष्णपक्षशशिवत् क्षीणोऽभूत्, क्वापि रतिं न लेभे, सुग्रीवस्य तारायां रममाणस्यांगदजयानंदनामानौ द्वौ पुत्रौ बभूवतुः, यतः—पियमहिलमुहकमलं । बालमुहं धूलिधूसरच्छायं ॥ सामिमुहं सुपसन्नं । तिन्निवि पुन्नेहिं पावंति ॥ १ ॥ धनाढ्यता राजकुले च मानं। प्रियानुकूला तनयो विनीतः ॥ धर्मे मतिः सज्जनसंगतिश्च । षट् स्वर्गलोका जगतीतलेऽपि ॥ २ ॥ तौ दृष्ट्वा हर्षितः सुग्रीवः सुखेन राज्यं करोति. अथ स साहसगतिर्मन्मथोन्मथ्यमानोऽतीवकामपीडितो जातः, यतः—नैव पश्यति कामांधो । जन्मांधो नैव पश्यति ॥ न पश्यति मदोन्मत्तो । ह्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्थी दोषं न पश्यति ॥ १ ॥ मा मतिः परदारेषु । परद्रव्येषु मा मतिः ॥ परापवादिनी जिह्वा । मा-भूदेव कदाचन ॥ २ ॥ ततोऽसौ साहसगतिर्हिमवद्गिरौ गत्वा रूपपरावर्तिनीं विद्यां शिक्षयित्वा सिद्धविद्यो जातः.

इतश्च लंकानगरीतो दशाननो दिग्यात्रायै निर्गतः सर्वान्नरेंद्रान् विद्याधरांश्च साधयित्वा सर्वान् देशान् वशीकृत्य सुग्रीवादिचमूचक्रपरिवृत इंद्रंप्रति चचाल. मार्गे गच्छन् रावणो रेवानामनदीं दृष्ट्वा तस्यास्तीरे सैन्यं निवेश्य श्रीजिनपूजां करोतिस्म, यतः—जिनपूजनं विवेकः । सत्यं शौचं सुपात्रदानं च ॥ महिमक्रीडागारः । शृंगारः श्रावकत्वस्य ॥ १ ॥ पूजया भवति राजपूज्यता । पूजया भवति निर्मला मतिः ॥ पूजया भवति नाकिपूजितः । पूजया भवति निर्वृतिः क्रमात् ॥ २ ॥ सयं पमज्जणे पुण्णं । सहस्सं च विलेवणे ॥ सयसाहस्सिया माला । अणंतं गीयवाइए ॥ ३ ॥ अथ स रावणः पूजां कृत्वा स्तुतिं च विधाय नाशाग्रन्यस्तदृग्युगः पद्मासनस्थो जिनपुरतो ध्यानेनास्थात. इतस्तस्य ध्यानं कुर्वतो नद्यां जलं ववृधे, तेन वृद्धिं गतेन जलेन श्रीजिनवरेंद्राणां पूजा प्लाविता, तेन पूजापहारेण शिरश्छेदादप्यधिकदुःखितो जातकोपो रावण इत्यभ्यधात्, रे रे पश्यत

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पश्यत? केन मे पूजा विनाशिता? किं देवेन, मानवेन, रक्षसा, वानरेण वा? विलोकयित्वा तं च बध्ध्वेहानीयतां.

अथ तस्मिन् समये कश्चिद्विद्याधरो रावणं विज्ञपयति, राजन्! माहिष्मतीनाम्नी नगरी. तस्यां सहस्रांशुनामा राजास्ति, सहस्रकिरणैरिव सहस्रशो नृपैः सेव्यमानः स महाभुजो रेवायां सेतुबंधं कृत्वा तत्र सहस्रशो राज्ञीपरिवृतस्ताभी राज्ञीभिः सह जलकेलिं करोति, तेन तत्र यथेप्सितं रंत्वा जलं सेतुबंधान्मुक्तमस्ति, तेन च जलेन हे स्वामिंस्तव पूजा प्लावितास्ति, पश्यतां चैतानि तत्स्त्रीणां निर्माल्यानि. इति तद्विद्याधरवचनं श्रुत्वा रुष्टो रावणो निजराक्षसभटांस्तत्र प्रैषीत्, ते राक्षसभटा अपि तत्र गत्वा संग्रामं चक्रिरे, तैश्च सहस्रांशुनृपसैन्यं भग्नं, तदा सहस्रांशुराडधिज्यं धनुः कृत्वा धावितो राक्षसान् हक्कयामास, ततो नष्टा राक्षसाः, तावता रावणोऽपि तत्रागात्, तयोः परस्परं द्वंद्वयुद्धं लग्नं, यतः— द्वावप्यमर्षणौ द्वाव—प्यूर्जितौ द्वावपि स्थिरौ ॥ विविधैरायुधैर्युद्धं । विदधानौ चिराय तौ ॥ १ ॥ दोर्वीर्येणाविजय्यं तं । ज्ञात्वा जग्राह रावणः ॥ विद्यया मोहयित्वेन—मिव माहिष्मतीपतिं ॥ २ ॥ ततो रावणस्तं बध्ध्वा स्वस्कंधावारेऽनयत. अथ स हृष्टमना रावणसभायामु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रविष्टस्तावच्छतबाहुनामा चारणर्षिस्तत्र समाययौ. रावणोऽपि सिंहासनात्समुत्थाय तस्य साधोः पादयोर्ननाम, यतः—अवद्यमुक्ते पथि यः प्रवर्तते । प्रवर्तयत्यन्यजनं च निःस्पृहः ॥ स सेवितव्यः स्वहितैषिणा गुरुः । स्वयं तरंस्तारयितुं क्षमः परं ॥ १ ॥ विदलयति कुबोधं बोधयत्यागमार्थं । सुगतिकुगतिमार्गौ पुण्यपापे व्यनक्ति ॥ अवगमयति कृत्याकृत्यभेदं गुरुर्यो । भवजलनिधिपोतस्तं विना नास्ति कश्चित् ॥ २ ॥ एवंविधं तरणतारणसमर्थं तं साधुं ज्ञात्वा स ववंदे, मुनिरपि तस्य रावणस्य धर्मलाभाशिषमदात्, ततो रावणो बद्धांजलिपुटो मुनिमवोचत्, भो साधो किमागमनकारणं? उच्यतां, मुनिनापि धर्मोपदेशो दत्तो यथा—काया हंसविना नदी जलविना दाताविना याचकाः । भ्राता स्नेहविना फलं ऋतुविना धेनुश्च दुग्धंविना ॥ भार्या भक्तिविना पुरं विभुविना वृक्षश्च पत्रं विना । दीपस्तैलविना निशा शशिविना पुण्यं विना मानवाः ॥ १ ॥ विलंबो नैव कर्तव्य । आयुर्याति दिने दिने ॥ न करोति यमः क्षांतिं । धर्मस्य त्वरिता गतिः ॥ २ ॥ इत्यादिधर्मदेशनां दत्वा मुनिरूचे, हे रावणराजेंद्र! श्रूयतां?—

माहिष्मत्यां नगर्यां शतबाहुनामाहं राजाभवं, भवभयाद्विरक्तोऽहं सहस्रकिरणे पुत्रे राज्यभारो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्य मोक्षाध्वस्यंदनप्रायं व्रतमशिश्रियं., इत्यर्थोक्ते दशग्रीवो । नमस्कृत्य तमब्रवीत् ॥ किमसौ पूज्यपादाना—मंगजन्मा महानुजः ॥ १ ॥ आमेति मुनिनोक्ते रावणो जगाद. स्वामिन् दिग्विजयक्रमेणेह नदीतटे वासं विधाय मया जिनपूजा कृता. सा चामुना मुक्तेन वारिणा पूजा प्लाविता, तेन च मया तस्योपरि कोपः कृतः, मुनेरग्रे इत्युक्त्वा रावणस्तत्क्षणादेव सहस्रांशुमाकार्य लज्जानम्राननं तमेवमुवाच, भो महासत्व! त्वं मे भ्राता, साधुवरश्चायं मम पिता, अथ त्वं स्वेच्छया रमस्व, गच्छ च स्वराज्ये, सहस्रांशुनोक्तं राज्येनाथ मे कार्यं नास्ति, अहमपि व्रतमेव श्रयिष्यामीत्युक्त्वा अनरण्यनाम स्वतनयं दशास्याय समर्प्य स पितृपादांते व्रतमग्रहीत. रावणोऽपि तौ शतबाहुसहस्रांशुमुनी नत्वा तत्पुत्रेऽनरण्ये राज्यं दत्वेंऽप्रत्यंबरे चचाल. इति शतबाहुपुत्रसहस्रांशुकथा समाप्ता ॥

अथ रावणस्यांबरे गच्छतो यष्टिमुष्ट्यादिप्रहारजर्जरो नारदमुनिः पश्चादागत्य बभाषे, भो राजेंद्र! श्रूयतां? राजपुरे नगरे मरुन्नाम्ना मिथ्यादृष्टिनृपतिना यज्ञः प्रारब्धोऽस्ति, तत्र वधाय तेन बहवश्छागाः समानीताः संति, आकाशादवतीर्य मया तस्मै प्रोक्तं भो मरुन्नृप! त्वं हिंसां मा कुरु? यज्ञे छागान्मा मारय? मरुदूचे भो नारद! अयं पशुवधादिमहाधर्मः शास्त्रोक्तः स्वर्गहेतवे भवति,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मयोक्तं यज्ञेऽजैर्यष्टव्यमित्यत्राजा इति त्रिवार्षिका व्रीहयो, न तु छागाः, ततस्तस्याहमित्याख्यं । वपुर्वदी ह्युदीरिता ॥ आत्मा यष्टा तपोवह्नि—र्ज्ञानं सर्पिः प्रकीर्तितं ॥ १ ॥ कर्माणि समिधः क्रोधा—दयस्तु पशवो मताः ॥ सत्यं यूपः समप्राणि—रक्षणं दक्षिणा पुनः ॥ २ ॥ रत्नत्रयी त्रिवेदीय—मिति वेदोदितः क्रतुः ॥ कृतो योगविशेषेण । मुक्तेर्भवति साधनं ॥ ३ ॥ अतो भो राजंस्त्वं छागवधान्निवर्तय? इदं मम वचनं श्रुत्वा क्रोधारुणलोचना विप्रा मां हंतुमधावंत, तैश्च यष्टिमुष्ट्यादिभिर्भृशं हतोऽहमिहागमं. तत् श्रुत्वा रावणस्तत्र गत्वा मरुदृनृपालं यज्ञवधान्निषिध्य सर्वज्ञोक्तं धर्मं समादिशत्. ततो हृष्टाः सर्वेऽपि नृपाला अहिंसामयं धर्मं प्रतिपेदिरे. अथ रावणो नारदंप्रत्युवाच, भो नारद! पशुवधोपेता यज्ञाः केनोपदिष्टाः? नारद उवाच—

शुक्तिमती नाम नगर्यस्ति, तस्यामभिचंद्रो नाम राजा, तस्य पुत्रो वसुनामा, पुनस्तस्यां नगर्यां क्षीरकदंबकनामा विप्रः, तस्य पुत्रः पर्वतकनामा, प्राघूर्णको नारदश्चाहं. एते त्रयोऽपि क्षीरकदंबकोपाध्यायांतिके पठंतिस्म, उपाध्यायस्त्रीनपि वसुपर्वतकनारदान् पाठयति. अथैकस्मिन् दिने पाठखेदश्रांतास्ते त्रयोऽपि सुप्ताः, इत आकाशे चारणर्षियुग्मं यातिस्म, तयोर्मध्यादेको ज्ञानवान-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परंप्रत्युवाच, एतेषां त्रयाणां मध्यादेकः शिवंगमी, द्वौ च नरके यास्यतः, इति च श्रुतमुपाध्यायेन ध्यानवता, ततस्तेन चिंतितं, मया पाठितौ द्वौ यदि नरकं यास्यतस्तदा सृतं पाठनेन, परं परीक्षां करोमि, यत्कौ नरकं यास्यतः, कश्च मोक्षं यास्यतीति विमृश्य तेन त्रयः पिष्टमयाः कुर्कुटाः कृताः, तेषां त्रयाणां तांश्च दत्वेत्यवोचत. यत्र कोऽपि न पश्यति, तत्रेमे हंतव्याः. ततो विजने गत्वा पर्वतकेन स हतः, तथैव वसुनापि स हतः, नारदेन चिंतितं, कुत्र विजने गत्वायं हन्यते? एते पक्षिणः पश्यंति, देवा अपि पश्यंति, तर्हि तत्स्थानं नास्ति, यत्र कोऽपि न पश्यति, हुं ज्ञातं गुरुणोक्तं, न हंतव्य एवायमिति. ततो नारदेनागत्य स कुर्कुटो गुरोरग्रे मुक्तः, गुरुणोक्तं कथं कुर्कुटो न हतः? नारदेनोक्तं भगवन्! तत्स्थानं नास्ति यत्र कोऽपि न पश्यतीति ज्ञात्वा मया कुर्कुटो न मारितः, गुरुणा ज्ञातमेष शिवंगमीति वैराग्यात्तेन साधुसमीपे दीक्षा गृहीता, अभिचंद्रेण राज्ञापि वसुपुत्राय राज्यं दत्वा दीक्षा गृहीता, तदनु क्षीरकदंबकोपाध्यायपदे तत्पुत्रः पर्वतकोऽभूत, अभिचंद्रराज्ये च तत्पुत्रो वसुनामाभूत. अहं तु तदनु स्वग्रामे गतः.

इतश्च वसुराज्ञे केनचित्स्फटिकशिला दत्ता, तदुपरि सिंहासने उपविशतो राज्ञ इति प्रसि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्विजाता, वसुराजस्य महासत्यवादिनः सिंहासनमाकाशे तिष्ठतीति. तया प्रसिद्ध्या च सर्वेऽपि रा·
जानस्तस्य वशवर्तिनो जाताः, एवं स सुखेन राज्यं करोति. अथैकस्मिन् दिनेऽहं शुक्तिमत्यां पर्व·
तकगृहे गतवान्, तत्र स सभामध्ये व्याख्याने क्रियमाणे एवं व्याख्यानं करोतिस्म. अजैर्यष्टव्य·
मित्यत्राजशब्देन छागास्तैर्होतव्यमिति. तदा मयोक्तं भो बंधो त्वमेवंविधं व्याख्यानं मा कुरु? अ·
जशब्देन त्रिवर्षजीर्णा व्रीहयो, न तु छागाः, पर्वतकेनोक्तमजशब्देन पशवो, न तु व्रीहयः, एवं
विवादं कुर्वतोस्तयोर्मध्यात्पर्वतकेनोक्तं यदि मदुक्तमसत्यं भवेत्तदा मम जिह्वा यातु, मयोक्तं यदि
मे वचोऽसत्यं भवेत्तदा मम शिरो यातु, परमत्रार्थे कः साक्षी? तत उभाभ्यामुक्तमत्रार्थे आवयोः
सहाध्यायी वसुराजा साक्षी भवतु, इति निश्चित्य सभा विसृष्टा. अथ गृहांतर्गते पर्वतके मात्रा प्रो·
क्तं भो पुत्र! त्वज्जनकेनाजशब्देन त्रिवर्षजीर्णव्रीहय उक्ताः, न तु छागाः, त्वयैतदसत्यं प्ररूपितं,
पुत्रेणोक्तं मातर्यदुक्तं तदुक्तमेव, अथ त्वं राज्ञोऽग्रे गत्वा कथय? यथा मे जीवितं भवति, अन्य·
था मम जीवितं नास्ति. ततः क्षीरकदंबकोपाध्यायपत्नी वसुराट्समीपे गत्वोवाच भो राजेंद्र! तवा·
ग्रेऽहं किंचित्प्रार्थयामि, राज्ञोक्तं मातः प्रार्थय? ततस्तया प्रोक्तं राजेंद्र! मह्यं पुत्रभिक्षां देहि? इ·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्युक्त्वा तथा नारदपर्वतकविवादः प्रोक्तः, तदा वसुराज्ञोक्तं हे मातर्नारदोक्तं सत्यमस्ति, तव पुत्रोक्तं त्वसत्यमस्ति, ततोऽहमसत्यं कथं ब्रुवे? यतः—असत्यमप्रत्ययमूलकारणं । कुवासनासद्म समृद्धिवारणं ॥ विपन्निदानं परवंचनोर्जितं । कृतापराधं कृतिभिर्विवर्जितं ॥ १ ॥ यशो यस्माद्भस्मीभवति दववह्नेरिव वनं । निदानं दुःखानां यदवनिरुहाणां जलमिव ॥ न यत्र स्याच्छायातप इव तपःसंयमकथा । कथंचित्तन्मिथ्यावचनमभिधत्ते न मतिमान् ॥ २ ॥ एवं हे मातरहं जानन्नपि कथं कूटसाक्ष्यं ब्रुवे? तदोपाध्यायपत्न्योक्तं राजन् ममोपरोधेनापि ब्रूहि? ततः प्रतिपन्नं राज्ञा.

अथ प्रभाते नारदपर्वतकौ चान्येऽपि बहवो लोका राजसभायां समाजग्मुः, उभाभ्यां पृष्टं राजन् क्षीरकदंबकोपाध्यायेनाजशब्दस्य कोऽर्थः कथितः? तदा परलोकभयमजानता वसुराज्ञा ह्यविचार्योक्तमजशब्देन छागा उच्यंते, न तु व्रीहय इति. ततः पर्वतकपक्षं राज्ञा कृतं दृष्ट्वा बाढस्वरेण नारदोऽवोचत, भो देवा असत्यवादिनमेनं वसुनृपं शिक्षयत? तदैव वसुभूपालः । पातितो ह्यासनाद् द्रुतं ॥ राज्याधिष्ठायिकादेव्या । क्रुद्धयाऽसत्यवाक्यतः ॥ १ ॥ देवताभिरसत्योक्ति—कुपिताभिर्निपातितः ॥ जगाम नरकं घोरं । नरनाथो वसुस्ततः ॥ २ ॥ ततस्तस्य पृथुवसु १ चित्रवसु २

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वासवः ३ शक्रो ४ चित्रावसु ५ विश्वावसुः ६ सूरो ७ महाशूरश्च ८ इति क्रमेण पितृपदे स्थिताः पुत्रास्तथैव मिथ्याप्ररूपणाद्देवतया हता मृत्वा सर्वेऽपि नरकं गताः. सुवसुर्नवमः पुत्रो । नष्ट्वा नागपुरं ययौ ॥ बृहध्ध्वजो वसुसूनु—र्दशमो मथुरां ययौ ॥ १ ॥ पर्वतकोऽपि नगरलोकैर्नगर्या निष्कासितो महाकालपुत्रेण संगृहीतः. ॥ इति पर्वतकवसुराजकथा ॥

अथ रावणेन महाकालकथां पृष्टो नारद उवाच—चारणयुगलं नाम नगरं, तत्रायोधननामा राजा, तस्य दितिनाम्नी राज्ञी, तयोः सुलसाभिधाना पुत्री. अथैकदा राज्ञायोधनेन तस्याः स्वयंवरः प्रारब्धः, तत्र तेनाहूता अनेके राजानः समागताः, तेषु मध्ये सागराख्यो राजाधिकं शोभते. तस्य मंदोदर्याख्या प्रतिहारी तदाज्ञया प्रत्यहमयोधननृपावासे याति. अथैकस्मिन् दिने तया मंदोदर्या कदलीवनमध्यस्थितया दितिसुलसयोर्वचनमश्रावि यथा—ऋषभस्वामिपुत्रौ भरतबाहुबली, तयोराद्यौ पुत्रावादित्ययशःसोमयशसौ चाभूतां, सोमवंशे मम भ्राता तृणबिंदुनामा, सूर्यवंशे च तव पितायमयोधननामास्ति, अयोधनस्वसा सत्ययशानाम्नी तृणबिंदुराज्ञे दत्तास्ति, तयोः पुत्रो मधुपिंगलनामा मम भ्रातृसुतोऽस्ति, अहं त्वां तस्मै दीयमानामिच्छामि, अनस्त्वया तत्कंठे वरमाला क्षेप्या,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति शिक्षां दत्वा जननी स्वस्थानं गता, पुत्र्यपि च स्वस्थानं गता. एतद्वचो मंदोदर्या सागरराज्ञे निवेदितं, सागरनृभुजा च तन्निजपुरोहिताग्रे कथितं, पुरोहितेन चैकं नवीनं शास्त्रं रचितं. तस्मिन् शास्त्रे तेन सागरगुणा मधुपिंगलावगुणाश्च वर्णिताः, ततः स्वयंवरदिनादर्वागेकस्मिन् दिने तेन तच्छास्त्रं सभायां वाचयितुमारब्धं, तत् श्रुत्वा तया कन्यया स सागरो वृतः, मधुपिंगलश्च निर्घाटितः, तदपमानान्मधुपिंगलो तापसीभूय बालतपः कृत्वा मृत्वा च व्यंतरेषु महाकालनामा षष्टिवर्षसहस्रायुः सुरो जातः, तत्रावधिज्ञानेन तेन पूर्वकृतं सागरचेष्टितं ज्ञातं, ततस्तस्य सागरोपरि महान् द्वेषः समुत्पन्नः, ततस्तेन चिंतितमथाहं सर्वानपि मम द्वेषिणो हन्मि. ततस्तेन शुक्तिमत्यां नगर्यां स पर्वतको दृष्टः, ततः स सुरो विप्रवेषं कृत्वा शांडिल्लनामाहं त्वत्पितुः सुहृदोऽस्मीत्युक्त्वा तस्य मिलितः, ततस्तयोर्द्वयोः परस्परं मैत्री जाता, शांडिल्लविप्रेणोक्तं भो पर्वतक! त्वं पशुवधादियुतान् यागान् प्ररूपय? अहं च त्वत्पक्षं करिष्यामि, विद्यया मनोऽभीष्टं च करिष्ये, एवं सर्वेषां विशेषतश्च सागरस्य दुर्गतौ पातनाय तेनायमुपायः कृतः.

ततस्तेन देवेन देशमध्ये मारिर्विकुर्विता, अनेकशो व्याधिरोगाश्चोत्पादिताः, ततो देवेना-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काशवाणी कृता यद्यः पर्वतोक्तं करिष्यति स एव रोगान्मुक्तो भविष्यति. ततः पर्वतकेन पशुवधो- पेता यागाः प्ररूपिताः, कथितं च यः पशुवधोपेतं यागं करिष्यति तस्य समाधिर्भविष्यति, लोका अप्येवं कर्तुं लग्नाः, देवोऽपि तेषां समाधिं कृतवान्, बहिर्मुखा लोकाः किमपि तत्वं न जानंति, एकेन कृतं सर्वेऽपि कुर्वंति, यतः—गतानुगतिको लोको । न लोकः पारमार्थिकः ॥ शोको राजकु- ले सर्वे । कुंतकृन्मदने मृते ॥ १ ॥ एवं पर्वतकेन जीवहिंसारूपा यागाः प्ररूपिताः, महाकालदेवे- न च वृद्धिं नीताः, यथा—मातृमेधे वधो मातुः । पितृमेधे वधः पितुः ॥ अंतर्यज्ञं विधानज्ञ्यो । दोषस्तत्र न विद्यते ॥ १ ॥ इत्यादि समुपदिश्य सागरं स्वमते संस्थाप्यानेकान् यागान् काराप्य त- स्य तेन समृद्धिर्दत्ता. ततः सप्रत्ययो लोकः । प्राणिहिंसादिकान्मखान् ॥ निःशंकमकरोत्तस्य । प- र्वतस्य मते स्थितः ॥ १ ॥ सुलसासागरपुत्रेणानेके यज्ञाः कृताः, अजमेधे यज्ञे तेनाजा हूताः, देवेन च ते जीवापिताः, एवमश्वमेधे तेनाश्वा हूतास्तेऽपि तेन जीवापिताः, मातृपितृमेधे स सु- लसासागरौ जुहाव, यतः—सागरं सुलसायुक्तं । स जुहावाध्वरानले ॥ कृतकृत्यो जगामाथ । म- हाकालः स्वमाश्रयं ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं पर्वताद्यागाः प्रवर्तिताः, महाकालेन च विवर्धिताः, ततः स पर्वतको मृत्वा नरकं गतः. अथ ते यागा हिंसात्मकतया मया निषिद्धाः, परं ते विप्रा न मानयंति, तैश्च मम प्रहारा दत्ताः, अतस्त्वं तान् यागान्निषेधय? ततो रावणेन तत्रागत्य स मरुन्नृपो यागान्निषिद्धः. इति महाकालसुरकथा. ॥ अथास्यैव नारदस्योत्पत्तिः कथ्यते—रावण उवाच भो मरुन्नृप! श्रूयतां? ब्रह्मरुचिर्नामा द्विज आसीत, तेन तापसीदीक्षा गृहीता, ततस्तेन कूर्मा नाम्नी भार्या कृता, तेन सह भोगाननुभवंती सा गुर्विण्यभूत. इतस्तत्र साधवः समागताः, तेष्वेकः साधुरब्रवीत्, भो ब्रह्मरुचिद्विजर्षे! त्वया किमेतदारब्धं? भवभीत्या गृहवासं त्यक्त्वा पुनर्गृहवासः कथं मंडितः, तत् श्रुत्वा ब्रह्मरुचिना जैनी दीक्षा गृहीता, सा तस्य भार्या कूर्मानाम्नी च श्राविका जाता, तत्राश्रमे वसंत्या तया पुत्रः सुषुवे नारदनामा, तद्रोदनादिना विह्वलीभूता माता तं तत्र पृथ्वीतले मुक्त्वा कुत्रचिद्गता, तावता जृंभकामरैः स नारदोऽपजह्रे. तद्वियोगार्दिता कूर्मा साध्व्यंतिके प्राव्राजीत्, ते देवाश्च नारदं पालयामासुः, शास्त्राण्यध्यापयंतिस्म, क्रमेण रोहिण्यादिविद्याः शिक्षितः स साध्वंतिकेऽणुव्रतधरो जातः, यौवनं प्राप्तोऽपि स न विषयाभिलाषी. शिखाधरोऽसौ न गृहस्थो न संयतश्च. स कुतूहली

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कलहप्रियो मुखरो देवैः संवर्धितत्वाच्च देवर्षिरित्युच्यते, किंच प्रायेण स स्वेच्छाचारी ब्रह्मचारी च विश्रुतः. इति रावणोक्तां वार्ता श्रुत्वा हर्षितौ मरुन्नारदश्च. इति नारदोत्पत्तिकथानकं ॥

ततो मरुद्राजोऽपि स्वां कन्यां कनकप्रभां रावणाय ददौ, दशास्योऽपि तामुद्वाह्य तया सह तत्र रेमे. रावणस्ततोऽपि मथुरां नगरीं जगाम, तत्र हरिवाहनो नृपो मधुपुत्रेण सहितस्तस्य सन्मुखमागात्. त्रिशूलेन सहितो यथेशानेंद्रस्तथा शूलेन सहितो हरिवाहनपुत्रो मधुरपि शोभते. तं शूलिनं दृष्ट्वा रावणोऽपृच्छत् भो मधुशूलिन् भवता शूलं कुतो लब्धं? ततो हरिवाहनः पुत्रंप्रत्यूचे हे पुत्र! स्ववृत्तांतं कथय? ततो मधुरूचे हे रावणराजेंद्र! श्रूयतां? इदमायुधं प्राग्जन्मसुहृच्चमरेंद्रेण मह्यमर्पितमस्ति, इत्युक्त्वा स तत्कथां कथयति यथा—धातकीखंडे द्वीपे ऐरवतक्षेत्रे शतद्वारपुरे नगरे सुमित्रनामा राजपुत्रोऽभूत, तस्य प्रभवनामा सेवकः, तावुभौ मित्रे अभूतां वसंतमदनाविव. एकस्य कलाचार्यस्य समीपे तौ कला जगृहतुः, एवं सुखेन दिनान्यतिवाहयतोस्तयोः कालो याति. उद्यौवनः स सुमित्रकुमारः पित्रा राज्ये स्थापितः. तेन च राज्ञा स प्रभवसेवको ग्रामाकरादिप्रदानेनात्मसदृशः कृतः. अथैकस्मिन् दिने स राजा तेन मित्रेण सहाटव्यां गतः, तत्र स

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भीमपल्लीपतेः पुत्रीं दृष्ट्वा तस्यां मोहितोऽभूत्, ततो नृपप्रार्थनया भीमपल्लीपतिना सा निजपुत्री वनमाला तस्मै दत्ता, राजा तामुद्वाह्य निजनगरे समागतस्तया सह भोगान् बुभुजे.

अथैकस्मिन् दिने सा वनमाला प्रभवमित्रेण दृष्टा, तया सह रंतुकामोऽसौ दिने दिने कृशो बभूव, यतः—चिंतातुराणां न सुखं न निद्रा । अर्थातुराणां न सुहृन्न बंधुः ॥ कामातुराणां न भयं न लज्जा । क्षुधातुराणां न बलं न तेजः ॥ १ ॥ दत्तस्तेन जगत्यकीर्तिपटहो गोत्रे मषीकूर्चकश्चारित्रस्य जलांजलिर्गुणगणारामस्य दावानलः ॥ संकेतः सकलापदां शिवपुरद्वारे कपाटो दृढः । शीलं येन निजं विलुप्तमखिलं त्रैलोक्यचिंतामणिः ॥ २ ॥ अथैकस्मिन् दिने तं प्रभवमेवंविधं कृशं दृष्ट्वा राज्ञा प्रोक्तं, भो प्रभव! त्वं किं दुर्बलोऽसि? किं बाधते? कथय? परं स न कथयति, राज्ञा पुनः पृष्टं भो मित्र! तव किं बाधते? एवं राज्ञा पुनः पुनः पृष्टे तेन सत्यमुक्तं राजन्! मम वनमालारागो बाधते, एतच्च मे दौर्बल्यकारणं. तत् श्रुत्वा राजा प्रोचे, रे मित्र! त्वदर्थे राज्यमपि त्यजामि, तर्हि वनमालायाः किं? वनमाला मया तुभ्यं दत्ता, त्वमेनां गृहाण? तया सह च त्वं स्वेच्छया रमस्व? भोगांश्च भुंक्ष्व? ततो राज्ञा प्रेषिता सापि निशामुखे प्रभवपार्श्वे गता, तत्र गत्वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तयोक्तं जो प्रजव! त्वदर्थं प्रेषिताहं, अतस्त्वं मया सह रमस्व? राजापि तदनुगतो गुप्तं सर्वं पश्यति शृणोति च. अथ प्रजवो बनाषे यथा—बनाषे प्रजवोऽप्येवं । धिग्धिग्मां निरपत्रपं ॥ अहो स तु महासत्वो । यस्येदृक् सौहृदं मयि ॥ १ ॥ प्राणा अपि हि दीयंते । परस्मै न पुनः प्रिया ॥ इति दुःकरमेतद्धि । कृतं तेनाद्य मत्कृते ॥ २ ॥ ततो मनसि लज्जितः स चिंतयति, अरे मया किं कृतं? राज्ञोऽग्रे किमुक्तं? धिग्मां कामांधं निर्लज्जं परस्त्रीगमनतत्परं, यतः—चत्वारो नरकद्वाराः । प्रथमं रात्रिनोजनं ॥ परस्त्रीगमनं चैव । संधानानंतकायकं ॥ १ ॥

इति विचार्य तेन राज्ञी विसृष्टा, कथितं च हे मातस्त्वं स्वस्थानं गछ? त्वं मम मातासि, अहं च तव पुत्रोऽस्मीत्युक्त्वा स तस्याः पादयोरपतत्, विसृष्टा वनमाला, तदनंतरं प्रजवोऽपि खड्गेन स्वशिरश्छेत्तुमारेभे, तदा राज्ञा प्रकटीनूय जणितं हे मित्र त्वं मा साहसं कुरु? इत्युक्त्वा तेन तस्य कृपाण उद्दालितः, ततः प्रजवोऽधोमुखो लज्जया वसुधां विशन्निवास्थात्, कथंचन सुमित्रेण च स स्वस्थावस्थामानीतः, ततस्तौ द्वावपि स्नेहपरायणौ राज्यं चक्रतुः. सुमित्रश्चांते दीक्षां लात्वेशानदेवलोके सुरोऽनवत्, ततश्च्युत्वा मथुरानगर्यां हरिवाहनराज्ञो माधवीपट्टराज्ञीकुक्ष्यां स मधुनामा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुत्रोऽभवत. प्रभवोऽपि भवं भ्रांत्वा वसुप्रियविप्रस्य ज्योतिर्मत्यां पत्न्यां श्रीकुमारनामा पुत्रोऽभवत्, स श्रीकुमारः सनिदानं तपो विधाय काले च विपद्य चमरेंद्रोऽभूत. त्वं मम पूर्वभवसुहृदित्याख्याय तेन चमरेंद्रेण मे शूलप्रहरणं दत्तं, एतच्च द्विसहस्रयोजनं गत्वा कार्यं कृत्वा निवर्तते. इति श्रुत्वा रावणोऽपि तं मधुकुमारं भक्तिमंतं शक्तिमंतं च ज्ञात्वा स्वां पुत्रीं मनोरमां ददौ. इति मधुकथा ॥

अथ लंकाप्रयाणादनंतरमष्टादशसु वर्षेषु गतेषु रावणो मेरुपर्वते पांडुकवने चैत्यान्यर्चितुं गतः, तत्र रावणो जिनपूजां करोति, यतः—पापं लुंपति दुर्गतिं दलयति व्यापादयत्यापदं । पुण्यं संचिनुते श्रियं वितनुते पुष्णाति नीरोगतां ॥ सौभाग्यं विदधाति पल्लवयति प्रीतिं प्रसूते यशः । स्वर्गं यच्छति निर्वृतिं च रचयत्यर्चार्हतां निर्मिता ॥ १ ॥ तत्र पूजां कृत्वारात्रिकमंगलप्रदीपगीतनृत्यवादित्रस्तुतिस्तोत्रादिकं कृत्वा हर्षितो दशाननस्तत्रैवास्थात. तत्र स्थितेन रावणेन दुर्लंघ्यनगरेंद्रमिंद्रदिक्पालं नलकूबरं ग्रहीतुं कुंभकर्णः प्रेषितः, कुंभकर्णोऽपि रावणाज्ञया सैन्यपरिवृतस्तत्र ययौ. नलकूबरोऽपि दुर्लंघ्यनगरे आशालीविद्यया योजनशतप्रमाणं वह्निमयं वप्रं व्यधात, तन्मध्ये स्थितश्च स कुंभकर्णेन सह युद्धं करोति, तेन कुंभकर्णस्तन्नगरं ग्रहीतुं न शक्नोति, ततः कुंभकर्णस्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्नगरं जंबूद्वीपं समुद्र इव परिवेष्ट्य स्थितः, ततः कुंनकर्णनरैर्गत्वा दशास्याय विज्ञप्तं हे देव! दुर्लंघ्यनगरं नूनं दुर्लंघ्यमस्ति, कुंनकर्णादिनिश्च तन्न ग्रहीतुं शक्यते. ततो रावणस्तत्रागात्, दृष्टं च तन्नगरं नामतः परिणामतश्च डुर्लंघ्यं.

अथ सबांधवो रावणश्चिंतयति, किं करिष्यते? नगरं च कथं गृहीष्यते? इति चिंतां प्रपन्नः, अत्र नाग्यं प्रधानं, यतः—नैवाकृतिः फलति नैव कुलं न शीलं । विद्यापि नैव न च यत्नकृतापि सेवा ॥ नाग्यानि पूर्वतपसा किल संचितानि । काले फलंति पुरुषस्य यथेह वृक्षाः ॥ १ ॥ अघटितघटितानि घटयति । सुघटितघटितानि जर्जरीकुरुते ॥ विधिरेव तानि जनयति । यानि पुमान्नैव चिंतयति ॥ २ ॥ एवं रावणे चिंतामग्ने सति नलकूबरपत्न्या दूतिका प्रेषिता, तया दूतिकयागत्य रावणंप्रत्येवमुक्तं, हे नाथ! रंना नाम्नी नलकूबरपत्नी त्वां रिरंसते, त्वामेव स्मरंती त्वद्गुणैर्हतमानसा वर्तते, अतस्त्वमेनामंगीकुरु? तयांगीकृतया तवायं वप्रो वशीनविष्यति, इदं नगरं च तव दासिष्यति, सुदर्शनचक्रमपि तव सेवां करिष्यति, अतस्त्वं तामंगीकुरु? तया वशवर्तिन्या च राज्यमपि तवायत्तं नविष्यति. तस्मिन् समये रावणेन बिनीषणस्य मुखं विलोकितं, तदा दासींप्रति बि·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भीषणेनोक्तं, यत्त्वया प्रोक्तं तत्सर्वं रावणः करिष्यति, त्वं व्रज? तव स्वामिन्यग्रे च कथय? सा गता. ततो रावणो बिभीषणं बभाषे, रे बांधव! त्वया कुलविरुद्धमिदं किं प्रतिपन्नं? अस्मत्कुले केनाप्येवं कृतं नास्ति, त्वया चैवंविधवचसा कुलं कलंकितं. ततो बिभीषणो बभाषे, हे बांधव! हे राजेंद्र! त्वं मां प्रसीद? वाङ्मात्रेण कलंको न भवति, अतस्त्वमेतस्या विद्यां लात्वा, ततो वचोयुक्त्या तां परित्यजेः. येन केनाप्युपायेन बुधः स्वार्थं साधयेत, यतः—अपमानं पुरस्कृत्य । मानं कृत्वा च पृष्टतः ॥ स्वार्थमालंबयेत्प्राज्ञः । स्वार्थभ्रंशो हि मूर्खता ॥ १ ॥

इति विचार्य रावणस्तूष्णीको बभूव, तावत्तत्रागता रंभा तत्परिरंभलंपटा रावणेन दृष्टा यथा—तन्वी श्यामा प्रवरदशना पक्वबिंबाधरोष्टी । मध्येक्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ॥ श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां । या तत्र स्याद्युवतीविषये सृष्टिराद्यैव धातुः ॥ १ ॥ ततो दशास्येन सासने उपावेशिता, प्रार्थितं च, भो सुंदरि! आशालीविद्यां मह्यं देहि? तयापि च तत्क्षणं साशालीविद्या दत्ता, सिद्धविद्यो रावणो दुर्लंघ्यनगरमध्ये गतः, आशालीविद्यया वेष्टितं तन्नगरं मुत्कलीभूतं, नलकूबरोऽपि संग्रामाय निर्गतः. द्वयोः सैन्ययोः संग्रामो लग्नः, नलकूबरद्विसानि

For Private And Personal Use Only

शस्त्राणि व्यंतराधिष्टितरावणसैन्ये न प्रजवंति, नलकूबरसैन्यं जग्नं, ततो बिजीषण जत्तस्थौ, तयोः संग्रामोऽजूत्, बिजीषणेन नलकूबरोऽग्राहि, तत्र रावणेन सुदर्शनचक्रं प्राप्तं, यतः—देवासुरैरप्यजय्यं । शक्रसंबंधि दुर्धरं ॥ चक्रं सुदर्शनं नाम । तत्र प्राप च रावणः ॥ १ ॥ ततो बिजीषणो नलकूबरं रावणंप्रत्यानिनाय, रावणेन तद्दुर्लंघ्यपुरं पुनस्तस्मै दत्तं, तत्र च स राज्ये स्थापितः. अथ रावणंप्रति सा रंजोवाच, हे नाथ! त्वं मामंगीकुरु? त्वं मम प्राणनाथोऽसि, अहं च तव प्राणप्रियास्मि, रावण जवाच जद्रे त्वं निजजर्तारं जजस्व? जनयकुलविशुद्धा त्वं मा निजकुलं कलंकय? अन्यच्च त्वं मम विद्यादानाद्गुरुस्थानेऽसि, अन्यामपि परस्त्रियमहं स्वमातृतुल्यां पश्यामि, इत्युक्त्वा तां पुनर्नलकूबरजूपतेरर्पयामास नादूषितामखंमितशीलां रावणः. अहो स्त्रीचरित्रं! यतः—नाग्निस्तृप्यति काष्ठानां । नापगानां महोदधिः ॥ नांतकः सर्वजूतानां । न पुंसां वामलोचनाः ॥ १ ॥ अहो स्त्रीचित्तं वेश्याकटाक्षवद्विद्युल्लताविलासवत् संध्यारुणाभ्रवत् वातांदोलिततूलवत पवनप्रेंखोलितध्वजाग्रवत् सज्जनकोपवत् दुर्जनमैत्रीवत् वेश्यास्नेहवत् गिरिनदीवेगवत् गजकर्णवत् शरत्कालमेघवत् इंद्रचापवत् कांदिशीकनयनमेषोन्मेषवत् हरिद्रारागवत् इंद्रजालवत् वायुवेगवत् मर्कटचेष्टितवत् प्रा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णिजीवितवत् कुशाग्रजलबिंदुवच्च चंचलमस्ति. शास्त्रं सुनिश्चितधिया परिचिंतनीय—माराधितोऽपि नृपतिः परिशंकनीयः ॥ अंके स्थितापि युवतिः परिरक्षणीया । शास्त्रे नृपे च युवतौ च कुतः स्थिरत्वं ॥ १ ॥ इति नलकूबरपत्नीरंभाकथा ॥

ततो रावण इंद्रंप्रति चलितः, नलकूबरोऽपि तदनु चलितः. अथ रावणमायांतं श्रुत्वा भीतः सहस्रारः स्नेहपूर्वमिंद्रंप्रत्यभाषत, हे पुत्र! त्वयैकेनापि सुपुत्रेण मम कुलमुद्योतितं. अन्यवंशोन्नतिं हत्वा स्ववंशोन्नतिश्च कृता, तेन च सर्वेभ्यो विद्याधरनरेंद्रेभ्योऽहमोजस्वीत्यहंकारं मा कुथाः, यतः—लंघितोऽस्त्यधुना वीरः । सर्ववीरत्वतस्करः ॥ प्रतापेन सहस्रांशु—सहस्रांशुनियंत्रकः ॥ १ ॥ हेलोत्पाटितकैलाशो । मरुत्प्रमुखभंजनः ॥ जंबूद्वीपेशयक्षेंद्र—णाप्यक्षोभितमानसः ॥ २ ॥ भपार्हन्निजदोर्वीणा—गीततोषितचेतसः ॥ धरणेंद्रादमोघास्त—शक्तिः शक्तिशयोर्जितः ॥ ३ ॥ भ्रातृभ्यां स्वानुरूपाभ्यां । स्वस्रुजाभ्यामिवोत्कटः ॥ रावणो नाम लंकेशः । सुकेशिकुलभास्करः ॥ ४ ॥ चतुर्भिः कलापकं ॥ येन स यमो हेलया जितः, वैश्रवणश्च सेवकोऽकारि, वालिसोदरः सुग्रीवः पत्नीचक्रे, येन दुर्लंघ्यप्राकारं जित्वा दुर्लंघ्यपुरमेत्य तवानुजो नलकूबरो बध्ध्वा जगृहे. अतो हे पुत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वं तं रावणं प्रणिपातसुधावृष्ट्या शमय? पुनः स्वीयां रूपवतीं सुतां तस्मै प्रयच्छ? एवं च रावणेन सह संधिं विधेहि? इति सहस्रारपितुर्वचः श्रुत्वेंद्र उवाच, हे तातास्मै वध्याय स्वकन्या कथं दीयते? अनेन सह कः संधिः! कोऽयमनेन किं भविष्यति? किं करिष्यत्ययं वराकः? किंचैभी राक्षसैः सहास्माकं किमाधुनिकं वैरमस्ति? सर्वदैव सर्वेऽपि राक्षसा अस्माकं शत्रव एव, अतस्त्वं स्नेहतः कातरो माभूः, धैर्यं चाश्रय? स्वसूनोरस्य मे पराक्रमं किं त्वं न वेत्सि? एवं तयोर्वार्तयतोरेव रथनूपुरनगरं रावणचमूभिर्वेष्टितं.

ततो राजनीतिं स्मरता रावणेन पूर्वं दूतः प्रेषितः, तेन दूतेन च गत्वेंद्रराज्ञोऽग्रे विज्ञप्तं, हे इंद्रराजेंद्र! ये केचन राजानो वर्तंते तैः सर्वैरप्युपायनानि दत्वा दशकंधरः पूजितोऽस्ति, त्वमपि स्वां पुत्रीं रूपवतीं दत्वा तस्य पादौ प्रणम्य स्वराज्यं पालय? दशकंधरं च पूजय? अन्यथा शक्तिं दर्शय? भक्तिं वा शक्तिं विना ते जीवितव्यं नास्ति, इंद्रो जगाद भो दूत! तव स्वामी वराकैर्नृपैरेव पूजितः, तेन च स मदोन्मत्तो मत्तोऽपि पूजां वांछति. ततः स दूतो रावणंप्रत्यागत्य विज्ञपयति, स्वामिन्निंद्रेण तवाज्ञा न मन्यते, तत् श्रुत्वा कोपारुणो रावणो रणकर्मणि दुढौके, इंद्रोऽपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सकलसैन्यपरिवृतो रावणं दुढौके, सामंताः सह सामंतैः । सैनिकाः सह सैनिकैः ॥ सेनान्याः सह सेनान्यैः । द्वयोर्युयुधिरे तयोः ॥ १ ॥ अन्योन्यं शस्त्रवर्षणैः संवर्तपुष्करावर्तमेघयोरिवाभवत्संग्रामः. तदा रावणश्चिंतयति मशकैरिवैतैर्वराकैः सैनिकैर्हतैः किं? इति विचार्य स भुवनालंकारकरिपुंगवमारुह्य युद्धाय सज्जो बभूव. इंद्रोऽप्यैरावणारूढः सन्मुखं समुपस्थितः.

द्वावपीभौ महाप्राणौ । दंतैर्दंतान् प्रजह्रतुः ॥ उद्भापयंतौ स्फुलिंगान् । रणोन्माथोद्भवानिव ॥ ॥ १ ॥ मिथोघातैर्विषाणेभ्यः । सौवर्णवलयावलिः ॥ पपातोर्व्यां विरहिणी—बाहुभ्य इव तत्क्षणं ॥ २ ॥ क्षणाब्द्यैः क्षणाद्बाणैः । क्षणादपि च मुद्गरैः ॥ भटाविवाद्वितीयौ तौ । रावणेंद्रौ प्रजह्रतुः ॥ ३ ॥ बलज्ञो रावणः स्वेभा—दुत्पत्यैरावणं ययौ ॥ हत्वा च तन्महामात्रं । बबंधेंद्रं करीरवत् ॥ ४ ॥ ततो रावणसैन्ये जयजयारवो जातः, इंद्रसैन्ये च शोकः प्रससार, धृते चेंद्रे तत्सैन्यं भग्नं, रावणश्चेंद्रं धृत्वा सदिक्पालं कारायामक्षिपत्काष्टपंजरे शुकवत्, तदेंद्रजनकः सहस्रारनृपो रावणं नमस्कृत्य रचितांजलिर्बभाषे, हे रावणराजेंद्र! अहं त्वां पुत्रभिक्षां याचे, ततो रावण उवाच, यदि मदुक्तं कर्म त्वत्पुत्रः कुर्यात्तदा तं सलोकपालं मुंचामि, नान्यथा, श्रूयतां च तत्कर्म? लंकानगरीं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सन्मार्जन्या सन्मार्जयति, सन्मार्ज्य च गंधांबुभिः प्रत्यहं परिषिंचति, मालाकार इव पुष्पोत्करं चिनोति, ततश्चेलोत्क्षेपं धूपोद्गाहं च करोति. जिनचैत्येषु पुष्पाणि ग्रथित्वा समानयति, अन्यान्यपि च कार्याणि यदि स करोति तदैनमिंद्रं मुंचामि, नान्यथा. एवं करिष्यतीत्युक्ते । सहस्रारेण रावणः ॥ मुमोच शक्रं कारायाः । सत्कृत्य निजबंधुवत् ॥ १ ॥ रथनूपुरमेत्येंद्र—स्तस्थावुद्विग्न उच्चकैः ॥ तेजस्विनां हि निस्तेजो । मृत्युतोऽप्यतिदुस्सहं ॥ २ ॥ निर्वाणसंगमो नाम । ज्ञानी तत्रान्यदा मुनिः ॥ समवासरदिंद्रोऽपि । तं वंदितुमुपाययौ ॥ ३ ॥ ज्ञानिना मुनिनापि धर्मदेशना चक्रे यथा—

भोगे रोगभयं सुखे क्षयभयं वित्तेऽग्निभूभृद्भयं । दास्ये स्वामिभयं जये रिपुभयं वंशे कुयोषिद्भयं ॥ स्नेहे वैरभयं नयेऽनयभयं काये कृतांताद्भयं । सर्वं नाम भयं भवेत्पुनरिदं वैराग्यमेवाभयं ॥ १ ॥ अर्थः पादरजः समो गिरिनदीवेगोपमं यौवनं । मानुष्यं जलबिंदुलोलचपलं फेनोपमं जीवितं ॥ धर्मं यो न करोति निश्चलमतिः स्वर्गार्गलोद्घाटनं । पश्चात्तापहतो जरापरिणतः शोकाग्निना दह्यते ॥ २ ॥ धर्मो जगतः सारं । सर्वसुखानां प्रधानहेतुत्वात ॥ तस्योत्पत्तिर्मनुजाः । सारं तेनैव मानुष्यं ॥ ३ ॥ भो भव्या एवंविधं मानुष्यं, प्रमादो न विधेयः, धर्मे च यत्नः कार्यः. एवंविधां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धर्मदेशनां श्रुत्वेंद्रराजाब्रवीत, हे भगवन्! केन कर्मणा मया रावणात्तिरस्कारपदं प्राप्तमित्यनुग्रहं विधाय त्वं ब्रूहि? ततो निर्वाणसंगमो नाम्ना ज्ञानी मुनिरब्रवीत, श्रूयतामिंद्रराजेंद्र!—पुरा जयपुरे नगरे ज्वलनसिंहो नाम राजा, तस्य वेगवती नाम राज्ञी, तयोरहल्या नाम्नी पुत्री, तस्याः कृते राज्ञा स्वयंवरः कारितः, तस्मिन् स्वयंवरेऽनेकराजानो मिलिताः, तत्र चंद्रावतीश आनंदमालिराजागतः, तेन सह सूर्यावर्तपुरीशस्तडित्केशनामा राजापि समागतः. शुभदिने स्वयंवरमहोत्सवो जातः, तस्मिन् स्वयंवरेऽहल्याकन्ययकयानंदमाली वव्रे, आनंदमालिनं वृतं ज्ञात्वा तडित्केशो नृपतिरानंदमालिनीर्ष्यालुर्जातः, ततःप्रभृति स तमानंदमालिनंप्रति द्वेषं वहति, परं किंचित्कर्तुं न शक्नोति. अथानंदमाली तयाहल्यया सह भोगाननुभवन् सुखं कानिचिद्वर्षाण्यवाहयत, एकस्मिन् दिने स्त्रियः किंचित्स्वरूपं दृष्ट्वा मनसि स चिंतयति, यतः—अंतरविषमा ह्येता । बहिरेव मनोरमाः ॥ गुंजाफलसमाकारा । योषितः केन निर्मिताः ॥ १ ॥ इति निर्वेदादानंदमाली व्रतमग्रहीत्, तीव्रं तपश्च तपन्नानंदमाली महर्षिर्विहारं चक्रे.

अथैकस्मिन् दिने आनंदमाली विहरन् रथावर्तपर्वतं जगाम, तत्र स तडित्केशेन पूर्वमत्सरि·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णा दृष्टः, ताडितश्च यष्टिमुष्ट्यादिनिः, परमानंदमाली ध्यानान्न चलितः. अथानंदमालिभ्राता क· ल्याणगणधरो नाम महामुनिः, तेन तत्सर्वं दृष्टं, ततस्तम्तित्केशो दुष्टात्मास्य साधोरुपसर्गं करोति, तस्मादेनं तडित्केशं निवारयामीति विचार्य स तंप्रति तेजोलेश्यां मोक्तुं प्रारेभे. तस्मिन्नवसरे त· डित्केशपत्न्या सत्यश्रिया नक्तियुक्तवचनैः स कल्याणगणधरः साधुः समाधिं नीतः, तेन साधुना तेजोलेश्यापि संहृता. ततस्तम्तित्केशो नवं भ्रांत्वा कतिचिद्भवांते शुनं कर्म विधाय सहस्रारसुतस्त्व· मिंद्रनामा विद्याधरो जातः, पूर्वनवे यत्त्वया मुनितिरस्कारः कृतस्तर्जितश्च तेन हेतुना त्वमस्मिन् भवे रावणेन तिरस्कृतस्तर्जितश्च. यतः—वहमारणअप्नक्खण—परधणविलोवणाईणं ॥ सव्वजह· न्नो नदत्तं । दसगुणित्तं इक्कसिकयाणं ॥ १ ॥ तिव्वतरे न पत्तंसो । सयगुणित्तं सयसहस्सको· डिगुणो ॥ कोडाकोडिगुणो वा । हुज्ज विवागो बहुतरो वा ॥ २ ॥ इति साधुवचनं श्रुत्वेंद्रश्चिंत· यति, अथ किं रावणसेवां करोमि? यतः—आरुह्य हस्तिनं शस्तं । समर्थमथवा रथं ॥ तुरंगं वे· गवंतं वा । खरे नारोहणं वरं ॥ १ ॥ एवं विमृश्य दत्तवीर्ये निजपुत्रे राज्यं दत्वा सहस्रपरिवारप· रिवृतः सहस्रारपित्रा सहित इंद्रो निर्वाणसंगममुनिपादांते प्रवव्राज, अत्युग्रं च तपस्तेपे, यतः—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत्पूर्वार्जितकर्मशैलकुलिशं यत्कामदावानल—ज्वालाजालजलं यदुग्रकरणग्रामाहिमंत्राक्षरं ॥ यत्प्रत्यूहतमःसमूहदिवसं यल्लब्धलक्ष्मीलता—मूलं तद्विविधं तथाविधतपः कुर्वीत वीतस्पृहः ॥ १ ॥ एवंविधं तपस्तप्त्वा केवलज्ञानं प्राप्य सहस्रारमुनिसहित इंद्रः शिवं ययौ. ॥ इतींद्रविद्याधरकथा ॥

अथैकस्मिन् दिने रावणोऽनंतवीर्यकेवलिमुनिपार्श्वे सुधासारिणीं धर्मदेशनां शुश्राव, यथा—त्रिसंध्यं देवार्चा विरचय चयं प्रापय यशः । श्रियः पात्रे दानं जनय नयमार्गं नय मनः ॥ स्मरक्रोधाद्यारीन् दलय कलय प्राणिषु दयां । जिनोक्तं सिद्धांतं शृणु वृणु जवान्मुक्तिकमलां ॥ १ ॥ देशनांते रावणेन पृष्टं, स्वामिन्! कुतो मे मरणं भविष्यति? अनंतवीर्यकेवलिनोक्तं, पारदारिकदोषेण तव मृत्युर्वासुदेवाद्भविष्यति, अतस्त्वं परस्त्रीसंगं माकार्षीः, यतः—तिर्यंचो मानवा देवाः । केचित्कांतानुचिंतनं ॥ मरणेऽपि न मुंचंति । सद्योगं योगिनो यथा ॥ १ ॥ संतापफलयुक्तस्य । नृणां प्रेमवतामपि ॥ बहुमूलस्य मूलं हि । महद्वैरतरोः स्त्रियः ॥ २ ॥ धर्मं शीलं कुलाचारं । शौर्यं स्नेहं च मानवः ॥ तावदेव ह्यपेक्षेत । यावन्न स्त्रीवशो भवेत ॥ ३ ॥ श्लथसद्भावनाधर्मा—स्त्रीविलासशिलीमुखैः ॥ मुनिर्योधाहतोऽधस्ता—न्निपतेच्छीलकुंजरात् ॥ ४ ॥ अकीर्तिकारणं योषि—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्योषिद्वैरस्य कारणं ॥ संसारकारणं योषि—द्योषितं वर्जयेत्ततः ॥ ५ ॥ भो रावण! ईदृशं परस्त्री-संगं त्वं वर्जय? एवं मुनिना बहूक्तेनापि तेन परस्त्रीनियमो न कृतः, किंतु परस्त्रीमनिछंतीं नेछा-मि, यदि वांछति भोक्तुं तदा भोक्ष्ये, नान्यथेति नियमं सोऽग्रहीत्. पुनरनंतवीर्यकेवलिनोक्तं, भो महाभाग! त्वं सर्वथा परस्त्रीनियमं कुरु? रावणेनोक्तं भो स्वामिन्नेतत्प्रत्याख्यानं कर्तुं नो शक्यते, अतोऽप्रसन्नामनिछंतीं नेछामीति नियमं करोमि. कथं करोत्ययं तथाविधं प्रत्याख्यानं? यदवश्यं-भाविभावानां प्रतीकारो न विद्यते इत्युक्तेरिति. अथानंतवीर्यकेवलिनं नत्वा रावणः पुष्पकविमा-नारूढो लंकानगर्यामाजगाम. ॥ इति श्रीमत्तपागछे भट्टारकश्रीहीरविजयसूरिराज्ये आचार्यश्रीवि-जयसेनसूरियौवराज्ये पंमितदेवविजयगणिविरचिते श्रीरामचरित्रे गद्यबंधे रावणदिग्विजयवर्णनो नाम द्वितीयः सर्गः समाप्तः ॥ श्रीरस्तु ॥

---

॥ अथ तृतीयः सर्गः प्रारभ्यते ॥

इतश्च वैताढ्यगिरावादित्यपुरनगरे प्रह्लादो नाम राजा, केतुमतीनाम्नी तस्य पट्टराज्ञी, तयोः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुत्रः पवनंजयनामा, कथंभूतोऽसौ? पीनोन्नतस्कंधः, सत्यसंधः, कमलवदनः, उज्ज्वलरदनः, सुरभिनिःश्वासः, लक्ष्मीनिवासः, सरलनाशावंशः, पृथिवीपीठावतंसः, प्रलंबकर्णः, सुवर्णवर्णः, विशालनेत्रः, सर्वकलाशालिक्षेत्रः, अष्टमीचंद्रसमानभालस्थलः, अनाकलितबलः, कज्जलश्यामकेशपाशः, सर्वजनपूरिताशः, सत्वैकतानवृत्तिः, उभयपक्षनिर्मलप्रवृत्तिः, त्रिशक्तिसमन्वितः, चतुर्विद्यालंकृतः, जितपंचेंद्रियविक्रमः, षण्मुखपराक्रमः, सप्तराज्यांगविराजितः, अष्टविधमदविवर्जितः, नवनिधानाकरभांडागारः, दशदिग्विख्यातसारः, एकादशकलाधारः, द्वादशसूर्यसमतेजाः, त्रयोदशयक्षकृतसान्निध्यः, चतुर्दशविद्यालब्धमध्यः, पंचदशविधदत्तदानः, षोडशकलासंपूर्णचंद्रसमानः, सप्तदशजिनपूजकः, अष्टादशदेशविख्यातकीर्तिकः, एकोनविंशतिपत्तनाधीशः, विंशतिविशोपकधरधर्मधुराधीशः, रूपेण निर्जितमारः, एवंविधः स पवनंजयकुमारोऽस्ति, स च पवनवद्गगनगाम्यस्ति.

इतश्चात्रैव भरते दंतिपर्वते माहेंद्रपुरे माहेंद्रनामा राजाभवत्, तस्य माहेंद्रराज्ञो हृदयसुंदरीनाम्नी पट्टराज्ञी, तयोः पुत्र्यंजनासुंदरी लावण्यादिगुणगणालंकृतास्ति, यतः—बाहुद्वंद्वमृणालमास्यकमलं लावण्यजालं जलं । नारीणां कुचचक्रवाकयुगलं धम्मिल्लसेवालकाः ॥ श्रोणीतीररसा च ने-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लहरी कंदर्पदावानलै—र्दग्धानामवगाहनाय विधिना पूर्णं सरो निर्मितं ॥ १ ॥ एवंविधां शतपुत्रोपरि जातां मातापित्रोरत्यंतवल्लभां तां पुत्रीमुद्यौवनां दृष्ट्वा जनकश्चिंतयति, इयं पुत्री कस्य देया? नीतिशास्त्रेऽप्युक्तं—वरं वरयते कन्या। माता वित्तं पिता श्रुतं ॥ बंधुः स्वाजन्यमिच्छंच। मिष्टान्नमपरे जनाः ॥ १ ॥ मूर्खनिर्धनदूरस्थ—शूरमोक्षाभिलाषिणां ॥ त्रिगुणाधिकवर्षाणां। नैव कन्या प्रदीयते ॥ २ ॥ अन्यायाप्तधनाढ्यस्य। कन्याऽव्योपजीविनः ॥ रोगिणो विकलांगस्य। नैव देया हि कन्यका ॥ ३ ॥ बधिरक्लीबमूकानां। खंजानां जडचेतसां ॥ सहसाघातकर्तृणां। पुंसां देया न कन्यकाः ॥ ४ ॥ कुलशीलवियुक्तानां। द्यूतमद्यपलाशिनां ॥ वैदेशिकस्वगोत्राणां। पुंसां देया न कन्यकाः ॥ ५ ॥ कुलजातिवियुक्तानां। पितृमातृवियोगिनां ॥ गेहिनीपुत्रयुक्तानां। पुंसां देया न कन्यकाः ॥ ६ ॥ नित्योपार्जनजीविना—मालस्यवशवर्तिनां ॥ बहुवैरापवादानां। पुंसां देया न कन्यकाः ॥ ७ ॥ दूरस्थानामविद्यानां। मोक्षमार्गानुकारिणां। शूराणां निर्धनानां च। न देया कन्यका बुधैः ॥ ८ ॥

ततो माहेंद्रराट् तामुद्यौवनां निजां पुत्रीं विलोक्य सुबुद्धिमंत्रिसंमुखं विलोक्य कथयतिस्म,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्नो मंत्रिन्नियमंजनासुंदरी कस्य दीयते? मंत्रिणोक्तं राजन्! विद्याधरकुमाराणां रूपाणि पट्टे आलिख्य दर्श्यते, यस्य रूपमस्यै रोचते तस्यैवेयं दीयते. ततो मंत्रिणा विद्याधरकुमाराणां रूपाणि पट्टे समालिख्य तस्यै दर्शितानि, परं कुमार्यै न कोऽपि रोचते. ततः पुनर्मंत्रिणोक्तं राजन् द्वौ वरौ स्तः, एको हिरण्यनान्निराज्ञः पुत्रो यमुनाराज्ञीकुक्ष्युद्भवो विद्युत्प्रज्ञनामा कुमारोऽस्ति. द्वितीयश्चादित्यपुराधीशप्रह्लादराज्ञः केतुमतीराज्ञीकुक्ष्युद्भवः पवनंजयनामा कुमारोऽस्ति. एतौ द्वावपि रूपवंतौ कुलीनावुद्यौवनौ च स्तः, अनयोर्मध्ये यो वरो योग्यो भवेत्तस्य दीयतां. पुनर्द्वितीयो मंत्री जगाद, राजन्ननयोर्मध्ये यो विद्युत्प्रज्ञनामा कुमारो मारसन्निभोऽस्ति, सोऽष्टादशवर्षायुर्ज्ञानिना कथितोऽस्ति, परं स केवलज्ञानं लब्ध्वा मोक्षं यास्यति. द्वितीयो यः प्रह्लादतनयः पवनंजयकुमारः स योग्यश्चिरायुः शूरो साहसिकश्च वरोऽस्ति, अतः पवनंजयस्य दीयतामंजनासुंदरी, अनयोः संयोगश्च कामरत्योरीश्वरपार्वत्योरिव प्रशस्यो भविष्यति. अत्रांतरे सर्वे विद्याधराः स्वस्वऋद्ध्या संयुक्ताः स्वस्वविमानस्थिता नंदीश्वरद्वीपं यात्रायै ययुः. तत्र मिलितैः सर्वैरपि विद्याधरैर्द्विपंचाशत्प्रासादेषु पूजा कृता. ततोऽनंतरं चैत्यालयबहिःस्थितानां यथास्थानमासीनानां तेषां विद्याधराणां मध्ये विविधो वा·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्तीलापः संजज्ञे. तदा प्रह्लादेन माहेंद्रंप्रति प्रोक्तं, भो माहेंद्र! मम सुताय पवनंजयकुमाराय तव सुतामंजनासुंदरीं देहि? तद्वचो माहेंद्रः प्रतिपेदे, प्रह्लादप्रार्थना तु निमित्तमात्रमेवासीत, यतः स तु पूर्वमेव दातुकाम आसीत्. ततस्तयोर्द्वयोः पितृभ्यां विचार्य लग्नं प्रतिष्टितं.

इतस्तृतीये दिनेऽनयोः पवनंजयांजनासुंदर्योर्विवाहः करिष्यते, मानसाख्ये सरोवरे च विवाहः कार्य इत्युक्त्वा तौ यथास्थानं गतौ. ततः प्रहर्षितमानसौ तौ माहेंद्रप्रह्लादौ स्वजनैः समं मानससरोवरे निजनिजावासं चक्रतुः. तदा पवनंजयो निजं प्रहसिताभिधानं मित्रंप्रत्युवाच, भो मित्र! किं त्वया सा दृष्टास्ति? यदि चेद् दृष्टा तर्हि ब्रूहि सांजनासुंदरी कीदृशी वर्तते? तदा हसित्वा प्रहसितोऽवोचत्, सा हि रंभाधिका वर्तते, यतः—वक्षोजौ कठिनौ न वाक्यरचना मंदा गतिर्नो मति—र्वक्रं भ्रूयुगलं मनो न जठरं क्षामं नितंबो न च ॥ नेत्रं चंचलचंचलं न तु वयः कृष्णाः कचा नो गुणा । निम्नं नाभिसरोवरं न जघनं सा स्त्री कथं प्राप्यते ॥ १ ॥ एवंविधां तां रंभाधिकरूपां श्रुत्वा मनसि हर्षितः पवनंजयो मित्रं प्रत्यूचे, भो मित्र! अथोद्वाहावसरो दूरेऽस्ति, तत आवाभ्यां तत्र गत्वा विलोक्यते, यतः—वल्लभोत्कंठितानां हि । घटिकापि दिनायते ॥ मासायते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिनमपि । किं पुनस्तद्दिनत्रयं ॥ १ ॥ ततः प्रहसितोऽपि व्याजहार, भो मित्र! त्वं स्थिरो भव? आवां निशीथसमये यास्यावः, एवं तेन स कुमारः स्वस्थीकृतः. ततो निशायां तावुभावपि तत्र कन्याविलोकनाय गतौ, तत्र च वसंततिलकामिश्रकेशीनामसखीभ्यां युतामंजनासुंदरीं तौ ददृशतुः, तासां वार्तालापं च शुश्रुवतुर्यथा—धन्यासि या हि प्राप्स्त्वं । तं पतिं पवनंजयं ॥ सखी वसंततिलके—त्युवाचांजनसुंदरीं ॥ १ ॥ हले मुक्त्वा वरं विद्यु—त्प्रभं चरमविग्रहं ॥ को वरः श्लाघ्यते ह्यन्यो । मिश्रकेश्यवदत्सखी ॥ २ ॥ प्रथमा प्रत्युवाचैवं । मुग्धे वेत्सि न किंचन ॥ विद्युत्प्रभो हि स्वल्पायुः । स्वामिन्या युज्यते कथं ॥ ३ ॥ द्वितीयापीत्यभाषिष्ट । वयस्ये मंदधीरसि ॥ स्तोकमप्यमृतं श्रेयो । भरोऽपि न विषस्य तु ॥ ४ ॥

इति तयोरालापं श्रुत्वा क्रुद्धः पवनंजयोऽचिंतयत्, अस्या अंजनसुंदर्या एतत्प्रियं, तेन चैषा न निषेधयति. ततः पवनंजयोऽसिमाकृष्य कोपारुणलोचनो ययोर्द्वयोरपि हृदि विद्युत्प्रभो वर्तते तयोर्मस्तके भिनद्मीति वदन् रोषाच्चचाल. तदा प्रहसितेन पवनंजयं बाहुदंडे धृत्वेत्यभाषि, भो मित्र! सापराधापि स्त्री न हन्यते, ततो निरपराधा अन्यूढा च कथं हन्यते? यदि तुभ्यं सा न रोचते त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दोहद्यैनां त्यजेरिति बोधितः पवनंजयः प्रहसितेन समं स्वस्थानं गतः. ततो निर्णीते दिने पवनंजयांजनसुंदर्योः पाणिग्रहमहोत्सवोऽभवत. ततो वधूवरमादाय प्रमोदन्नाक् प्रह्लादो माहेंद्रेणार्चितः स्वपुरीं ययौ. तत्र प्रह्लादनृपोंजनसुंदर्या नूस्थितविमानमिव मनोहरं पृथक्प्रासादमर्पयामास. तस्मिन् प्रासादे वसंततिलकायुतांजनसुंदरी स्थिता. अथ पाणिग्रहानंतरं पवनंजयस्तामंजनां मनसापि न संन्नावयामास, किं पुनर्वचसा कायेन च? यतो मानिनो निजापमानेन विमुखा एव न्नवंति, यतः—शमालानं भंजन् विमलमतिनाडीं विघटयन् । किरन् दुर्वाक्पांशूत्करमगणयन्नागमशृणिं ॥ न्रमन्नुर्व्यां स्वैरं विनयनयवीथीं विदलयन् । जनः कं नानर्थं जनयति मदांधो द्विप इव ॥ १ ॥ क्रोधावेशे नदीपूरे । प्रवेशे पापकर्मणि ॥ सुभक्तौ धान्यपाके च । कालक्षेपः प्रशस्यते ॥ २ ॥ पढमं वा रोसन्नरे । जा बुद्धि होइ सा न कायव्वा ॥ जा किज्जइ ता नूणं । न सुंदरो होइ परिणामो ॥ ३ ॥ इति नीतिवाक्यानि विस्मरता तेन पवनंजयकुमारेण सांजनासुंदरी परिहृता, ततोंजना चिंतयति, अहो मम को दोषः? केन हेतुनाहं परित्यक्ता? किं कस्यापि दृष्टिर्लमा? किं पूर्वार्जितं कुकर्म मे समुपस्थितं? अहो महदाश्चर्यं! निःकारणमवगणिताहं प्राणप्रियेणेति तस्याः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संवत्सरवद् द्राघीयस्यो निशा अभवन्.

अथान्यदा प्रह्लादनृपपार्श्वे राक्षसराजरावणस्य दूतः समागतः, प्रह्लादराज्ञोक्तं भो दूत! त्वं किमर्थमागतोऽसि? प्रयोजनं निवेदय? तेनोक्तं हे राजन्! रावणेन राज्ञाहं प्रेषितोऽस्मि, स च त्वामाह्वयति, यतोऽन्यदा रावणेन राज्ञा वरुणंप्रति दूतः प्रेषितः, स च दूतस्तत्र गत्वा प्रत्यागतो रावणंप्रति वदतिस्म, भो स्वामिन्! भवता सह वरुणस्तु वैरायते, तव प्रणामं कर्तुं न वांछति, यतोऽहंकारपर्वतः कोपवान् स वरुण एवं वदति, अरे को रावणः? तेन किं सिध्यति? अरे नाहमिंद्रः, नाहं कुबेरः, नाहं नलकूबरः, नाहं मरुद्राट्, न चाहं कैलाशशैलोऽस्मि, अहं तु वरुणोऽस्मि, अस्य दुर्मते रावणस्य देवताधिष्ठितप्रहरणस्य दर्पोऽस्ति, अहं तु तस्य चिरसंचितं तं दर्पं स्फेटयिष्यामि. इत्यादिदूतवचनान्याकर्ण्य कुपितेन रावणेन स्वसैन्येन वरुणनगरमवरुध्यत, तदा नगरान्निःसृत्य वरुणेन सपुत्रेणारुणलोचनेन रावणसैन्यं भग्नं, वरुणपुत्रै रावणसेनानी खरदूषणौ बध्ध्वा स्वसैन्ये नीतः. ततो जयजयारावपूरितदिगंतः कृतार्थीभूतो वरुणो निजां नगरीमविशत.

अथ रावणोऽपि विद्याधरेंद्रानाह्वातुं दूतान् स्थाने स्थाने प्रैषीत्, अहं च त्वामाह्वातुं प्रेषितोऽ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्मि, ततः शीघ्रं पादाववधार्यतां. तत् श्रुत्वा प्रह्लादश्चलनोपक्रमं व्यधात, तदा पवनंजय उवाच—
इहैव तिष्ठ तात त्वं । दशग्रीवमनोरथं ॥ पूरयिष्याम्यहमपि । तवास्मि तनयो यतः ॥ १ ॥ इत्यु-
दीर्य सनिर्बंधं । पितरं चानुमन्य सः ॥ लोकं चाशेषमाभाष्य । चचाल पवनंजयः ॥ २ ॥ ततो-
जना निजपतिं यात्रोत्सुकं जनमुखात् श्रुत्वा प्रासादादवरुह्य तं पवनंजयमीक्षितुं स्तंभेऽवष्टभ्य पां-
चालिकेव निर्निमेषेक्षणा तस्थौ. अस्वास्थ्यमथिताशयां, द्वारस्तंभनिषण्णां, प्रतिपच्चंद्रवत्कृशां, वुलि-
तालकां, अलकैः संछन्नललाटां, निर्विलेपनां, नितंबन्यस्तभुजलतां, तांबूलरागरहिताधरां, धूसराधर-
पल्लवां, बाष्पांबुक्षालितमुखीं पुरतः स्थितां निजवल्लभामंजनां पवनो व्रजन् ददर्श, दृष्ट्वा च पवनं-
जयश्चिंतयति, अहो अस्या निर्भीत्वं! अहो दुर्धीत्वं! अहोऽज्ञानत्वं! अहो निर्लज्जत्वं च! यतः
श्वशुरयोरपि लज्जां त्यक्त्वेयं पुरः स्थितास्ति, ततः सांजना पत्युः पादयोः पतित्वा विज्ञपयति, हे
स्वामिंस्त्वया सर्वोऽपि परिजनः परिभाषितः, अहं तु मनागपि न भाषिता, तथापि—विज्ञप्यसे म-
या स्वामिन् । विस्मार्याहं न च त्वया ॥ पुनरागमनेनाशु । पंथानः संतु ते शिवाः ॥ १ ॥ इति
ब्रुवाणां तां भार्या—महीनचरितामपि ॥ यथाववगणय्यैव । जयाय पवनंजयः ॥ २ ॥ पत्यवज्ञावि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योगार्ता । गत्वांतर्वेश्मभूतले ॥ वारिभिन्नतला सिंधु—मेखलेव पपात सा ॥ ३ ॥ ततः पवनंजयोंजनासुंदरीमवगणय्य ससैन्य आकाशे उत्पत्य मानससरोवरे गतः, तत्र सप्तभौमिकं प्रासादं विकृत्य स तत्राध्यास्त, यतो विद्याधराणां विद्याभिरेव कार्यं सिद्धं भवति, तत्र सरःपरिसरावनौ पर्यंकमारुढः संध्यासमये पवनंजयः प्रियवियोगार्ता, दुःखाक्रांतामेकां चक्रवाकीं ददर्श. तां रुदंतीं प्रेक्ष्य पवनंजयः स्वमित्रं प्रहसितमपृछत्, भो मित्र! एषा चक्रवाकी कुत आक्रंदं करोति? स आह हे मित्र! एषा चक्रवाकी सकलं दिनं पत्या सह सरोवरादिषु रंत्वा निशायां पत्युर्विरहं सोढुं नेशते, अतश्चेयं रोदति, यतो निशायां तयोर्दंपत्योर्विरहो जायते इति जगतः स्थितिः, विरहो हि दुस्सहो विशेषतः श्रावणमासे च, यतः—शिखिनि कूजति गर्जति तोयदे । स्फुटति जातिलताकुसुमाकरे ॥ अहह पांथ न जीवति ते प्रिया । नभसि मासि न यासि गृहं यदि ॥ १ ॥ तत श्रुत्वा खिन्नः पवनंजयो मित्रंप्रत्युवाच—

उद्वाहितापि या त्यक्ता । भाषिता या न जातुचित् ॥ आगछताप्यवज्ञाता । परनारीव या मया ॥ १ ॥ आक्रांता दुःखभारेण । पर्वतेनेव मूलतः ॥ मत्संगविमुखा नूनं । सा कथं हा भवि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्यति ॥ २ ॥ विवेकरहितं धिङ् मां । नूनमेषा मरिष्यति ॥ तद्धत्यापातकेनाहं । क्व गमिष्यामि दुर्मुखः ॥ ३ ॥ इति चिंतितमात्मीय—माख्यत्प्रहसिताय सः ॥ स्वदुःखाख्यानपात्रं हि । नागरः सुहृदं विना ॥ ४ ॥ प्रहसितोऽप्यूचे—तया वराक्यांजनसुंदर्या तत्र किं विनाशितं? तत्सख्या तु स्वभावेनोक्तं, त्वया तु तद्वचो गणित्वा ग्रंथौ बद्धं, यतः—कुटिलगतिः कुटिलमतिः । कुटिलात्मा कुटिलशीलसंपन्नः ॥ सर्वं पश्यति कुटिलं । कुटिलः कुटिलेन भावेन ॥ १ ॥ सरलगतिः सरलमतिः । सरलात्मा सरलशीलसंपन्नः ॥ सर्वं पश्यति सरलं । सरलः सरलेन भावेन ॥ २ ॥ किंच भो मित्र! सांप्रतं सरलभावेन त्वं सर्वं सरलं पश्यसि, नूनं सा त्वद्वियोगतो विपत्स्यते, अतः सा त्वयाश्वासयितुं युज्यते. तामनुज्ञाप्य पुनः स्वार्थाय समागच्छेः. एवं मित्रेण प्रेरितः पवनंजयस्तत्क्षणादेव नभस्युत्प्लुत्यांजनसुंदर्या वेश्मनि निशायां मित्रेण सह समागात, किंचित्तिरोहितश्च द्वार्येव तस्थौ, ततः प्रहसितोऽग्रे भूत्वा तदोकसि प्राविशत्, तत्र सोऽल्पे जले शफरीमिवाधिपर्यंके वेल्लंतीं, चंद्रज्योत्स्नया ज्वलंतीं, उन्मुक्तदीर्घनिःश्वासां, अंतर्दाहेन प्रस्फुटद्धारमौक्तिकां, दुःखावेशवशांदोलनेन भग्नमणिकंकणां वसंततिलकासख्या वारंवारमाश्वास्यमानां शून्यचित्तां काष्टघटितामिवांजना-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुंदरीमीक्षांचक्रे. अंजनासुंदर्यापि स दृष्टः, अकस्माद्व्यंतर इव । को नामेह समाययौ ॥ इति भीतापि सा धैर्य—मवलंब्येदमब्रवीत ॥ १ ॥ अहो कस्त्वमिहायासीः । परपुंसाग्रवा त्वया ॥ अलं ज्ञातेन दूरं हि । व्रज त्वं मे निकेतनात ॥ २ ॥ वसंततिलके दोष्णा । विधृत्यैनं बहिः क्षिप ॥ कृपाकरविशुद्धास्मि । नैनं दृष्टुमपि क्षमा ॥ ३ ॥ पवनंजयमुक्षित्वा—मुष्मिन् मम निकेतने ॥ न प्रवेशाधिकारोऽस्ति । कस्यापि किमुदीक्षसे ॥ ४ ॥

इति श्रुत्वा प्रहसितोऽवोचत्, हे स्वामिन्यहं पवनंजयमित्रः प्रहसितोऽस्मि मन्मथस्येव माधवः. ततोंजना जगाद, भो प्रहसित ! अयं नर्मणः क्षणो नास्ति, अथवायं मम स्वामिनो दोषो नास्ति, किंतु मम कर्मणामेव दोषः, अन्यथा कुलीनस्तादृशो भर्ता मां कथं त्यजेत्, पाणिग्रहात्प्रभृत्येव । मुक्ताहं स्वामिना मम ॥ द्वाविंशतिसमा जग्मु—र्जीवाम्यद्यापि पापिनी ॥ १ ॥ तद्वचनं श्रुत्वा संक्रांतदुःखप्राग्भारः पवनंजयः प्रकटीभूय सगद्गदवागिदं व्याजहार, हे सुभ्रु त्वं मया निर्दोषापि दोषमुत्पाद्यावज्ञातासि, तत्क्षम्यतां, इत्युक्तवंतं पवनंजयमुपलक्ष्य त्रपावनतमुखी पर्यंकमवष्टभ्य विनम्रमुखी साभ्युत्तस्थौ, ततः पवनंजयो लतां हस्तीव तां हस्तेनालंब्याधिपर्यंकं न्यषदत्, ततोऽ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सौ नृयोन्नृयोऽवोचन्निरपराधा त्वं यन्मया खेदितासि तत्सहस्व? तत् श्रुत्वा हर्षितांजनावोचत्, हे नाथ! एवं मास्मब्रवीः, अहं सदैव तव दास्यस्मि. अतो ममाप्यपराधः क्षम्यतामित्युक्तवंतौ तौ दंपती संमिलितौ. ततो वसंततिलकां प्रहसितो जगाद, भो वसंततिलके अथात्रावयोः स्थातुं योग्यं न, एवं विचार्य तावपसरितौ. रेमाते तत्र च स्वैर—मंजनापवनंजयौ ॥ विरराम ससावेशा—चैकयामेव यामिनी ॥ १ ॥ प्रभातां रविमालोक्य । तामूचे पवनंजयः ॥ जयाय कांते यास्यामि । ज्ञास्यंते गुरवोऽन्यथा ॥ २ ॥

हे सुंदर्यतः परं त्वं खेदं मा कार्षीः, त्वं सखीवृता सुखं तिष्ट? अहं दशास्यकृत्यं संपाद्य स्तोकैरेव दिनैः समागमिष्यामि, त्वया तु काचिच्चिंता न विधेया, गतं तेऽशुभं कर्म, प्रकटितं च पूर्वकृतं पुण्यं, इत्युक्तवंतं पतिमंजना बभाषे. हे नाथाहमद्यैव ऋतुस्नातास्मि. यदि कदाचिद्गर्भस्योत्पत्तिर्भविष्यति तदा किं करिष्यते? अतोऽहं भवता सह समेष्यामि, ततः पवनंजयोऽवादीदहं शीघ्रं समेष्यामि, त्वं चिंतां मा कुरु? तथा मदागमनसूचकं मन्नामांकमंगुलीयकं गृहाण? समये च तत्प्रकाश्यमित्युक्त्वांगुलीयकं दत्वा यावत्स याति तावदंजनया प्रोक्तं—तव वर्त्मनि निवर्ततां शिवं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुनरस्तु त्वरितं समागमः ॥ अयि साधय साधयेप्सितं । स्मरणीयाः समये वयंवयः ॥ १ ॥ एतद्व‑चः श्रुत्वा हर्षितः पवनंजयस्तत उत्पत्य सरस्तीरस्थे निजे शिबिरे तत्क्षणमेव जगाम, ततोऽपि सैन्येन सह व्योमवर्त्मना स लंकानगरीं जगाम, तत्र च रावणं प्रणनाम. रावणोऽपि प्रह्लादतनयं दृष्ट्वा हर्षितमनाश्चमूचक्रपरिवृतः पातालंलकां प्रविश्य वरुणंप्रति ययौ.

इतश्चांजनासुंदरी तस्मिन्नेव दिने मुक्ताशुक्तिरिव गर्भं बभार, तदा गर्भानुभावतः सा सुंदरी सर्वावयवशालिनी बभूव, यथा—मुखमापांडुगंडश्रि । श्यामवक्त्रौ पयोधरौ ॥ गतिर्नितांतमलसा । नेत्रे च प्रसृतोज्ज्वले ॥ १ ॥ गर्भलक्ष्माण्यवाच्यानि । तस्याव्यक्तानि वर्ष्मणि ॥ दृष्ट्वा केतुमती श्वश्रूः । साधिक्षेपमदोऽवदत् ॥ २ ॥ हले किमिदमाचीर्णं । कुलद्वयकलंककृत् ॥ देशांतरं गते पत्यौ । पापे यद्भुदरिण्यभूः ॥ ३ ॥ हे कुलटे पांशुले! त्वयैतत्किं कृतं? वयमपि त्वया लज्जापिताः. तयैवं निर्भर्त्सितांजनासुंदरी पत्युरागमनोदंतसूचिकां तन्नामांकितां मुद्रिकामदर्शयत. तां मुद्रिकां दृष्ट्वा भूयः श्वश्रूरेवमुवाच, रे निर्लज्जे! पवनंजयस्तु तव नामापि नाग्रहीत्, तर्ह्यंगुलीयकमात्रेण त्वं किमस्मान् विप्रतारयसि? हे स्वच्छंदचारिणि त्वं निर्गच्छ मद्गृहात्, गच्छ च पितृवेश्मनि,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नात्र त्वया स्थातव्यं, न हि त्वादृशां योग्यमेतत्स्थानं. एवं तामंजनां तर्जयित्वा निजनिकेतनाच्च निष्काश्य यानमारोप्य वसंततिलकान्वितां माहेंद्रनगरोपांते सेवकैरत्याजयत. तेऽपि सेवकास्तथा कुर्वंतस्तां मातरमिव नमस्कृत्य क्षमयित्वा च स्वस्थानमाययुः. तस्मिन् समयेंजनादुःखदुःखित इव रविरप्यस्तमगात्, यतः संतः सतां विपदं विलोकयितुं नेश्वराः, रजनी च जाता. यथा—घूकानां घोरघूत्कारैः । फेत्कारैः फेरुयोषितां ॥ श्वंदितैर्वृकवृंदानां । निशाटानां च निःस्वनैः ॥ १ ॥ तुमुलैः पिंगुलानां च । संगीतैरिव रक्षसां ॥ स्फुटत्कर्णेव सा कष्टं । तां जाग्रत्यनयन्निशां ॥ २ ॥ एवंविधां निशामतिक्रम्य सा सुंदरी दीनानना भिक्षुकीव पितृगृहद्वारे ययौ. अपरिच्छदां वसंततिलकायुतां तां सुंदरीमेकाकिनीं दृष्ट्वा प्रतिहारो राजानं व्यजिज्ञपत्, राजन्नंजनासुंदरी समागतास्ति, तत् श्रुत्वा राजा चिंतयति स्त्रीणां चरित्रमचिंत्यं, धिग्धिग्विधेर्विलसितं, यतः—

पत्रं नैव यदा करीरविटपे दोषो वसंतस्य किं । घूको नैव विलोकते यदि दिवा सूर्यस्य किं दूषणं ॥ धारा नैव पतंति चातकमुखे मेघस्य किं दूषणं । यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः ॥ १ ॥ आरोहतु गिरिशिखरं । समुद्रमुल्लंघ्य यातु पातालं ॥ विधिलिखिताक्षरमालं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



फलति कपालं न नृपालः ॥ २ ॥ इत्यादि विचिंत्य तां कुलकलंककारिणीं ज्ञात्वाहिदष्टामंगुलीमिवानिष्टां मत्वा सोऽपि राजा गृहान्निर्वासयामास. तस्मिन्नवसरे महोत्साहो महामंत्री नृपतिंप्रतीत्यूचे, श्वश्रूदुःखे दुहितॄणां शरणं पिता, किंच हे प्रभो! केतुमती श्वश्रूर्दुष्टास्ति. अतो निर्दोषामप्येनां दोषमुत्पाद्य निर्वासयति, ततो यावद्दोषनिश्चयो न भवति तावत्स्थापयित्वासौ प्रछन्नं पाल्यते, यत इयं ते पुत्रीति तदुपरि कृपां कुरु? राजोचे भो मंत्रिन्! श्वश्रूस्तु सर्वत्रेदृश्येव भवति, परं पवनंजयस्यैषा पूर्वं द्वेष्याभवत, अतः पवनादेवामुष्याः पुत्र्याः कथं गर्भः संभाव्यते? अतः सर्वथाप्येषा सदोषा, तेन च निर्वास्यतामियं, अस्या मुखमपि न पश्यामि. इत्थं राजाज्ञया द्वाःस्थोऽप्यंजनां गृहान्निरवासयत. अथांजनापि क्षुधिता तृषिता श्रांता निःश्वासान्मुंचंती अश्रुवर्षिणी दर्भविद्धपादा चकितहरिणीप्रेक्षणा महीतले पतंती पदे पदे प्रस्खलंती विश्राम्यंती दैवोपालंभं ददती रुदंती पक्षिणोऽपि च रोदयंती सख्या सह चचाल, परं सा कुत्रापि स्थितिं न लेभे, ततोंजना चिंतयति अहो संसारे कोऽपि कस्यापि वल्लभो नास्ति, यतः—

वृक्षं क्षीणफलं त्यजंति विहगाः शुष्कं सरः सारसा। निर्गंधं कुसुमं त्यजंति मधुपा दग्धं व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नांतं मृगाः ॥ निर्द्रव्यं पुरुषं त्यजंति गणिका भ्रष्टं नृपं सेवकाः । सर्वः स्वार्थवशाज्जनोऽभिरमते नो कस्य को वल्लभः ॥ १ ॥ माता नास्ति पिता नास्ति । नास्ति भ्राता सहोदरः ॥ अर्थो नैव धनं नैव । तस्माज्जाग्रत जाग्रत ॥ २ ॥ कामः क्रोधश्च लोभश्च । देहे तिष्ठंति तस्कराः ॥ ज्ञानरत्नापहर्तार—स्तस्माज्जाग्रत जाग्रत ॥ ३ ॥ आशया बध्यते जंतुः । कर्मणा न तु चिंतया ॥ आयुःक्षयं न जानाति । तस्माज्जाग्रत जाग्रत ॥ ४ ॥ इत्यादि चिंतयंती महीं भ्रमंती सैका महाटवीं प्राप, कथंभूतामटवीमित्याह—अनेकोत्कटवृक्षमंडितां, महाभयंकरां, मनुष्योज्झितां, श्वापदसहितां, विविधव्यालशार्दूलादिकलितां, कालवेतालक्षेत्रपालपालितां. शाकिनीडाकिनीयोगिनीभोगिनीभोगभयंकरां, यक्षराक्षसगंधर्वविद्याधरखेचरभूचरप्रेतपिशाचव्याकुलां. भिल्लतस्करसरभकासराकुलां, व्याघ्रसिंहशृगालवृकशूकरादिश्वापदाकुलां, रौद्राकारघूकशिवाफेत्कारडाकिनीडमरुभात्कारां, एवंविधामटवीं प्राप्य सा रोदितिस्म, अहो मे मंदभाग्यत्वं! अहो मातृपितॄणामविचारित्वं! अहो दैवनिर्घृणत्वं! अहो संसारासारत्वं! यदहं पापिना दैवेन निर्दोषापि विडंबिता, धिग्मे रूपं, धिक्सुकुलत्वं. यदहमीदृशे सुकुलेऽपि दैवेनेत्थं विडंबिता. धन्यास्ते मुनिवरा ये एवंविधं संसारस्वरूपं ज्ञात्वा संसा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रान्निर्गताः संयमं प्रतिपन्नाश्च, अहं त्वधन्या यतो दैवेन विडंबिता, यतः—कृतकर्मक्षयो नास्ति। कल्पकोटीशतैरपि ॥ अवश्यमेव भोक्तव्यं । कृतं कर्म शुभाशुभं ॥ १ ॥ वणदवभएण नलिनी—रंमि मुत्तूण सरवरे पत्ता ॥ तहवि हिमेण दड्ढा । न मुच्चइ पुव्वकिअकम्मं ॥ २ ॥

इत्यादि विलपंतीमंजनां वसंततिलका सखी मिष्टवाक्यैः संबोध्यासन्नां पर्वतगुहां निन्ये, तत्र सांजना गुहांतर्ध्यानस्थममितगतिं मुनिं ददर्श, सोऽपि चारणमुनिस्तां सतीं दृष्ट्वा ध्यानममुंचत्, सापि सती तं साधुं प्रणिपत्य भूमौ पुरो निषसाद, साधुरपि दक्षिणं करमुद्यम्य धर्मलाभाशिषमदात, वसंततिलकापि भक्त्या तं नमस्कृत्य निषसाद, साधुरपि धर्मदेशनामकरोत्, यथा—जिनेंद्रपूजा गुरुपर्युपास्तिः । सत्वानुकंपा शुभपात्रदानं ॥ गुणानुरागः श्रुतिरागमस्य । नृजन्मवृक्षस्य फलान्यमूनि ॥ १ ॥ इत्यादिदेशनांते वसंततिलका मुनिं जगौ, भो मुने! अस्या गर्भे को जीवोऽस्ति? केन हेतुना चांजनायाः कलंकः प्राप्तः? इति वसंततिलकया पृष्टो मुनिरब्रवीत्—

अस्मिन् जंबूद्वीपे भरतक्षेत्रे मंदरे नगरे प्रियनंदिनामा वणिगासीत, तस्य जयानाम्न्यां जायायां दमयंतनामा पुत्रोऽभूत्, स च कलानिधिर्जनप्रियश्चासीत. स दमयंतोऽन्येद्युरुद्याने क्रीडन्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वाध्यायध्यानतत्परान् साधून् ददर्श, वंदित्वा च मुनिभ्यो धर्मलाभाशिषं श्रुत्वा स शुद्धधीर्धर्मं शु-
श्राव, यथा—दानं सुपात्रे विशदं च शीलं । तपो विचित्रं शुभभावना च ॥ भवार्णवोत्तारणया-
नपात्रं । धर्मं चतुर्धा मुनयो वदंति ॥ १ ॥ इति देशनां श्रुत्वा स दमयंतः श्राद्धधर्मं जग्राह, य-
था पूर्वं सम्यक्त्वं, ततो द्वादशव्रतानि, तत्र पंचाणुव्रतानि, त्रीणि गुणव्रतानि, चत्वारि च शिक्षाव्र-
तानि, एवं स द्वादशव्रतानि जगृहे. तद्दिनादारभ्यासौ मुनिभ्यो दानं ददौ, विविधाभिग्रहं चाग्रही-
त्, एवं च कुर्वतस्तस्य कियान् कालो गतः. आयुरंते च विपद्य स ईशाने कल्पे देवोऽभूत. तृ-
तीये भवे च जंबूद्वीपे भरतक्षेत्रे मृगांकपुरेशितुर्हरिचंद्रमहीपतेः प्रियंगुलक्ष्म्यां पट्टराज्ञ्यां सिंहचंद्र-
नामा पुत्रोऽभूत्, तत्रापि स जैनं धर्मं प्रपद्यायुरंते विपद्य तुर्यभवे माहेंद्रदेवलोकं गतः. पंचमे भ-
वे चात्रैव भरते वैताढ्ये वरुणे नगरे सुकंठनृपकनकोदरीपट्टराज्ञ्योः सिंहवाहननामा पुत्रोऽभूत्.
तत्रापि श्रावकत्वं प्राप्य पितृपर्यायागतं राज्यं भुक्त्वा श्रीविमलप्रभोस्त्रयोदशजिनेंद्रस्य लक्ष्मीधरमु-
नेः पादमूले व्रतमग्रहीत्. तत्र दुस्तपं तपस्तप्त्वायुरंते मृत्वा षष्टे भवे षष्टे लांतके देवलोके गतः.
ततश्च्युत्वा सप्तमे भवेऽस्यास्तव सख्या अंजनासुंदर्या उदरे समवातरत्. अयं तव सख्याः पुत्रो गु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णानामालयो विद्याधरेश्वरश्चरमदेहोऽनवद्यो दोष्मतां श्रेष्टश्च हनुमान् नाम्ना भविष्यति. इति हनुमतः पूर्वभवाः ॥

अथांजनायाः पूर्वभवः कथ्यते, यथा—अस्मिन् जंबूद्वीपे भरतक्षेत्रे कनकपुरे नगरे कनकरथनामा राजाभूत्, तस्य कनकरथस्य द्वे पत्न्यावभूतां. एका कनकोदरी अपरा च लक्ष्मीवती, तयोर्मध्ये लक्ष्मीवती श्रद्धान्विता श्राविकाभूत्, सा च रत्नमयं जिनबिंबं विधाय गृहचैत्येऽपूजयत्, द्वयोः कालयोश्च प्रत्यहमवंदत. एकस्मिन् दिने मात्सर्यात्कनकोदर्या तस्याः सपत्न्या अर्हत्प्रतिमां हृत्वा गृहोपांतेऽवकरे क्षिप्ता. तस्मिन् समये तस्या गृहे जयश्रीनामगणिनी विहरंती तत्रागता, सा च साध्वी तां कनकोदरीं जिनप्रतिमामवकरे क्षिपंतीं दृष्ट्वावदत् भो भद्रे! त्वया भगवत्प्रतिमामपहरंत्या सुंदरं न कृतं, तत् श्रुत्वा तया भवभीत्या प्रतिमा पुनः समर्पिता. पुनः साध्व्या प्रोक्तं भो कनकोदरि! त्वया ह्यशुचिभांडागारेऽवकरके जिनप्रतिमां क्षिपंत्या निजात्मानेकदुःखभाजनं कृतः. ततः पुनः पुनः सानुतापा कनकोदरी जिनप्रतिमां गृहीत्वा सुगंधवारिणा प्रक्षाल्य चंदनेनानुलिप्य पुष्पादिभिश्च प्रपूज्य सिंहासने न्यवेशयत, पादयोः पतित्वा च क्षामितं न पुनरेवमहं करिष्ये इ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ति कथयामास. ततः सा साध्वीसमीपे सम्यक्त्वं प्रतिपद्य जैनं धर्मं च प्रपाल्य काले विपद्य सौधर्म कल्पे देव्यजायत. ततश्च्युत्वात्रैव भरते दंतिपर्वते महेंद्रपुरे महेंद्रराज्ञो हृदयसुंदरीपट्टराज्या अंजनासुंदरी नाम पुत्री जाता. सैषा च तव स्वामिनी, जिनप्रतिमाया दुःस्थानक्षेपजं चेदं तस्याः फलं त्रयोविंशतिघटिकानिबद्धं त्रयोविंशतिवर्षभोग्यमजायत, अथ चैकवर्षावसानं वर्तते. किंच त्वमपि पूर्वभवेऽस्या भगिन्यासीः, त्वया च तत्कर्मानुमोदितं, तेन त्वमप्यनया सह तत्फलमनुभवसि. तत् श्रुत्वा ताभ्यां श्राद्धधर्मो जगृहे. पुनर्मुनिनोक्तं भो सुंदरि! अत्रैव तव मातुलोऽकस्मात्समेष्यति, स च त्वां स्ववेश्मनि नेष्यति, तत्र मातुलगृहे च तव पत्या सह संगमो भविष्यति. एवमुक्त्वांजनां ससखीमार्हते धर्मे स्थापयित्वा स मुनींद्रः खगेंद्रवन्नभस्योत्पपात. इत्यंजनासुंदरीवसंततिलकयोः पूर्वभवौ. ॥

अथ तत्र स्थिते ते पुत्कारोटभयंकरं बूत्कारपूर्णदिग्भागं कुंजरासृक्करालं दीपायमाननयनं बालचंद्राभदंष्ट्रं वह्निज्वालासोदरकेसरासटं लोहांकुशोपमनखं शिलासदृगुरःस्थलं पंचाननमेकं समायांतमपश्यतां. ततस्ते कंपमानांगे भूतले विवक्षू इव कांदिशिके अतिष्ठतां. परं तच्छीलमाहात्म्यात्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुहास्वामी मणिचूडनामा सुरो निजं शारभं रूपं विकृत्य तं पंचाननमनाशयत्. ततः स देवो निजं शारभं रूपं संहृत्य स्वरूपं च प्रतिपद्य तयोः प्रमोदायार्हद्गुणस्तुतिं सप्रियो जगौ. अथ सुरकृतसांनिध्ये ते द्वे अपि तस्यां गुहायां संस्थिते मुनिसुव्रतदेवप्रतिमां स्थापयित्वा चार्चयतःस्म. यतः—दालिद्दं दोहग्गं । कुजाइकुसरीरकुगइकमईओ ॥ अवमाणरोगसोगा । न हुंति जिणबिंबकारीणं ॥ १ ॥ धूपो दहति पापानि । दीपो दारिद्र्यनाशनः ॥ पूजया विपुलं राज्यं । नैवेद्यं मोक्षदायकं ॥ २ ॥ देवस्य दक्षिणे भागे । दीपस्य विनिवेशनं ॥ वामांगे धूपदानं तु । अग्रपिंडं तु सन्मुखं ॥ ३ ॥ प्रभाते प्रथमं वासैः । पूजा कार्या विचक्षणैः ॥ मध्याह्ने कुसुमैः पूजा । संध्यायां धूपदीपयोः ॥ ४ ॥ एवं पूजां कुर्वत्योस्तयोः कालः सुखेन याति.

अथान्येद्युरंजना पूर्णे मासि शुभदिने शुभलग्ने शुभवासरे शुभनक्षत्रे शुभांशे शुभग्रहे कल्याणवत्यां वेलायां सिंहस्वप्नसूचितं सिंही सिंहमिवांजना सुतं सुषुवे. कुलिशांकुशचापचक्रपादपादिशुभलक्षणोपेतं शुभाकारं मातृपितृमनोरथपूरकं तं सुतं दृष्ट्वा हृष्टा वसंततिलका सूतिकर्माण्यकरोत्. अंजनापि सुतमंके संस्थाप्य हर्षदुःखपूरिता रोदिति, यथा—आरोप्य सुतमुत्संगे । दुःखितां·

जनसुंदरी ॥ उदश्रुवदनारोदी—द्रोदयंती तरूनपि ॥ १ ॥ पर्वतेऽत्र गुहायां ते । जात जातस्य कीदृशं ॥ जन्मोत्सवं करोम्येषा । वराकी पुण्यवर्जिता ॥ २ ॥ एवं तां रुदंतीं प्रतिसूर्यनामा विद्याधराधीपो गगनाध्वना गछन् प्रेक्ष्य समागत्य चावादीत्, भो सुंदरि! त्वं सत्यं ब्रूहि? किं ते दुःखस्य कारणं? ततोंजनासंज्ञिता वसंततिलकोचे हे महाभाग! शृणु त्वमस्या वृत्तांतं, इत्युक्त्वांजनाया विवाहादारभ्य पुत्रजन्मपर्यंतमशेषं वृत्तांतं साचख्यौ. तदा तद्दुःखेन दुःखितः प्रतिसूर्योऽवादीत भो भद्रे! शृणु? अहं हनुपुरेश्वरः प्रतिसूर्यनामा तव मातुलोऽस्मि, विभावसुननयः सुंदरीमालाकुक्षिजो हृदयसुंदरीसहोदरश्चास्मि.

इति श्रुत्वा सांजनाधिकाधिकमरोदीत्, यत इष्टविलोकनात्प्रायो दुःखं पुनर्नवीभवेत. ततो मातुलोंजनां रुदंतीं वारयित्वा सहायातान् दैवज्ञानपृछत्, भो दैवज्ञा अयं शिशुः कीदृशो भावी? दैवज्ञेनोक्तं—भाव्यवश्यं महाप्रज्ञो । भवे चात्रैव सेत्स्यति ॥ शुभग्रहबले लग्ने । जातोऽयं पुण्यभाक् शिशुः ॥ १ ॥ तथाहि तिथिरद्येयं । चैत्रस्य बहुलाष्टमी ॥ नक्षत्रं श्रवणं स्वामी । वासरस्य विभावसुः ॥ २ ॥ आदित्यो वर्तते मेषे । भवनं तुंगमाश्रितः ॥ चंद्रमा मकरे मध्ये । भवने

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समवस्थितः ॥ ३ ॥ लोहितोऽपि स्थितो मध्ये । मीनराशौ विधोः सुतः ॥ कुलीरे धिषणोऽप्युच्चै-रध्यास्य भुवनं स्थितः ॥ ४ ॥ मीने दैत्यो कुजस्तंज—स्तस्मिन्नेव शनैश्वरः ॥ मीनलग्नोदये ब्रह्म-योगे सर्वमिदं शुभं ॥ ५ ॥ एवंविधां जन्मपत्रिकां श्रुत्वा प्रतिसूर्यो भागिनेयीं ससखीं सपुत्रां च विमाने समारोप्य स्वपुरींप्रति प्रतस्थे. एवं प्रतिसूर्यस्य नभसि गच्छतो मातुरुत्संगात्स बालको वि-माने लंबमानां रत्नकिंकिणीं जिघृक्षुरुत्पपात, ततो विमानं दूरे गतं, बालकश्च गिरिशिखरमूर्ध्नि न्यपतत्, तत्पातनिर्घातवशात्स गिरिः कणशोऽभवत. अथ पुत्रं पतितं दृष्ट्वांजनासुंदरी तत्क्षणं रुदं-ती पाणिभ्यां हृदयमाजघ्ने. ततः प्रतिसूर्यो विमानादवरुह्य तमभंगकमक्षतांगमुपादाय निधानवत्तन्मा-तुरर्पयत. ततो मरुद्वेगेन विमानेन स प्रतिसूर्यो हनुपुरे ययौ, तत्र च सोंजनां स्ववेश्मन्युत्तारया-मास, सर्वोऽप्यंतःपुरजनस्तां कुलदेवीमिवापूजयत्.

अथ स बालो जातमात्रो हनुपुरे समाययौ, ततस्तस्य हनुमानित्यभिधानं माता चक्रे, वि-मानात्पतितेन तेन शिला चूर्णिता ततः शिलाचूर इत्यभिधानं प्रतिसूर्योऽकरोत. तत्र च स हनु-मान् क्रीडन् यथासुखमवर्धिष्ट मानसांभोजिनीवने राजहंसार्भक इव. अथैकस्मिन् दिनेंजना चिंत-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यति अहो श्वश्र्वाध्यारोपितो मे दोषः कथमुत्तरिष्यति? इति चिंतयांतःशल्येन दूषिता सा दिनानि निर्गमयतिस्म. इतश्च पवनो वरुणेन सह संधिं विधाय वरुणात्खरदूषणं च मोचयित्वा लब्धजयो रावणं तोषयामास. ततः सपरिवारो रावणो लंकां जगाम. पवनोऽपि रावणेन सन्मानितो विसर्जितश्च वर्षांते स्वपुरमाययौ. राज्ञा च महामहश्चक्रे, पवनंजयोऽपि पितरौ प्रणम्य पित्रा मानितः स भोजितश्च. ततोऽसावंजनासुंदरीगृहं ययौ, तत्रांजनामपश्यमानस्तत्रस्थान् जनानपृच्छत, कांजना गतेति. तदा केनचिदुक्तं, त्वन्मात्रा केतुमत्या गर्भसंभवदोषतो गृहान्निर्वासिता सा माहेंद्रनगरोपांते मुक्ता, ततो न ज्ञायते किं तस्या जातमिति. तत् श्रुत्वा खिन्नः पवनंजयः पवनरंहसा श्वशुरपत्तनं ययौ, तत्रापि प्रियामलब्ध्वा कांश्चिज्जनानपृच्छत्, भो लोकाः! वसंततिलकायुतांजना किं केनचिदिहायाता दृष्टा? ते प्रोचुः, भो पवन! अंजनेहागतासीत्परं माहेंद्रेण पित्रा तदसतीत्वदोषतो निर्वासिता. तत् श्रुत्वा पवनंजयः पविनेवाहतो भूमौ पपात मूर्छितश्च. ततः कथमपि लब्धसंज्ञो विलपन् दैवोपालंभं ददाति. यथा—येन यत्रैव भोक्तव्यं । सुखं वा दुःखमेव वा ॥ स तत्र बद्धो रज्ज्वेव । बलाद्दैवेन नीयते ॥ १ ॥ यस्मिन् देशे यदा काले । यन्मुहूर्ते च यद्दिने ॥ हानिर्वृद्धि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्यशो लाग—स्तत्तथैव च नान्यथा ॥ २ ॥ इति विचार्य स शैलवनादिषु बभ्राम. ततोऽसौ निज- मित्रं प्रहसितंप्रति प्राह, भो मित्र! अथ त्वया मे पित्रोः पार्श्वे गत्वा वक्तव्यं यदद्ययावन्मया म- हीं भ्रांत्वांजना विलोकिता, परं क्वापि सा न लब्धा. पुनरप्यहं तां गवेषयिष्यामि, चेद् द्रक्ष्यामि तर्हि साधु, नो चेदहं पावके प्रवेक्ष्यामि.

एवमुक्तः प्रहसित आदित्यपुरे गत्वा द्रुतं पह्लादकेतुमत्योस्तद्वाचिकमंजनोदंतसूचकं कथया- मास. तत् श्रुत्वा केतुमती वज्राहतेव मूर्छिता भूमौ पतिता, संज्ञां च लब्ध्वेत्युवाच—लब्धं मया- त्रैव साध्व्या । दोषारोपणजं फलं ॥ अत्युग्रपुण्यपापाना—मिहैव फलमाप्यते ॥ १ ॥ अथवा किं मया सापि । निर्दोषा परमार्थतः ॥ अविमृश्यविधायिन्या । पापिन्या निरवास्यत ॥ २ ॥ एवं रुदं- तीं प्रह्लाद—स्तां निवार्य कथंचन ॥ चचाल सूनुमन्वेष्टुं । पवनः स इवांजनां ॥ ३ ॥ अथ स राजा प्रह्लादोंजनापवनान्वेषणहेतवे सर्वेषामाप्तानां विद्याधराणामंतिके स्वान्नरान् प्रैषीत्. स्वयमपि विद्याधरैः सह सूनुं स्नुषां चालोकयन् भ्राम्यन् भ्राम्यन् भूतवनमागात्. अत्रांतरे पवनोऽप्यंजनां कु- त्राप्यनवाप्य तद्दुःखदुःखितस्तस्मिन्नेव विपिने गत्वा काष्ठचितां विरचय्य यावज्ज्वलनं ज्वालयामा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स तावद्राजा प्रह्लादस्तं पवनमिति प्रोच्यमानं ददर्श. यथा—हे वनदेवताः! अहं प्रह्लादकेतुमत्योः सुतोऽस्मि, मम पत्नी महासत्यंजना मया दुर्धिया निर्दोषापि भृशं खेदिता, ततस्तां परित्यज्याहं यात्रायां स्वामिकार्यार्थी चलितः. दैवात्पुनस्तामदोषां ज्ञात्वा तत उत्पत्य गगनाध्वना पुनरागमनं कृत्वा तां च रमयित्वाभिज्ञानमुद्रिकां च दत्वाहं पितृभ्यामपरिज्ञातः पुनः कटके समागतः. ततः सा मम कांता निरपराधापि सापराधेयमिति ज्ञात्वा मम मात्रा गृहान्निर्वासिता, परमधुना सा कास्तीति न बुध्यते. सा त्वग्रेऽधुनापि च निर्दोषास्ति, ममाज्ञानदोषेण च सेदृशं दारुणं दुःखं प्राप्ता. ततो मयाखिलां पृथ्वीं भ्रांत्वा विलोकितापि हि मदभाग्येन रत्नाकरपतितरत्नवन्न प्राप्ता. तत्कारणादहं ममात्मानं हुताशने जुहोमि, यतो जीवतो मे विरहानलो दुस्सहो वर्तते, अतोऽहं जीवितं त्यजामीत्युक्त्वा झंपां दातुं पवनो यावन्नभःस्थले प्रोत्पपात, तावत्प्रह्लादः श्रुततद्वचनो बाहुभ्यां धृत्वा वक्षस्यालिंग्य भूमौ च संस्थाप्य पुत्रंप्रत्युवाच, हे पुत्र! प्रथमं भवतो मात्रा अविमृश्य कृतं, अथ द्वितीयं त्वमप्यविमृश्य मा कृथाः? स्थिरीभव? तव स्नुषान्वेषणहेतवे मयापि सहस्रशो विद्याधरनराः प्रेषिताः संति. एवं तौ पितापुत्रौ यावद्वार्तां कुरुतस्तावता पूर्वंप्रेषिताः केऽपि विद्याधरनराः पव-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नांजने गवेषयंतो हनुपुरे गत्वा प्रतिसूर्यं नेमुः.

इतस्तत्रांजनां दृष्ट्वा ते तयोःप्रत्येवमूचुः, भो राजन्नंजनाविरहे पवनेनाग्निप्रवेशप्रतिज्ञा कृतास्ति. तत श्रुत्वांजनाया यज्जातं तदाह—दुःश्रवणं तद्वचः श्रुत्वा । पीत्वा विषमिवांजना ॥ हा हतास्मीति जल्पंती । पपात भुवि मूर्छिता ॥ १ ॥ आसिक्ता चंदनांभोभि—स्तालवृंतैश्च वीजिता॥ लब्धसंज्ञा समुत्थाय । सा रुरोदेति दीनगीः ॥ २ ॥ न मे श्वशुरयोर्दोषो । दोषः पित्रोर्न चाप्ययं॥ ममैव मंदभाग्यायाः । कर्मदोषोऽयमीदृशः ॥ ३ ॥ रुदंतीं बोधयित्वा तां । प्रतिसूर्यः सनंदनां ॥ विमानवरमारोप्य । पवनान्वेषणे ययौ ॥ ४ ॥ स भ्राम्यन् प्राप तत्रैव । वने भूतवनाभिधे ॥ दूरादपि प्रहसिते—नेक्षांचक्रे च साश्रुणा ॥ ५ ॥ अथ विमानस्थं प्रतिसूर्यं ससुतां चांजनां दृष्ट्वा प्रहसितः प्रह्लादं पवनंजयं चावधापयत. ततो विमानादुत्तीर्य प्रतिसूर्योंजनापि च भून्यस्तमस्तकौ प्रह्लादं नेमतुः. प्रह्लादोऽपि प्रतिसूर्यं समालिंग्य पौत्रं चांके निवेश्य ससंभ्रमः संजाताह्लाद एवं जगाद, भो प्रतिसूर्य ! व्यसनांभोधौ मज्जंतं मां सकुटुंबं त्वं समुध्धृतवान्, अतस्त्वमेव मम संबंधिनां धुरि वर्तसे. यत एषा दोषंविनापि त्यक्ता साध्वी स्नुषा त्वया रक्षिता, तां च रक्षता त्वया मम कुटुंब-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मपि रक्षितं. ततः पवनोऽपि प्रशांतशोकज्वलनो मुदमापन्नः सपुत्रामंजनामीक्षांचक्रे. सर्वेऽपि संबंधिनोंजना प्रशंसंति, यथा धन्यैषा सुंदरी ययेदृशेऽपि कष्टे निजशीलं रक्षितं, यतः—किं चित्रं यदि शास्त्रवेदनिपुणो विप्रो भवेत्पंडितः । किं चित्रं यदि नीतिशास्त्रनिपुणो राजा भवेद्धार्मिकः ॥ तच्चित्रं यदि रूपयौवनवती साध्वी भवेत्कामिनी । तच्चित्रं यदि निर्धनोऽपि पुरुषः पापं न कुर्यात् क्वचित् ॥ १ ॥ तदा तस्याः श्वशुरप्रमुखाः सर्वेऽपि नीतिनिपुणा विद्याधरा अंजनायाः प्रशंसां चक्रुः, ततस्ते सर्वेऽपि विद्यासामर्थ्यतो महोत्सवमकुर्वन्. ततस्ते सर्वे विमानमारुह्य हनुरुहपुरं समाययुः. अंजनाहनुमद्युतः पवनोऽपि तत्रैव सुखमनुभवन्नास्ते. पितुर्मनोरथैः सह वृद्धिं प्राप्नुवन् हनुमानपि सकलाः कला जग्राह. ताश्च लेख्यं, गणितं, रूपं, नृत्यं चेत्याद्या औपपातिकोक्ताः प्रसिद्धाः. काव्यकल्पलतादौ त्वेवं लक्षणाः—लक्षणं १ साहित्यनिरीक्षणं २ तर्क ३ सिद्धांतसंपर्क ४ लिखितं ५ गणितं ६ गीतं ७ नृत्यं ८ वादित्रं ९ विनोदः १० संदेहपरिच्छेदः ११ वास्तुशास्त्रं १२ वैद्यकशास्त्रं १३ नीतिशास्त्रं १४ ज्योतिःशास्त्रं १५ शकुनविचारः १६ स्वप्नविचारः १७ मंत्रवादः १८ रसवादः १९ गंधवादः २० तंत्रवादः २१ धातुर्वादः २२ सत्यवादः २३ अश्वलक्षणं २४ गजलक्षणं २५ पुरुषस्त्री-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लक्षणं २६ रत्नपरीक्षा २७ बलीबर्दादिनिर्णयः २८ खड्गादिविजयः २९ लेपकर्म ३० चित्रकर्म ३१ तंतुवायकर्म ३२ स्तुतिकर्म ३३ काव्यकरणं ३४ काष्टोत्कीरणं ३५ दंतघटना ३६ सुवर्णादिघटना ३७ मुष्टिभेदः ३८ पत्रछेदः ३९ इंद्रजालज्ञानं ४० क्रियाकालज्ञानं ४१ शृंगारकरणं ४२ जलतरणं ४३ रंधनं ४४ केशबंधनं ४५ कथाकथनं ४६ पुष्पग्रथनं ४७ युद्धं ४८ नियुद्धं ४९ कृषिकर्म ५० नियोगकर्म ५१ मर्द्दनकरणं ५२ वचनमर्म ५३ आरामारोपणं ५४ आकारगोपनं ५५ सुरभिवस्तुकरणं ५६ अदृश्यसंचरणं ५७ सकलदेशवेषः ५८ अशेषभाषाविशेषः ५९ शीघ्रकवित्वं ६० हस्तलाघवं ६१ दंडलक्षणं ६२ परिचितोपलक्षणं ६३ द्यूतभेदः ६४ दर्शनप्रतिभेदः ६५ रणचर्या ६६ रथचर्या ६७ वस्तुविचारः ६८ देशाचारः ६९ रसाधनसंचयः ७० कालवंचना ७१ धर्मध्यानयोगज्ञानं ७२ चैवंविधद्वासप्ततिकलाकुशलोऽसौ बभूव.

तथा विद्याधरयोग्या रोहिणीप्रज्ञप्त्यादयो विद्या अपि तेन साधिताः. भुजशौंडीरतां प्राप्तः । शस्त्रशास्त्रविचक्षणः ।। क्रमाच्च यौवनं प्राप । हनुमान् भानुमानिव ।। १ ।। सामदामभेददंडाख्याश्चतस्रो राजनीतयोऽपि तेनाधीताः. चक्रधनुर्वज्रांकुशखड्गछुरिकातोमरकुंतशूलत्रिशूलशक्तिपाशमुद्ग-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रकुद्दालदुःस्फोटगोफणगोलिकामुष्टिढुंचरदशंखफरसीखट्टिरिष्टकणककंपनकर्तरीहलमुशलकरपत्रनालि-
मावमब्रूसदंमायुधाख्यषट्त्रिंशद्विधशस्त्रकुशलोऽसौ बभूव. शब्दछंदःशास्त्रालंकारकाव्यनाटककथाना-
ख्यनिघंटुधर्मशास्त्रार्थशास्त्रकामशास्त्रमोक्षशास्त्रतर्कवादवैद्यकवास्तुशास्त्रवितानगणितगांधर्वविनोदक-
लाकृत्यकल्पशिक्षालक्षणपुराणमंत्रसिद्धांतेतिसप्तविंशतिशास्त्राणि तेनाधीतानि. एवं सकलशास्त्रवि-
शारदः संप्राप्तयौवनो द्वात्रिंशल्लक्षणोपेतो मातृपितृमनोरथैः सह वर्धितो गृहारामोपवनादिषु हनुमा-
न् क्रीडन्नास्ते. इतश्चामर्षणो रावण आज्ञापराङ्मुखं वरुणं जेतुं पुरतः प्रतस्थे. सर्वेऽपि विद्याधरे-
श्वरा दूताहूता विमानाधिरूढाः सबलवाहनयुता रावणमनुचेलुः. दूताहूतौ पवनप्रतिसूर्यावपि यावत्
प्रचेलतुस्तावद्धनुमानूचे—इहैव तिष्ठतां तातौ । जेष्याम्यहमथ द्विषः ॥ युष्मेद्धि बाहुना को हि ।
तीक्ष्णे प्रहरणे सति ॥ १ ॥ बालत्वादनुकंप्योऽस्मि । किंत्वस्मत्कुलजन्मनां ॥ पौरुषावसरे प्राप्ते ।
न प्रमाणं वचः खलु ॥ २ ॥ एवं तावतिनिर्बंधा—दापृच्छ्यासौ चचाल च ॥ ताभ्यां च चुंबितो
मूर्ध्नि । कृतप्रस्थानमंगलः ॥ ३ ॥ यतः—कन्या गौः पूर्णकुंभो दधि मधु कुसुमं पावको दीप्यमा-
नो । यानं वा गोप्रयुक्तं वररथतुरगं छत्रभद्रातिभद्रं ॥ उत्खाता चैव भूमिर्जलचरमिथुनं सिद्धमंत्रो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुनिर्वा । वेश्यास्त्रीमद्यमांसं हितमपि वचनं मंगलं प्रस्थितानां ॥ १ ॥ इत्यादिशुभशकुनैः प्रेरितो महासामंतसेनानीसैन्ययुतोऽनेकवादित्रनिनादपूरितदिगंतो महोत्सवाम्बरोत्तंभितपताकापूरितांबरो दुर्वारविक्रमो हनुमान् रावणस्कंधावारे प्रययौ. रावणोऽपि हनुमंतं जयश्रियमिव समायांतं प्रणमंतं च विलोक्य मुदा स्वांके निदधे, कुशलं च पप्रछ. ततश्चलितो रावणो वरुणपुर्या अन्यर्णमागत्य युद्धाय तस्थौ.

इतः पातालस्लंकातः शतशो वरुणपुत्रा दोष्मंतो विद्यावंतो गर्वपर्वता निर्गत्य रावणमभ्येत्य योधयामासुः. वरुणोऽपि सुग्रीवाद्यैर्वीरैः समं युयुधे. ते महौजसो वरुणपुत्राः संग्रामे रावणं खेदयामासुः. अत्रांतरे पवनपुत्रो हनुमान् क्रोधदुर्धरो दारुणैर्वरुणात्मजैः कुंजरैः सह केसरीवायोधयत. अथ हनुमान् रावणांतरे निपत्य वरुणपुत्रान् विद्यासामर्थ्यतो जित्वा बबंध. ततो वरुणः स्वान् पुत्रान् बद्धान् दृष्ट्वा क्रोधारुणो हनुमतेऽभ्यधाविष्ट. ततो रावणः सुग्रीवाद्यैः परिवृतो वरुणं हनुमत उपरि गच्छंतं दृष्ट्वांतरा रुरोध, तदा वरुणो बाणधोरणीर्वर्षन् शुशुभे, यथा—वृषभो वृषभेणेव । कुंजरेणेव कुंजरः ॥ वरुणो रावणेनोच्चैः । क्रोधांधो युयुधे चिरं ॥ १ ॥ ततो रावणः शरसमूहैर्वरुण-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माकुलीकृत्य बलेनोत्पत्येंद्रमिवाबध्नात्. ततो जयजयारावै—र्मुखरीकृतदिङ्मुखः ॥ स्कंधावारं पृथुस्कंधो । जगाम दशकंधरः ॥ १ ॥ ततः सपुत्रो वरुणो रावणं प्राणमत्. एवं निजवशवर्तिनं दुःखभारभराक्रांतं म्लानमुखं दीनवचनं च तं दृष्ट्वा करुणापरो रावणो वरुणाय राज्यं दत्वा मुमोच. यतो महात्मनां कोपः प्रणिपातांतो वर्तते, यतः—क्रमेण भूमिः सलिलेन भिद्यते । क्रमेण कार्यं विनयेन सिध्यति ॥ क्रमेण शत्रुः कपटेन हन्यते । क्रमेण मोक्षः सुकृतेन लभ्यते ॥ १ ॥ अथ मुक्तो वरुणो हर्षितो हनुमते स्वां पुत्रीं सत्यवतीनाम्नीं ददौ. यतो निश्चितमीदृग्जामाता दुर्लभो वर्तते, यतः—कुलं च शीलं च सनाथता च । विद्या च वित्तं च वपुर्वयश्च ॥ वरे परं सप्त गुणा विलोक्या—स्ततः परं भाग्यवशा हि कन्या ॥ १ ॥

एवं ज्ञात्वा रावणेनापि चंद्रणखापुत्री अनंगकुसुमा हनुमते दत्ता, ततो रावणः सबलवाहनो लंकामगात्. तत्रापि सुग्रीवेण हरिमालिनी निजपुत्री हनुमते दत्ता. अन्यैरपि विद्याधरसहस्रैः कन्यकासहस्राणि हनुमते दत्तानि. हनुमानपि तासां पाणिग्रहणं कृत्वा रावणेनालिंगितो मानितः पूजितो विसृष्टो दोष्मानिति सर्वैर्विद्याधरैः प्रशंसितो हनुपुरे समाजगाम. मातापितृभ्यां च महामह-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्चक्रे. अन्येऽपि विद्याधराः सुग्रीवप्रमुखा रावणेन विसृष्टा हृष्टमनसो निजं निजं नगरं जग्मुः. ॥ इति श्रीमत्तपागच्छे भट्टारकश्रीहीरविजयसूरिराज्ये आचार्यश्रीविजयसेनसूरियौवराज्ये पंडितश्रीदेवविजयगणिविरचिते श्रीरामचरित्रे गद्यबंधे हनुमदुत्पत्तिवरुणसाधनो नाम तृतीयः सर्गः समाप्तः ॥ ॥ श्रीरस्तु ॥

---

॥ अथ चतुर्थः सर्गः प्रारभ्यते ॥

इतश्च मिथिलायां नगर्यां हरिवंशे वासकेत्वाख्यो महीपतिरासीत्, तस्य विपुलानाम्नी प्रिया, तयोः सूनुरनूनश्री—र्बभूव भुवि विश्रुतः ॥ प्रजानां पालनाल्लोके । जनको जनकाभिधः ॥ १ ॥ इतश्चायोध्या नाम नगरी वर्तते, सा कीदृश्यस्तीत्याह—पृथ्वीतलतिलकायमाना, सर्वसौंदर्यनिधाना, उज्ज्वलदेवकुलसहस्रैर्मंडिता, परचक्रैरखंडिता, अतुलधवलगृहैर्विभूषिता, उत्तुंगविस्तीर्णप्राकारपरिवेष्टिता, अगाधपरिखावलयवेष्टिता, सर्वाश्चर्यनिलया, वापीकूपमंडितपरिसरा, चतुर्दिक्षु विराजमानसरोवरा, उद्यानवाटिकाभिरामा, दृश्यमानविविधारामा, जनितदुर्जनक्षोभा, सुजनजनितशोभा,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरुषरत्नोत्पत्तिरत्नखनिः, कुलवधूकल्पलता चास्ति. तस्यां नगर्यां देवगृहाणि मेरुशिखरोपमानि, धवलगृहाणि सुरविमानसमानानि, गजेंद्रा ऐरावणानुकारिणः, अश्वा उच्चैःश्रवोऽनुसारिणः, वृषभाः शिववाहनानुयायिनः, रथाः सूर्यरथानुकारिणश्च संति, किंच तस्यां नगर्यां चतुरशीतिश्चतुष्पथानि संति, यत्र कुत्रिकापणसौवर्णकर्पासधान्यघृततैलमणिकारकांदविकप्रभृतीनामापणानि संति. लोकस्तत्रास्ति निर्लोभो । दानी लुब्धो यशोऽर्जने ॥ अकृत्यकरणे भीरु—रसंतुष्टो गुणग्रहे ॥ १ ॥ परस्वहरणे पंगुः । परस्त्रीदर्शनेंधकः ॥ मूकश्च परदोषोक्ता—वज्ञश्च परयाचने ॥ २ ॥ उन्नेषु दंभश्चिकुरेषु बंधः । सारेषु मारी श्रवणे जनानां ॥ हारेषु छिद्रत्वविलोकनानि । यस्यां विवाहे करपीडितानि ॥ ३ ॥ एवंविधायामयोध्यायां श्रीवृषभस्वामिराज्यादनंतरं भरतादित्ययशोमहायशोऽतिबलबलवीर्यदंडवीर्यजलवीर्यकार्तकवीर्यादिष्वसंख्येषु नृपेषु गतेषु केषुचिन्मोक्षं केषुचिच्च स्वर्गं मुनिसुव्रतस्वामितीर्थे विजयो नाम राजा बभूव, तस्य राज्ञो हिमचूला नाम पट्टराज्ञी, तयोर्द्वौ पुत्रावभूतां वज्रबाहुपुरंदरनामानौ.

इतश्च नागपुरे नगरे इंद्रवाहनराज्ञश्चूडामणीराज्ञीकुक्षौ मनोरमानाम्नी पुत्र्यभूत. एकस्मिन्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिने वज्रबाहुकुमारस्तां मनोरमां परिणेतुं नागपुरे गतः. तत्र गत्वा मनोरमां च परिणीय स पश्चा-
द्वलितः श्यालेनोदयसुंदरेण सहितो विमानारूढो मनोरमामादाय स्वपुरीमयोध्यांप्रति प्रतस्थे. मा-
र्गे गच्छन् वज्रबाहुकुमारः कायोत्सर्गस्थमातापनापरं तपस्तेजोऽग्निशमं गुणसागरनामानं मुनिं ददर्श.
तं दृष्ट्वा स चिंतयति—अहो महात्मा कोऽप्येष । विद्यते हि महामुनिः ॥ चिंतामणिरिव मया ।
दृष्टः पुण्येन भूयसा ॥ १ ॥ उदयसुंदरोऽप्यूचे । नर्मणाथ कुमार किं ॥ आदित्ससे परिव्रज्यां ।
सोऽवदच्चित्तमस्ति मे ॥ २ ॥ उदयो नर्मणा भूयः । प्रोचे यद्यस्ति ते मनः ॥ तदद्य मा विलंब-
स्व । सहायोऽहं महीप ते ॥ ३ ॥ ततो वज्रबाहुकुमार उदयं श्यालकंप्रत्येवं व्याजहार भो मित्र!
समुद्र चंद्रमा इव स्वां प्रतिज्ञां मात्याक्षीः. ततो वज्रबाहुकुमारो वाहनान्मोहगजाच्च समुत्तीर्य गुण-
सागरमुनिंप्रति ययौ, उदयसुंदरंप्रत्युवाच च, भो उदय! त्वं सज्जो भव? यथा संयमं गृह्यते. त-
दोदयो वक्ति भो कुमार! मया तु हास्येनोक्तं, किं त्वया तत्सत्यं ज्ञातं? नर्मोक्तिव्यतिक्रमे कश्चि-
दपि दोषो नास्ति, आवयोर्नर्मोक्तिरसत्या भवतु धवलगीतवत. कुमारेणोक्तं—अलसायंतेणवि स-
ज्जणेण । जे अक्खरा समुल्लविया ॥ ते पत्थरटंकुक्कीलिया—रकरव न अण्णहा हुंति ॥ १ ॥ अहं तु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दीक्षामादास्ये, त्वं मम मनोरथान्मा भांक्षीः, एते दशप्रकाराः पुरुषा धर्मं न जानंति, यतः—दश धर्मं न जानंति। धृतराष्ट्र निबोधनात्॥ मत्तः प्रमत्त उन्मत्तः। क्रुद्धः श्रांतो बुभुक्षितः॥१॥ त्वरमाणश्च रक्तश्च। लुब्धः कामी च ते दश॥ त्वं तु बुद्धियुतो धर्म—विज्ञाता सज्ञानस्तथा॥ ॥२॥ अतस्त्वं धर्मविघ्नं माकार्षीः. उदयश्यालकेनोक्तं भो कुमार! इदं मांगल्यकंकणमपि तव हस्ताच्चुटितं नास्ति, अतो विवाहफलं भुंक्ष्व? तथेमां मनोरमां मद्भगिनीं सांसारिकसुखास्वादात्कथं वंचसि, तृणवच्च कथं त्यजसि? अनुरक्तां चैनां मात्याक्षीः. तावता वज्रकुमारेणोक्तं हे मित्र! एषा तव स्वसा सत्कुलीना भर्तुरनुगामिनी भवतु, चेन्न तर्हि पितृगृहे यातु, परं मम तु भोगैरलं. अतस्त्वं मां प्रव्रज्यायै अनुमन्यस्व? त्वमपि क्षत्रियत्वात्स्वां प्रतिज्ञां पालय? यतः—सकृदपि यत्प्रतिपन्नं। तत्कथमपि न त्यजंति सत्पुरुषाः॥ नेंदुस्त्यजति कलंकं। नोज्झति वडवानलं सिंधुः॥१॥ एवमुदयश्यालकं प्रतिबोध्य वज्रबाहुकुमारो मनोरमाराज्ञीपंचविंशतिकुमारसहितो गुणसागरमुनिपादांते प्रवव्राज.

ततो विजयराजा वज्रबाहुकुमारं सपरिकरं प्रव्रजितं श्रुत्वा मनसि चिंतयति धन्य एष बालो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वज्रबाहुर्येन बालेनापि दीक्षा गृहीता. एवं भावनां भावयित्वा पुरंदरं पुत्रं च राज्ये न्यस्य निर्वाण-
मोहमुनेः पार्श्वे व्रतमुपाददे. पुरंदरोऽपि राजा कतिचिद्वर्षाणि राज्यं कृत्वा स्वे राज्ये पृथ्वीराज्ञीकु-
क्षिजं निजं पुत्रं कीर्तिधरं संस्थाप्य क्षेमंकरमुनिसमीपे दीक्षां जग्राह. अथ कीर्तिधरो राजा सहदे-
व्या पत्न्या सममिंद्र इंद्राण्येव वैषयिकं सुखं भुक्त्वा वैराग्यवान् प्रव्रजितुकामो मंत्रिणमपृछत्, भो
मंत्रिन्नहं दीक्षामादास्ये. मंत्रिणोक्तं हे राजन्! तवानुत्पन्नपुत्रस्य व्रतादानं नार्हति, अतः स्वामिन्न-
नुत्पन्ने पुत्रे राज्यं याति, गते च राज्ये निर्नाथा वसुंधरा पीड्यते. ततः स्वामिन् यावत्पुत्रो भवति
तावत्त्वं प्रतीक्षस्व, इति कथयित्वा स गृहे स्थापितः. क्रमेण सहदेव्या राज्ञ्याः सुकोशलाभिधः पु-
त्रो जातः, राज्ञो व्रतभिया च राज्ञ्या स गोपितः, परं तं गुप्तमपि बालकं कीर्तिधरमेदिनीनाथो वि-
वेद, यतः प्राप्तोदयं तरणिं गोपयितुं कः समर्थो भवेत्? ततो राजा तं बालं सुकोशलं राज्ये न्य-
स्य व्रतमुपाददे. स कीर्तिधरो मुनिरेकादशांगान्यधीत्य श्रुतपारगो गुरुणानुज्ञात एकाकित्वविहारे-
ण विहरमाणः पृथिव्यां विहरतिस्म. सुकोशलः क्रमेण राज्यं पालयन् ववृधे, यौवनं प्राप्तश्च स सह-
देव्या राज्ञ्या पाणिग्रहणं कारितो देव्या सह देव इव वध्वा समं रेमे.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथैकस्मिन् दिने कीर्तिधरो मुनिर्मासोपवासपारणके भिक्षार्थमयोध्यायां भ्रमन् सुकोशलगृहासन्ने समाजगाम. तस्मिन् समये सौधाग्रस्थया सहदेव्या पत्न्या स्वपतिं कीर्तिधरमुनिं दृष्ट्वा चिंतितमहोऽनेन प्रव्रजता पूर्वं पतिहीनाभवं, सांप्रतं चेत्सुकोशलोऽप्येनं दृष्ट्वा प्रव्रजिष्यति तदाहं निर्वीरा भविष्यामि, अत एनं निरपराधं व्रतस्थितं भर्तारमपि पुत्रराज्यचिकीर्षया नगरात्सेवकेन निर्वासयामीति चिंतयित्वा सा तथाकरोत्. अहो! संसारे लोभाभिभूतो जनः किं किं न करोति? यतः—यद्दुर्गामटवीमटंति विकटं क्रामंति देशांतरं । गाहंते गहनं समुद्रमतनुक्लेशां कृषिं कुर्वते ॥ सेवंते कृपणं पतिं गजघटासंघट्टदुःसंचरं । सर्पंति प्रधनं धनांधितधियस्तल्लोभविस्फुर्जितं ॥ १ ॥ यौवनं जरया ग्रस्तं । शरीरं व्याधिपीडितं ॥ मृत्युराकांक्षति प्राणां—स्तृष्णैका निरुपद्रवा ॥ २ ॥ एवं लोभाभिभूतया विवेकरहितया सहदेव्या राज्ञ्या सुकोशलमात्रा निर्वासितो मुनिः सुकोशलधात्र्या दृष्टः, दृष्ट्वा च तया रुदितं, तदा सुकोशलेन पृष्टं भो मातस्त्वं किं रोदिषि? धात्र्योक्तं पुत्र! तव पिता कीर्तिधरमुनिर्मासोपवासांते भिक्षार्थमत्रागतस्तव मात्रा सहदेव्या नगरान्निर्वासितः, अनेन दुःखेनाहं रोदिमि. सुकोशलस्तत् श्रुत्वा पितुः समीपे गत्वा पितुः पादौ च नत्वा बद्धांजलिर्व्रतम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



याचत. तस्मिन् समये सुकोशलपत्नी चित्रमाला गर्भवती मंत्रिभिः सह परिवृतागत्य सुकोशलं स्व-स्वामिनमेवमुवाच, भो स्वामिन्नस्वामिकं राज्यं त्यक्त्वा त्वं दीक्षां गृहीतुं नार्हसि, अस्माकं निर्नाथानां च का गतिः? यतः—दुर्बलानामनाथानां। बालवृद्धतपस्विनां॥ अन्यायैः परिभूतानां। सर्वेषां पार्थिवो गतिः॥ १॥

सुकोशलेनोक्तं हे सुंदरि! तव गर्भस्थोऽपि मम पुत्रो मया राज्ये स्थापितो भाविनि भूतोपचारन्यायात्. गर्भस्थोऽप्येष तव पुत्रो राजा भवत्वित्युक्त्वा सकलं लोकं संभाष्य पितुः समीपे सुकोशलः प्रवव्राज, दुस्तपं च तपस्तेपे, यथा—निर्ममौ निष्कषायौ तौ। पितापुत्रौ महामुनी॥ विजह्रतुर्युतावेव। पावयंतौ महीतलं॥ १॥ तनयस्य वियोगेन। खेदिता सहदेव्यपि॥ आर्तध्यानपरा मृत्वा। व्याघ्रभूद्गिरिगह्वरे॥ २॥ यतः—अट्टेण य तिरियगई। रुद्दझाणेण गमइ नरयंमि॥ धम्मेण देवलोए। सिद्धिगइं सुक्कझाणेणं॥ १॥ इतश्च तौ कीर्तिधरसुकोशलमहामुनी पितापुत्रौ चतुर्मासकरणार्थमेकस्य गिरेर्गुहायां तस्थतुः. तौ च तत्र निःस्पृहौ स्वशरीरेऽपि निर्ममौ स्वाध्यायतत्परौ ध्यानपरायणौ चास्तां. चतुर्मासादनंतरं कार्तिके मासि पारणाय प्रयांतौ तौ तया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याघ्र्या यमभगिन्येव दृष्टौ. ततः सा दुष्टा स्फारितानना शीघ्रं तावभिदधावे. साधू अपि तां व्याघ्रीमापतंतीं दृष्ट्वा धर्मध्यानं प्रपेदानौ कायोत्सर्गेण तस्थतुः. यतः—प्राणांतेऽपि न भंक्तव्यं । गुरुसाक्षीकृतं व्रतं ॥ व्रतभंगो हि दुःखाय । प्राणा जन्मनि जन्मनि ॥ १ ॥ सा व्याघ्री तौ मुनी दृष्ट्वा धाविता सुकोशलं मुनिं पादप्रहारेण पृथ्व्यामपातयत्, पातयित्वा च तं भक्षयितुं लग्ना. यथा-वदिति तच्चर्म । दारंदारं नखांकुशैः ॥ पापा सापादसृक्तस्य । वारीव मरुपांथिकः ॥ १ ॥ त्रोटयित्वा त्रोटयित्वा । त्रटत्त्रटिति सा रदैः ॥ जग्रसे मांसमपि हि । वालुंकीमिव रंकिका ॥ २ ॥ दंतयंत्रा-तिथीचक्रे । कर्कशा कीकसानि सा ॥ स्फाटंस्फाटं स्वदंतैश्च । करपत्रारसन्निभैः ॥ ३ ॥ एवं स्वजी-वक्षयकारिकायै अपि तस्यै स मनागपि न चुकोप, किंतु हृद्येवमचिंतयत—सह कलेवर खेदमचिं-तया । स्ववशता हि पुनस्तव दुर्लभा ॥ परवशे तु सहिष्यसि जीव हा । परवशे न च तत्र गुणोऽस्ति ते ॥ १ ॥

एवं व्याघ्र्या खाद्यमानः शुक्लध्यानेन तत्क्षणोत्पन्नकेवलो मुनिः सुकोशलो मोक्षं ययौ, व्याघ्र्यपि तं सुकोशलं खाद्यमाना यावता तन्मुखं भक्षयति तावता तन्मुखे सुवर्णरेखां दृष्ट्वा जातिस्मृ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्या तं स्वपुत्रं ज्ञात्वा स्वात्मानं निंदतिस्म, अहो मया पापिन्या किं कृतं! पुत्रमांसं भक्षितं, धिग्धिग्मां दैवदूषितां पुत्रमारिकां च! अथ कथं मे भविष्यतीत्यादिचिंतया भूमौ शिरः स्फालयंती कीर्तिधरेण मुनिना प्रतिबोधिता, अनशनं च कारिता देवलोकं ययौ, कीर्तिधरो मुनिरपि समुत्पादितकेवलः सुखाद्वैतास्पदं मोक्षं क्रमादासादयामास. इति सुकोशलमहामुनिकथा समाप्ता.

इतश्च सुकोशलनृपप्रिया चित्रमाला कुलनंदनं हिरण्यगर्भाख्यं नंदनं सुषुवे, महामहेन जातमात्रोऽसौ राज्ये स्थापितः, क्रमेण प्राप्तयौवनश्च मृगावतीप्रभृतीर्बहुराजकन्याः परिणायितः, ताभिः सह स सुखं रेमे, ततो हिरण्यगर्भराज्ञो मृगावत्याः पट्टराज्ञ्या नघुषो नाम नंदनोऽभूत, एकस्मिन् दिने मृगावत्या राज्ञ्या हिरण्यगर्भराज्ञो मस्तकं विलोकयंत्या तत्र पलितं दृष्टं, राज्ञो दर्शितं च, तदा राजा चिंतयति, धिग्मां जराग्रस्तं! यदेतावंति दिनानि मया किमपि सुकृतं न कृतं, अथ किं करिष्ये जराग्रस्तः? किमपि कर्तुं न शक्नोमीति ध्यायंतं राजानं राज्ञ्यूचे, यथा—अलंकरोति हि जरा। राजामात्यभिषग्यतीन्॥ विडंबयति पण्यस्त्री—मल्लगायनसेवकान्॥ १॥ अतस्त्वं दुःखं मा विधेहि? राज्ञो हि जरा मंडनं करोति, राज्ञोक्तमलं राज्येनालं भोगेन च. ततस्तदैव नघुषसुतं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वे राज्ये न्यस्य स्वयं विमलमुनिपादांते व्रतं लात्वा संयमं च प्रपाल्य शिवमगमत्. नघुषस्य राज्ञः सिंहिकानाम्नी पट्टराज्ञ्यभूत्, तया सह रममाणः स पैतृकं राज्यमन्वशात्.

अथान्यदा नघुषराट् सिंहिकादेवीं स्वे राज्ये संस्थाप्य स्वयमुत्तरापथनृपालान् जेतुं जगाम. तदा दक्षिणापथनृभुज आगत्यायोध्यां रुरुधुः, यतश्छलनिष्ठा हि वैरिणः. सिंहिकापि सज्जीभूय तान् दक्षिणापथनृभुजः सिंही द्विपानिव वित्रासयामास. इतो राजा नघुषोऽप्युत्तरापथनृपान् जित्वा समागतः पत्न्या जयोदंतं श्रुत्वेति दध्यौ, अहो ईदृशं धाष्टर्यं महाकुलप्रसूतानां महिलानां न युज्यते, इति विचिंत्य तां सिंहिकामसतीं मत्वा परिजहार. नघुषस्यान्यदा दाघज्वरः समुत्पद्यत, उपचारशतैरपि स न प्रशशाम, तदा सिंहिकापट्टराज्ञ्या राज्ञोऽग्रे समागत्य निजसतीत्वप्रकटनायोक्तं हे नाथ! मया चेदन्यः पुरुषो मनसापि ध्यातो न भवेत्तदा ते ज्वरो यात्विति कथयित्वा यावत्सांभसा निजं पतिं सिषेच, तदैव राजा सुधाधौत इव ज्वरान्मुक्तः, सिंहिकायाश्चोपरि देवाः पुष्पवृष्टिं व्यधुः, शीलं हि सर्वत्र कामधुक्. यतः—व्याघ्रव्यालजलानलादिविपदस्तेषां व्रजंति क्षयं । कल्याणानि समुल्लसंति विबुधाः सांनिध्यमध्यासते ॥ कीर्तिः स्फुर्तिमियर्ति यात्युपचयं धर्मः प्रणश्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्यघं । स्वर्निर्वाणसुखानि संनिदधते ये शीलमाबिभ्रते ॥ १ ॥ तद् दृष्ट्वा राजा तां सिंहिकां बहु-मेने. ततः प्रभृति च तया सह सुखमनुभवतस्तस्य नृपस्य कालेन सोदासो नाम नंदनोऽभवत्. ततो नघुषराट् सोदासे राज्यमारोप्य दीक्षामुपाददे.

अथ तस्मिन् सोदासे राज्यं कुर्वाणे एकस्मिन् दिनेऽष्टाह्निकोत्सवे पूर्वराज्यवन्मंत्रिणोऽमारिं घोषयामासुः. ततो मंत्रिभिः सोदासंप्रत्यूचे हे राजंस्तव पूर्वजैरर्हदष्टाह्निकोत्सवे कैरपि मांसं नास्वादि, अतस्त्वमपि मास्मस्वादीः, सोदासेन मंत्रिवचः प्रतिपन्नं, मंत्रिणश्च स्वस्थानं जग्मुः. ततः सोदासः सूपकारमवदत्, भो सूपकार त्वयातःपरं मदर्थमवश्यं प्रछन्नं मांसमानेतव्यं. सूदो व्यचिंतयदद्य किं करोमि? अमार्यां घुष्टायां मांसं कुतोऽपि न लभ्यते. इति चिंताप्रपन्नस्य तस्य बुद्धिरुत्पन्ना, तेन च स श्मशाने गत्वा मृतार्भकमादाय तस्य मांसं च संस्कृत्य सोदासाय ददौ. सोदासोऽपि तन्मांसं भुक्त्वा भुक्त्वेत्यवर्णयत्, यथा अहोऽमुष्य मांसस्य कोऽप्यतीवमनोहरो रसोऽस्ति. ततो राजा सूपकारं पप्रछ, भो सूपकार! त्वं सत्यमाख्याहि कस्येदं मांसं? सूपकारेण यथातथोक्ते राजा प्रत्यहं नृमांसं याचतेस्म. सूदोऽपि लोकार्भकान् हत्वा संस्कृत्य च राज्ञे ददाति, लोके च कोलाह-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षो जातः, तत्स्वरूपं मंत्रिभिरपि ज्ञातं, तदा ते सोदासं पापिनं ज्ञात्वा करे च धृत्वारण्येऽत्यजन् गृहोत्पन्नोरगमिव, धिग्व्यसनानि, यतः—मांसास्वादनलुब्धस्य । देहिनं देहिनंप्रति ॥ हंतुं प्रवर्तते बुद्धिः । शाकिन्या इव दुर्धियः ॥ १ ॥ यूताद्राज्यविनाशनं नलनृपः प्राप्तोऽथवा पांडवो । मद्यात्कृष्णहरिः स राघवपिता पापर्द्धितो दूषितः ॥ मांसात् श्रेणिकभूपतिश्च नरके चौर्यान्मृतः खर्परो । वेश्यायां निधनं गतो वररुचिः स्त्रीभावतो रावणः ॥ २ ॥

ततस्तैर्मंत्रिभिः सोदासपुत्रः सिंहरथो राज्ये स्थापितः. सोदासश्चाटव्यां मुक्तो निरर्गल मांसं खादन् दक्षिणापथे गतः, तत्र तस्य भ्रमतः कश्चिन्मुनिरेको मिलितः. तस्य समीपे स धर्ममपृच्छत्. मुनिनापि योग्यं ज्ञात्वा तस्यार्हतो धर्मो मद्यमांसपरिहारप्रधान उपदिष्टः, तं धर्मं श्रुत्वा जवाद्धीतोऽसौ प्रसन्नहृदयः श्रावको भूत्वा धर्मं पालयन् महापुरे नगरे गतः, तत्रापुत्रो राजा मृतः, मंत्रिभिः पंचदिव्यानि प्रकटितानि, यथा गजोऽश्वः कलशश्छत्रं चामरे च. अथ यत्र स सोदासोऽस्ति तत्र सपरिकरेण गजेनागत्य निजशुंडाग्रस्थकलशेनाभिषिच्य गर्जितं, अश्वेन हेषितं, छत्रेण विकसितं, चामराभ्यां च वीजितं, एवं तस्य सोदासस्य राज्यं जातं, तेन स महापुरे नगरे राज्यं करोतिस्म.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततोऽसौ सोदासो निजपुत्रं सिंहरथंप्रति दूतं प्राहिणोत्, दूतेन तत्र गत्वा प्रोक्तं भो सिंहरथ! त्वं सोदासस्याज्ञां मन्यस्व? सिंहरथेन तिरस्कृतः स दूतो गत्वा सोदासंप्रत्यूचे, एष सिंहरथस्तवाज्ञां न मन्यते, तदा कुपितः सोदासः सिंहरथेन समं युयुधे. प्रांते सिंहरथं जित्वा वक्षसि चालिंग्य तस्मै राज्यद्वयं दत्वा सोदासः स्वयं प्रवव्राज. ॥ इति सोदासकथा ॥

सोदासपुत्रः सिंहरथः, तत्पुत्रो ब्रह्मरथः, तत्पुत्रश्चतुर्मुखः, तत्पुत्रो हेमरथः, तत्पुत्रः शतरथः, तत्पुत्र उदयः, तत्पुत्रः पृथुः, तत्पुत्रो वारिरथः, तत्पुत्र इंदुरथः, तत्पुत्र आदित्यरथः, तत्पुत्रो मांधाता, तत्पुत्रो नृपवीरसेनः, तत्पुत्रो मन्युनृपः, तत्पुत्रः पद्मबंधुः, तत्पुत्रो रविमन्युः, तत्पुत्रो वसंततिलकः, तत्पुत्रः कुबेरदत्तः, तत्पुत्रः कुंकः, तत्पुत्रः शरभः, तत्पुत्रो द्विरचः, तत्पुत्रः सिंहदशनः, तत्पुत्रो हिरण्यकशिपुः, तत्पुत्रः पुंजस्थलः, तत्पुत्रः ककुस्थः, तत्पुत्रश्च रघुः. तेषां मध्यात्केषुचिन्मोक्षं प्राप्तेषु, केषुचिच्च स्वर्गं प्राप्तेषु रघुपुत्रोऽनरण्योऽभूत् प्रणयिनामानृण्यकरणात् साकेतपुरे नगरेऽयोध्यापरपर्याये. तस्यानरण्यनृपस्य पृथ्वीदेव्याः कुक्षितो द्वौ पुत्रावभूतां, एकोऽनंतरथो द्वितीयो दशरथश्च. अनरण्यमित्रं सहस्रकिरणो रावणेन जितो वैराग्याद् व्रतं भेजे. तत्सखानरण्योऽपि वृद्धपु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रानंतरथसहितो लघुपुत्रे दशरथे राज्यं न्यस्य व्रतमाददे, निर्मलं संयमं च प्रपाल्यानरण्यराजर्षि मोक्षमगमत्. अनंतरथस्तपस्तप्यमानो वसुंधरां विजहार. बालोऽपि राजा दशरथो वयसा विक्रमेणापि क्रमाद् वृद्धिमासादयत्. अथ यथा रजनी चंद्रेण, नभः सूर्येण, प्रासादो देवेन, पुष्पं भ्रमरेण, युवती यौवनेन, वल्ली कुसुमेन, कुलं पुरुषेण, मुखं तांबूलेन, राजा छत्रेण, नगरं दुर्गेण, काननं कल्पवृक्षेण, योगी ध्यानेन, धनी दानेन, राजा राज्येन, राज्यं गजेन तथा दशरथेन तद्राज्यं शुशुभे. किंच तस्मिन् दशरथे राज्यं कुर्वति स्वचक्रपरचक्रादिभयमदृष्टपूर्वमेवासीत् खपुष्पवत्. तस्य राज्ञो दानं ददतो राज्यं पालयतो लोकस्थितिं च कुर्वतो दिनानि यांतिस्म. यथा—

करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणमनं । मुखे सत्या वाणी विजयिभुजयोर्वीर्यमतुलं ॥ हृदि स्वच्छा वृत्तिः श्रुतमधिगतं च श्रवणयो—र्विनाप्यैश्वर्येण प्रकृतिमहतां मंडनमिदं ॥ १ ॥ दाक्षिण्यं स्वजने दया परजने शाठ्यं सदा दुर्जने । प्रीतिः साधुजने नयो नृपजने विद्वज्जनेष्वार्जवं ॥ शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता । ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः ॥ २ ॥ स दशरथः साम्राज्यमिव निजवंशक्रमायातं श्राद्धधर्ममर्हत्प्रणीतं दधौ. इतश्चात्रस्थल-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरे राज्ञः सुकोशलस्यामृतप्रभाख्यराज्ञीकुक्षिजामपराजिताभिधां पुत्रीं लावण्यशालिनीं चारुलोचनां च दशरथ उदवाहयत संग्रामे जयश्रियमिव. तथैव कमलपुरेशबंधुतिलकस्य राज्ञो मित्राभिधराज्ञीकुक्षिजां कैकेयीं सुमित्रेत्यपरनाम्नीं द्वितीयां पत्नीं दशरथ उपयेमे. सुप्रभाभिधामन्यामपि राजपुत्रीं स उपयेमे. एवं ताभिः पत्नीभिः समं दशरथो राजा धर्मार्थकामानामबाधया वैषयिकं सुखं बुभुजे. इतश्च दशकंधरो भरतार्धं भुंजानो निजसभायां संस्थित एकदा नैमित्तिकोत्तममपृच्छत्, भो नैमित्तिकोत्तम शृणु? अमरा अपि मृत्युमाप्नुवंति, अतः सर्वसाधारणो मृत्युः, संसारेऽतःपरं भयं नास्ति. यतः—पंथसमा नत्थि जरा । दारिद्दसमो पराभवो नत्थि ॥ मरणसमं नत्थि भयं । खुहासमा वेयणा नत्थि ॥ १ ॥ अथ पृच्छतो मम मृत्युः स्वतः परतो वा भविष्यतीति ज्ञानेन ज्ञात्वा यथातथ्यं ममाख्याहि? नैमित्तिकोऽप्याचख्यौ, भो रावणराजेंद्र! जनकपुत्र्याः कारणेन दशरथपुत्रात्तव मृत्युर्भविष्यति, तावता बिभीषणो बभाषे, भो बांधव! त्वं चिंतां मा विधेहि? अहं जनकं दशरथं च हनिष्यामि यथोत्पत्तिरेव तयोर्निषिद्धा, एवं च नैमित्तिकेनोक्तं मिथ्यैव भविष्यति, आमेत्युक्ते रावणेन बिभीषणः स्ववेश्मन्यागात.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ तत्रस्थो नारदस्तत श्रुत्वा दशरथपार्श्वे ययौ, दशरथश्च देवमुनिं दृष्ट्वाभ्युत्तस्थौ, नमस्कारं च कृत्वा आसनदानपूर्वकं तमपृच्छत, भो देवर्षे! त्वं कुतः स्थानात्समागतः? इति पृष्टे नारदो जगौ भो दशरथ! अहं पूर्वविदेहे पुंडरीकिणीं नगरीं गतोऽभवं, तत्र श्रीसीमंधरनाथस्य सुरासुरैर्विहितं निष्क्रमणोत्सवं दृष्ट्वाहं मेरुपर्वते गतः, तत्र तीर्थेशान्नत्वा लंकायामहं गतवान्. तत्र शांतिजिनं नंतुं रावणालयं गतः, तदा रावणेन नैमित्तिकः पृष्टो यथा मम मृत्युः कुतो भविष्यति? नैमित्तिकेनोक्तं जनकपुत्रीनिमित्तेन दशरथपुत्राद्भविष्यति, तद्वचः श्रुत्वा बिभीषणस्त्वां जनकं च हंतुं सांप्रतं समेष्यति, एतत्सर्वं मया दृष्टं कर्णाभ्यां श्रुतं च. श्रुत्वा च साधर्मिकत्वात्प्रीत्या तत्र कथयितुं समागतोऽस्मि. तत श्रुत्वा राज्ञाभ्यर्च्य विसृष्टो नारदो गत्वा जनकाय तथैव कथयामास, कथयित्वा च नारदोऽन्यत्र गतः, दशरथेन राज्ञा तत्स्वरूपं मंत्रिणामुक्तं, मंत्रिणो दाशरथीं मूर्तिं लेप्यमयीं कृत्वा ध्वांते च मुक्त्वा द्विषन्मोहहेतवे सेवंतेस्म. अथ दशरथो मंत्रिणे राज्यं समर्प्य स्वयं कालवंचनां कर्तुं नगरान्निर्ययौ, जनकोऽपि तथैवाकरोत. एवं कालक्षेपं कर्तुं तौ द्वावपि देशांतरमगच्छतां. यतः—अशुभस्य कालहरणं। कालेन क्षीयतेऽशुभं ॥ चिंतां मा वहसि तात। कालः कालो भ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विष्यति ॥ १ ॥ कालेन पच्यते धान्यं । फलं कालेन पच्यते ॥ वयसा पच्यते देहः । पापी पापेन पच्यते ॥ २ ॥ इति ज्ञात्वा तौ देशांतरे भ्रेमतुः.

इतश्च बिभीषणो दशरथगृहे समागतो मंत्रिणमपृछत, कुत्रास्ति दशरथ इति. मंत्रिणा दर्शितो लेप्यमयो दशरथो ध्वांते स्थितः, क्रोधांधेन बिभीषणेन खड्गेन हत्वा च पातितः. तद् दृष्ट्वा मंत्रिभिः कलकलश्चक्रे, नगरेंतःपुरे देशे ग्रामे चाक्रंदध्वनिरुत्तस्थौ. मंत्रिणो दशरथस्य राज्ञो मृतकार्याणि कृत्वा देशरक्षार्थं सुभटसंनद्धबद्धा बभूवुः, यतो गूढमंत्रा मंत्रिणो भवंति. अथ मिथिलेश्वरं जनकनृपं त्वकिंचित्करं ज्ञात्वा बिभीषणः स्वस्थानं गतः. तत्र च रावणाय तत्सर्वं निवेद्य तं च स्वस्थं विधाय बिभीषणः सुखमनुभवन्नास्ते. इतश्च तौ जनकदशरथौ कार्पटिकवेषधरंतावुत्तरापथे भ्रमंतौ संमिलितौ, तत्र कौतुकमंगले पुरे शुभमते राज्ञः पृथ्वीराज्ञीकुक्षिजाताया द्रोणमेघसोदरायाः कैकेयीनाम्न्या दुहितुः स्वयंवरमाकर्ण्य तौ तन्मंडपमुपेयतुः. तत्र मंडपे सा कन्या वस्त्रालंकारभूषिता सखीपरिवृता च लक्ष्मीरिवाभ्यागात्. सा कैकेयी स्वयंवरमंडपे सर्वान्नृपान् नमस्कुर्वती सख्या दत्तहस्ता परितो विलोकयतिस्म. तत्र हरिवाहनप्रमुखान् नृपान् परित्यज्य दशरथं च प्राप्य तत्कंठे व-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रमालामद्विपन्निजां भुजलतामिव. दशरथं कैकेय्या वरितं दृष्ट्वान्ये राजानो मानिनो जज्वलुः प्रोचुश्च, अहोऽनया वराकया कैकेय्या नृपान् मुक्त्वाऽज्ञानादेकाकी कार्पटिको वृतः, अत आच्छिद्य कन्यारत्नमन्येषां बलाद्दास्यते, एवं विमृश्य सर्वे राजानः स्वबलगर्विताः संवर्मयामासुः. तदा कैकेयीपिता शुभमतिर्दशरथपक्षे भूत्वा सोत्साहं चतुरंगया सेनया सज्जितो युद्धाय सज्जोऽभूत्. दशरथेन कैकेय्यभाणि भो प्रिये! त्वं सारथित्वं कुरु? यथा एकोऽप्यहमनेकान् द्विषो हन्मि. कैकेय्या प्रोक्तं हे देव! त्वं सज्जो भव? अहं सारथित्वं करिष्ये.

इत्युक्त्वा कैकेयी चतुष्पष्टिकलाकुशला रश्मिमादाय महारथेऽध्यारुरोह. दशरथोऽपि षट्त्रिंशद्दंभायुधानि सज्जीकृत्य रथेऽध्यारुरोह, तदायुधानि चैवं, तरवारित्रिशूलनाराचकौशलकृपाणचक्रकुंतसब्बगंडावखुद्दापट्टीमुसंडिगदामुशललकुटमुद्गरछुरिकाशस्त्रीकसार्धचंद्रकरपत्रबाणत्रष्ट्यसिपत्रक्षुरप्रमुखीभिंदमालतोमरभल्लीलांगूलपात्रीपरशुविस्फोटवज्रशक्तिशूलभल्लसेल्लप्रभृतीनि ज्ञेयानि. तैः संभृतं रथं दशरथोऽध्यारोहत्. कथंभूतोऽसौ? धन्वी, निषंगी, सन्नाही सर्वशस्त्रविशारदश्च. एवं कैकेय्यधिष्ठितरथस्थः शीघ्रवेधी दशरथः शुभमतिना राज्ञा परिवृतो युद्धाय ढुढौके, ते हरिवाहनप्रमुखा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नरेंद्रा अपि तेन दशरथेन सह युयुधिरे. शीघ्रवेधी दशरथो—ऽप्येकैकमपि तद्रथं ॥ अखंमयद खंमौजा । आखंडल इवापरः ॥ १ ॥ इत्थं विद्रावयामास । सर्वानपि स नृपतीन् ॥ उपयेमे च कैकेयी—मिव तां च जयश्रियं ॥ २ ॥ उवाच च नवोढां तां । राजा दशरथो जयी ॥ वरं याचस्व देवि त्व—त्सारथ्येनास्मि रंजितः ॥ ३ ॥ कैकेय्या प्रोक्तं स्वामिन्नवसरे वरं याचिष्ये, सांप्रतं स न्यासीनवतु, तदा राज्ञापि तस्यास्तद्वचः प्रतिपन्नं. ततो राजा दशरथोऽसंख्यपरिवारपरिवृतः कैकेय्या राज्या समं राजगृहं ययौ, जनकोऽप्यात्मीयां नगरीं जगाम, यद्राजानः समयज्ञा धीमंतश्च यथातथा न तिष्ठंति. अथ राजा दशरथो राज्ञीभिः समं रममाणस्तत्रास्थात्, विशेषेणापराजितादेव्या पट्टराज्या समं स वैषयिकं सुखं भेजे.

एकस्मिन् दिने कश्चिद्देवो महर्द्धिकोऽपराजिताकुक्षाववातरत्, तस्मिन् समयेऽपराजिताराज्ञी निशाशेषे चतुर्महास्वप्नानद्राक्षीत्, दृष्ट्वा जागरिता च राज्ञे दशरथाय शशंस, दशरथोऽपि तत्स्वप्नविचारमपराजितांप्रति प्रोवाच भो राज्ञि! तव पुत्रो भावी. अथ तत्प्रभृति सा राज्ञी प्रसन्नदोहदा संपूर्णदोहदा सन्मानितदोहदा च वसुधा निधानमिव गर्भं बभार. क्रमेण शुभदिने शुक्रवारे शुभन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दत्रे शुभलग्ने शुभग्रहे शुभमुहूर्ते कल्याणवतीवेलायां निशाशेषेऽपराजिता पट्टराज्ञी सुवर्णवर्णं सं-
पूर्णलक्षणं पुंडरीकाक्षं मातृपितृप्रमोददं प्रथमं पुत्रं सुषुवे, तं दृष्ट्वा दशरथश्चिंतामणिरिव जनेभ्यो
दानं ददौ, पुत्रे जाते पिता दानं ददातीति लोकस्थितिः, यतः—वसुधाभरणं पुरुषाः । पुरुषाभर-
णं प्रधानतरलक्ष्मीः ॥ लक्ष्म्याभरणं दानं । दानाभरणं सुपात्रं च ॥ १ ॥ दानेन भूतानि वशीभ-
वंति । दानेन वैराण्यपि यांति नाशं ॥ परोऽपि बंधुत्वमुपैति दाना—त्ततः पृथिव्यां प्रवरं हि दानं
॥ २ ॥ एवं राजा दशरथो दानं ददानो लोकैर्धवलमंगलगायकभट्टयाचकप्रभृतिभिर्विहितबहुमान-
स्तोरणश्रेणिसंशोभितमंदिरः समस्तराजमंडलीसमुपबोभुज्यमानचरणो महीपत्युपनीतप्राभृतैर्विहितस-
न्मानः सुखमनुभवन्नास्ते. प्रथमे दिवसे तस्य कुलोचितां स्थितिपतिकां राजा करोतिस्म, तृतीये
दिवसे कुमारस्य चंद्रसूर्ययोर्दर्शनं कारयति, षष्ठे दिवसे षष्ठीजागरणं करोति, संजाते च द्वादशे दि-
वसे निर्वर्तिते चाशुचिजातकर्मणि नामस्थापनां करोति, यथा—पद्मानिवासपद्मस्य । पद्म इत्यभि-
धां नृपः ॥ सूनोस्तस्याकरोत्सोऽभू—त्प्रथितो राम इत्यपि ॥ १ ॥ गजसिंहार्कचंद्राग्नि—श्रीसमुद्रा-
न् निशात्यये ॥ स्वप्नेऽपश्यत्सुमित्रापि । विष्णुजन्माभिसूचकान् ॥ २ ॥ देवलोकात्परिच्युत्य । त्रि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दशः परमर्द्धिकः ॥ तदा देव्याः सुमित्राया । उदरे समवासरत् ॥ ३ ॥

अथ पूर्णे मासे शुभे दोहदे देवी सुमित्राप्यंभोदवर्णं संपूर्णलक्षणं जगन्मित्रं पुत्ररत्नमजीजनत्. पुरचैत्येषु सर्वेषु राजा दशरथः पूजामकारयत्, कारागृहस्थान् बंदींश्च मोचयामास. एवं रामजन्मवत्तस्याप्यभिरामं जन्मोत्सवं कृत्वा नारायण इत्यभिधानं विदधे पिता, लक्ष्मण इत्यपरं नामापि तस्य पप्रथे. एवं दशरथपुत्रौ तौ द्वावपि पितुः कूर्चाकर्षणतत्परौ धात्रीभिर्लाल्यमानौ क्षीरपानक्रमेण बाल्यं वयो निर्गमयित्वा यौवनं प्रापतुः. तौ द्वावपि नीलपीतांबरौ महीतलं च पादघातैः कंपयंतौ साक्षीकृतकलाचार्यौ गिरी इव महौजसौ सकलकलाः शिक्षयंतौ द्वात्रिंशल्लक्षणोपेतौ जातौ. तानि लक्षणानि चामूनि, यथा—इह भवति सप्तरक्तः । षडुन्नतः पंचसूक्ष्मदीर्घश्च ॥ त्रिविपुललघुगंभीरो । द्वात्रिंशल्लक्षणः स पुमान् ॥ १ ॥ नखचरणपाणिरसना—दशनच्छदतालुलोचनांतेषु ॥ रक्तः सप्तस्वाढ्यां । सप्तांगां स लभते लक्ष्मीं ॥ २ ॥ षट् कक्षा वक्षःस्थलं । नाशिका कृकाटिका नखास्यमिति ॥ यस्येदमुन्नतं स्या—दुन्नतयस्तस्य जायंते ॥ ३ ॥ सूक्ष्माण्यंगुलिपर्वाणि । दंता केशा नखास्त्वचा ॥ पंच सूक्ष्माणि येषां च । ते नरा दीर्घजीविनः ॥ ४ ॥ नयनकुचांतरना-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शां—गुलिभुजमिति पंचकं दीर्घं यस्य ॥ दीर्घायुर्भवति नरः । पराक्रमी जायते स पुमान् ॥ ५ ॥ ललाटं शिरोवदनमिति । तृतीयं भूमीश्वरस्य विपुलं स्यात् ॥ ग्रीवा जंघा मेहन—मिति त्रिकं लघु महेशस्य ॥ ६ ॥ यस्य स्वरश्च नाभिः । सत्वमितीदं त्रयं गभीरं स्यात ॥ सप्तांबुधिपर्यंतं । भूमेः स परिग्रहं कुर्यात ॥ ७ ॥ इति द्वात्रिंशल्लक्षणानि.

इति द्वात्रिंशल्लक्षणोपेतौ षट्त्रिंशद्दंमायुधज्ञौ महायोधौ सकलशस्त्रशास्त्रपारीणौ राज्ञो दशरथस्याभिनवौ भुजाविव तौ वर्धितौ. अथैकस्मिन् दिने राज्ञा चिंतितं, किं ममात्र स्थितिना? पुत्रपौत्रैः परिवृतः स्वदेशे स्वां नगरीमयोध्यां यामि, यद्भावि तद्भवतु. यतः—मज्जत्वंभसि यातु मेरुशिखरं शत्रुं जयत्वाहवे । वाणिज्यं कृषिसेवनादि सफलं शिक्षंतु सर्वाः कलाः ॥ आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं परं । नोऽभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ॥ १ ॥ भीमं वनं भवति तस्य पुरं प्रधानं । सर्वो जनः सुजनतामुपयाति तस्य ॥ कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा । यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥ २ ॥ एवं ध्यात्वायोध्यामागतो दशरथ इक्ष्वाकूणां राजधानीमिति मत्वा तद्राज्यं पालयामास. दशरथपत्नी कैकेयी गजस्वप्नेन सूचितं भरतनृपणं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भरतनामसुतमसूत. चतुर्थपत्नी सुप्रजापि सुस्वप्नसूचितं शत्रुघ्नभुजविक्रमं शत्रुघ्ननामानं पुत्रं प्रासूत. स्नेहाद्रामलक्ष्मणौ तथा भरतशत्रुघ्नावप्यवियुक्तौ क्रीडापरौ वर्तेते. तैश्चतुर्भिः पुत्रैः परिवृतो दशरथो गजदंतैर्मेरुगिरिरिव शुशुभे. अथ सीताभामंडलयोः पूर्वभवानाह—

इतश्चास्मिन् जंबूद्वीपे भरतक्षेत्रे दारुग्रामे वसुभूतिनामा द्विजोऽभूत्, तस्यानुकोशानाम्नी पत्नी, तयोः पुत्रोऽतिभूतिः, तस्य पत्नी सारसानाम्नी, तया सह स सुखमनुभवन्नास्ते. अथैकस्मिन् दिनेऽतिभूतेः प्रिया सारसानाम्नी केनचित्कपोतनाम्ना विप्रेण जातरागेणापजह्रे, यतः स्मरातुरः पुमान् किं न करोति? यतः—विकलयति कलाकुशलं । हसति शुचिं पंडितं विडंबयति ॥ अधरयति धीरपुरुषं । क्षणेन मकरध्वजो देवः ॥ १ ॥ ततः स विप्रस्तां सारसां विप्रपत्नीं हृत्वा देशांतरं गतः, तया सह च स सुखमनुभवन्नास्ते. तद्वियोगार्दितोऽतिभूतिर्निजप्रियाविलोकनाय सपदि देशांतरं गतः, सुतस्नुषाविलोकनकृते तन्मातापितरावपि विचेरतुः. तावपि सुतस्नुषे अपश्यंतौ ग्रामाद्ग्रामं पर्यटंतावेकं मुनिवरं ददृशतुः, तदंतिके च धर्मं श्रुत्वा वैराग्याच्चारित्रधर्मं प्रपेदतुः. तौ द्वावपि संयमं प्रपाल्य ततो विपद्य सौधर्मे कल्पे देवौ बभूवतुः. एकदिनपालितेऽपि व्रते देवलोकाद-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्यत्र गतिर्नास्ति. यतः—एगदिवसंपि जीवो । पवज्जमुवागउ अणन्नमणो ॥ जइवि न पावइ मुक्खं । अवस्स वेमाणिउ होइ ॥ १ ॥ वसुन्नूतिस्ततश्च्युत्वात्रैव वैताढ्यपर्वते चंद्रगतिनामा रथनूपुरनाथोऽन्नूत. अनुकोशापि देवभवाच्च्युत्वा विद्याधरपुत्री पुष्पवतीनाम्नी भूत्वा चंद्रगते रथनूपुरनाथस्य पत्न्यन्नूत. सारसा विप्रवधूरपि कामपि साध्वीं प्रेक्ष्य तदंतिके च धर्मं श्रुत्वा प्रव्रज्यां लात्वेशानदेवलोके देवीत्वेनोत्पद्य सुखमनुबन्नूवे. सारसापतिरतिन्नूतिविप्रः पत्न्या विरहे देशांतरं भ्रममाणः पत्नीं क्काप्यप्राप्य विरहविधुरो मृत्वा चिरं संसारं भ्रांत्वा हंसपोतो जातः, श्येनेन भक्ष्यमाणश्च कंठगतप्राणः साधुसमीपे गतः, साधुना नमस्कारदानेन स्वस्थीकृतो मृत्वा नमस्कारप्रभावेणर्द्धिमान् दशवर्षसहस्रायुः किन्नरेषु सुरोऽन्नवत्.

इतश्चक्रपुरे नगरे चक्रध्वजाख्यो राजा, पुरोहितश्च धूमकेशनामा, तस्य स्वाहानाम्नी पत्नी, तयोः पुत्रत्वेनातिभूतिविप्रजीवः किन्नरदेवन्नवाच्च्युत्वा स्वाहाकुक्षाववातरत्. क्रमाज्जातस्य तस्य पिंगलेति नाम दत्वा ताभ्यां वर्धितः. क्रमेण वर्धमानोऽष्टवार्षिकः पंडितपार्श्वे राजपुत्र्या सुंदरीनाम्न्या सह पपाठ. काले गच्छति तौ सुंदरीपिंगलौ स्नेहपरायणौ परस्परं जातौ. ततः स विप्रपुत्रः पिंगल-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तां राजपुत्रीं सुंदरीं हृत्वा विदग्धनगरे ययौ. तत्र विज्ञानरहितः पिंगलो राजपुत्र्या सहितस्तृणकाष्ठादिविक्रयं कुर्वन्महाकष्टेन दिनानि निर्गमयामास. सुंदर्यपि दैवोपालंभं ददाना पिंगलेन सह काष्ठतृणभारं वहंती दिनानि गमयामास. अथैकस्मिन् दिने पिंगलपत्नीं तां सुंदरीं काष्ठभारसहितां तन्नगरराजपुत्रः कुंडलमंडितोऽद्राक्षीत्, तदा तद्रूपमोहितः कुंडलमंडितस्तां सुंदरीमपजहे, हृत्वा च पितुर्भयाद् दुर्गदेशे गत्वा पल्लीं च कृत्वा तत्र स्थितः, सा सुंदर्यपि तेन सह रेमे, धिग्धिक् स्त्रीलक्षणं. सुरूपं पुरुषं दृष्ट्वा । पितरं भ्रातरं सुतं ॥ मनश्चलति नारीणा—मेतत्सत्यं हि नारद ॥१॥ रहो नास्ति क्षणो नास्ति । नास्ति प्रार्थयिता नरः ॥ तेन नारद नारीणां । सतीत्वमुपजायते ॥२॥ परं तद्भर्ता पिंगलः सुंदर्याः प्रेमातिरेकं न मुमोच. अहो कांताविरहः, यतः—कांतावियोगः स्वजनापमानं । रणस्य भीतिः कुजनस्य सेवा ॥ दरिद्रभावः खलसंगमश्च । विनाग्निना पंच दहंति देहं ॥ १ ॥ भिक्षुर्विलासी निधनश्च कामी । वृद्धो विटः प्रव्रजितश्च मूर्खः ॥ पण्यांगना रूपविलासहीना । प्रजा यतदुश्चरितानि पंच ॥ २ ॥ ततः स पिंगलो दुःखगर्भितवैराग्यान्मुनिर्भूत्वा संयमं पालयन् कांताविरहजं दुःखं स्वहृदयान्न मुमोच.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इतश्च स कुंमलमंमितः पल्लीस्थितो दशरथन्नुवं लुंटयामास. तदा राज्ञो दशरथस्याग्रे लोकै रावश्चक्रे. दशरथेनापि बालचंद्राख्यः सामंत आज्ञां दत्वा तत्र प्रेषितः, स च गत्वा तं कुंडलमंडित- पल्लीपतिं सुप्तं बध्ध्वा दशरथनृपस्याग्रेऽनैषीत, तत्र दशरथेन स कुंमलमंडितः कारायां क्षिप्तः, कति- चिद्दिनांते पुनर्मुक्तो न्राम्यंश्चंद्रमुनेर्धर्ममाकर्ण्य महाश्रावकोऽन्नवत्. राज्येच्छुश्च श्रावकत्वं प्रपाल्यायु रंते मृत्वा स मिथिलायां जनकस्य राज्ञो विदेहान्नार्यायाः कुक्षौ पुत्रत्वेनावातरत. सारसापि न्नवं भ्रांत्वा पुरोहितपुत्री वेगवतीनाम्नी न्नूत्वा दीक्षां च लात्वा ब्रह्मलोके गता. ततोऽपि च्युत्वा विदेहा- याः कुक्षौ कुंमलमंमितजीवयुग्मत्वेन सुतान्नवत्. जनकपत्नी विदेहा समये पुत्रपुत्रीयुग्ममजीजनत्. इतश्च पिंगलर्षिः संयमं प्रपाल्यायुरंते मृत्वा सौधर्मदेवलोके गतः, तत्र ज्ञानेन निजपूर्वन्नवसंबंधं ज्ञात्वा कुंमलमंमितजीवं च निजवैरिणं मत्वा, तं बालं गृहीत्वा एकांते गत्वा चिंतयति, किमेनं बालं हन्मि? पुनस्तेन चिंतितं कुतो बालहत्यां करोमि? न्नवं च न्रमामीति विचिंत्य तं कुंडलादि- न्नूषणैर्न्नूषयित्वा नंदनवने मुमोच. अथ वैताढ्यदक्षिणश्रेणिन्नूषणरथनूपुरनाथस्य चंद्रगतिनामवि- द्याधरस्य यात्रार्थं गछतो नंदनोद्याने विमानं स्खलितं. ततो विमानादुत्तीर्य यावत्स विलोकयति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तावत्तं बालं दिव्यालंकारभूषितं दृष्ट्वा तेन चिंतितं, भो ममापुत्रस्य दैवेन पुत्रो दत्तः. मम भाग्यं च फलितं, इति विचिंत्य तं बालं गृहीत्वा स्वराज्ञ्याः पुष्पवत्या अर्पयामास. देव्या गूढगर्भायाः पुत्रो जात इति कथयित्वा राज्ञा महश्चक्रे पुत्रजन्मवत्. महोत्सवं च कृत्वा भामंडलेन भासुरत्वात्तस्य भामंडल इति नाम दत्वा पुष्पवतीचंद्रगती हृष्टौ बभूवतुः. भामंडलोऽपि धात्रीभिः खेचरीभिर्लाल्यमानः क्रमेण ववृधे.

इतश्चापहृते पुत्रे विदेहा करुणस्वरं रुदंती स्वान् बंधूंश्च रोदयंती शोकार्णवे पपात. जनकोऽपि स्वान्नरान् प्रतिदिशं प्रेष्य विलोकयामास, परं स क्वापि पुत्रशुद्धिं न प्राप. ततः पित्रा पुत्र्यास्तु सीतेति नाम विदधे. अथ कालेन नृपराज्ञ्योः पुत्रसंबंधी शोको मंदीबभूव, यतः संसारे लोकानां शोको हर्षश्चायाति याति च. अथ क्रमेण सा सीता प्रवर्धमानाष्टवार्षिकी जाता, पित्रा च पाठिता, क्रमेण यौवनोन्मुखी सा रूपलावण्यसंपदाभ्यां प्रवर्धमानेंदुलेखेव ववृधे, द्वात्रिंशन्नायिकागुणोपेता च जाता, यथा—कुलीना, सुरूपा, सुभगा, सुस्वरा, प्रसन्नशुभानना, पीनस्तनी, रसिका, लज्जावती, लक्षणसंयुता, शकुनज्ञा, गीतज्ञा, वाद्यज्ञा, नृत्यज्ञा, कोमलशरीरा, सुगंधप्रिया, मतिमती, म-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मधुरवचना, स्नेहवती, विनयवती, सत्यवती, शीलवती, प्रज्ञावती, गुणान्विता च जाता. क्रमाद्यौवन प्राप्तां तां निजां पुत्रीं सीतां विलोक्य जनकश्चिंतयति, अस्या अनुरूपो वरः कः स्यादिति विचिंत्य स चरैर्विलोकयति, परं न कोऽपि तथाविधो लब्धः.

इतश्च मातरंगादिम्लेच्छपार्थिवैर्दैत्यकल्पैरनल्पैरकस्मादागत्य मिथिला रुद्धा. ततो जनकराजा दशरथाय संदेशहारकं मुमोच, दूतोऽप्ययोध्यायां दशरथसभां प्राप. ततो दशरथो जनकदूतं दृष्ट्वा सप्रसादः सहर्षोऽग्रे निषण्णं तं दूतं जगाद, रे दूत किमर्थं त्वमागतोऽसि? अस्ति मिथिलेश्वरस्य कुशलं? दूतोऽपि दशरथं नत्वावादीत्, भो राजेंद्र! मद्भर्तुस्तु सांप्रतं कुशलमस्ति, परं मातरंगादिम्लेच्छपार्थिवैः स रुद्धोऽस्ति, तेन त्वां स कुलदेवतावत्स्मरति, अतः स्वामिंस्तस्य त्वं सहायं कुरु? वैताढ्यस्य दक्षिणतः कैलाशस्योत्तरेण च भूयांसोऽनार्यदेशाः संति, तेषु देशेष्वर्धबर्बरो नामा देशोऽस्ति, तत्र मयूरशालनगरे तद्देशभूषणो मातरंगनामा राजास्ति, तस्य शुकमंकनकांबोजप्रभृतिभूयोदेशभूपाः सेवंते, इदानीं स मातरंगो म्लेच्छाधिपतिः स्वसैन्यपरिवृतोऽक्षयाक्षौहिणीनाथैः परिवारितो जनकक्षितिमभांक्षीत्, ते दुराशयाः प्रतिग्रामं चैत्यानि बभंजुः, जनानुपदुद्रुवुः, ततस्त्वं ज

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नकस्य प्राणभृतः परित्राणं कर्तुमर्हसि, तदर्थं चाहं प्रेषितोऽस्मि, यतः—संतः सतां परित्राणे विलंबं न कुर्वंति, यतः—विणए सीस्सपरिक्खा । सुहडपरिक्खा य होइ संगामे ॥ वसणे मित्तपरिक्खा । दाणपरिक्खा य दुकाले ॥ १ ॥ ततो गंतुकामं दशरथंप्रति रामोऽवादीत, हे तात! मयि भुजोर्जिते पुत्रे सति त्वं कुतो यास्यसि? ममाज्ञां देहि? अहं सहानुजो गत्वा तान् म्लेछांश्च धृत्वेहानयिष्यामि, त्वमपि च स्वजन्मिनोर्जयस्य वार्ता श्रोष्यसि. एवं कथंचिद्दशरथपित्रानुज्ञातो रामः सानुजसेनापरिवृतो मिथिलां नगरीं जगाम, मिथिलापरिसरे गतो रामश्चित्रकसिंहशार्दूलसन्निभान् म्लेछसुभटानद्राक्षीत्, तेऽपि म्लेछराजानो रामममागतं दृष्ट्वा महौजसा तमुपद्रोतुं प्रावर्तत, रामोऽपि म्लेछसेनया सह युध्यमानोऽधिज्यं धनुः कुर्वाणो म्लेछसैन्यं हनन् मृगानिव तान् बाणैर्विध्यन् दिशश्छादयामास, यथा—

मातरंगादयो म्लेछा—धिपाः कुपितविस्मिताः ॥ नानाशस्त्राणि वर्षंतः । प्रतिरामं दुढौकिरे ॥ ॥ १ ॥ दूरापाती दृढाघाती । शीघ्रवेधी च राघवः ॥ तान् म्लेछान् हेलयाभांक्षी—द्धरभः कुंजरानिव ॥ २ ॥ म्लेछाः प्रणश्य ते जग्मुः । काका इव दिशो दिशं ॥ बभूव सुस्थो जनको । जनैर्जन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पदैः सह ॥ ३ ॥ ततो हृष्टो राजा जनको रामाय स्वसुतां सीतां ददौ. रामागमे जनकस्य द्वौ ला-
भावभूतां, एको जयो द्वितीया च वरप्राप्तिः. तदा नारदो जानकीरूपमुत्कृष्टं जनादाकर्ण्य कौतुकाद्
द्रष्टुं कन्यावेश्म विवेश. तदा पिंगलकेशं पिंगलनेत्रं तुंदिलं विषमाधारं दंडपाणिं सकोपीनं भीष-
णाकारं च नारदं दृष्ट्वा भीता सीता कंपमाना हा तात मातरिति ब्रुवाणा गर्भागारांतरविशत. तत-
स्तुमुलकारीभिर्दासीभिः स नारदः कंठे शिखायां बाह्वोश्च धृतः, द्वारपालाद्यैरपि रुरुधे, शस्त्रधारि-
भिः सुभटैरपि निष्काशितो नारदः कुपितः कथंचित्तेभ्यो निजात्मानं विमोच्य गगनगामिन्या वि-
द्यया वैताढ्यदक्षिणश्रेण्यां रथनूपुरपत्तने चंद्रगतिविद्याधरपुत्रभामंडलस्योपांते गतः. तत्र गत्वा च
तेन सीतारूपं पट्टे लिखित्वा भामंडलकुमारस्य दर्शितं, ध्यातं च हृदि यदेष एनां दृष्ट्वा रूपव्यामो-
हितो हरिष्यतीति बुद्ध्या पुनः पुनस्तद्रूपवर्णनं कुर्वाणो नारदस्तं चमत्कारं दर्शयित्वा स्वस्थानं ग-
तः. ततः प्रभृति भामंडलो भोज्यानि न बुभुजे, पेयान्यपि न पपौ, योगीव तद्ध्यानपरोऽसौ जातः.
अथ तं तथाविधं दृष्ट्वा चंद्रगतिविद्याधरोऽवोचत्, भो पुत्र! तव किं बाधते? आधिर्वा व्याधिर्वा?
अथवा तवाज्ञाखंडनं किं केनाप्यकारि? हे वत्स! तुभ्यं यत्किंचिद्रोचते तद् ब्रूहि? यथा तस्य दुः-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खस्य पारः प्राप्यते.

तदा भामंडलं लज्जयाधोमुखं दृष्ट्वा तन्मित्रेण सज्जनेन सर्वोऽपि वृत्तांतः कथितः, तत श्रुत्वा चंद्रगतिना चिंतितं, का सा सीता? कथं च सोपलक्ष्यते? एवं चिंतां प्रपन्ने चंद्रगतिनाम्नि विद्याधरे पुनरपि नारदस्तत्रागात्, तदा बहुमानपुरस्सरं चंद्रगतिना सोऽभाणि, भो नारद! का सीता? कस्य च पुत्री? तदा नारदेनोक्तं विदेहाजनकात्मजा सीता या मया पट्टे लिखितास्ति, परं यादृग् सीतारूपमस्ति तादृशं लेखितुं नाहं समर्थोऽस्मि, तथापि किंचिन्मया पट्टे आलिख्य दर्शितं, किंच—नामरीषु न नागीषु । गांधर्वीषु न तादृशं ॥ सीताया यादृशं रूपं । का कथा मानुषीषु तु ॥ १ ॥ तादृग् रूपं यथावस्थं । चित्रितुं नेश्वराः सुराः ॥ असुरा अपि नो कर्तुं । न च कर्तुं प्रजापतिः ॥ २ ॥ अथवा तां यथावस्था—महं नालेखितुं क्षमः ॥ नालं तथा वक्तुमपि । वचसा परमार्थतः ॥ ३ ॥ योग्या भामंडलस्येति । विचार्य मनसा मया ॥ यथाप्रज्ञं समालिख्य । दर्शितेयं पटे नृप ॥ ४ ॥ भो पुत्र एषा सीता तव पत्नी भविष्यति, त्वं चिंतां मा विधेहीत्युक्त्वा पुत्रमाश्वास्य नारदं मुनिं च विसृज्य स चपलगतिनामविद्याधरमित्यादिदेश, भो चपलगते त्वं गच्छ? ग-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वा च मिथिलापतिराजानं जनकं द्रुतमपहृत्येहानय? इत्यादेशं श्रुत्वा गतश्चपलगतिः, तत्र च सुप्तं निद्रावशगतं जनकं समानीय चंद्रगतेरर्पयामास. तदा चंद्रगतिर्जनकमालिंग्य बहुमानपुरस्सरं स्वपुत्रभामंडलार्थं सीतां ययाच, तदा जनकोऽवादीत् भो चंद्रगते! मया सा दशरथपुत्राय रामचंद्राय दत्तास्ति, तदन्यस्य कथं दीयते? यतः—सकृज्जल्पंति राजानः । सकृज्जल्पंति पंडिताः ॥ सकृत्कन्याः प्रदीयंते । त्रीण्येतानि सकृत्सकृत् ॥ १ ॥ पुनश्चंद्रगतिः प्रोचे भो जनक! त्वं मया स्नेहवृद्धिकृते समानीय याचितोऽसि, अतो मम याञ्चां सफलीकुरु? त्वत्पुत्रीं च मम भामंडलाय देहि? यदि न ददासि तदान्यदपि किंचित् शृणु? मम गृहे वज्रावर्तार्णवावर्ताख्ये द्वे धनुषी यक्षसहस्राधिष्टिते वर्तेते, ते च गोत्रदेवतान्मम गृहे प्रत्यहं पूज्येते, अतो ते द्वे धनुषी त्वं गृहाण? गृहीत्वा च स्वगृहे याहि? य एते धनुषी आरोपयिष्यति रामो वा भामंडलो वा स सीतां परिणेष्यतीति प्रतिज्ञां बलात्कारेण संग्राह्य धनुर्द्वयसहितं जनकं चंद्रगतिर्मिथिलायां मुमोच.

अथैनं सर्वं वृत्तांतं जनको राजा महादेव्या विदेहाया आचख्यौ. विदेहापि तद्वनुर्वृत्तांतं श्रुत्वा दैवोपालंभं ददाना जनांश्च रोदयंत्येवं रुरोद, रे दैव! पुत्रं हृत्वा त्वं न संतुष्टो यत्कन्यामप्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्यस्य दास्यसि. तदा जनकोऽवोचत् हे प्रिये! त्वं मा भैषीः, राघवो मया दृष्टपूर्व एतद्धनुर्द्वयं ल-तावद्वालयिष्यति, अतस्त्वं खेदं मा विधेहि, इति कथयित्वा तेन विदेहा तोषिता. अथ सुमुहूर्ते राज्ञा जनकेन स्वयंवरमंडपः कारितः. तस्मिन् स्वयंवरमंडपे तेनानेके राजान आहूताः, ते चोच्चो-च्चतरमंडपेषूपविष्टाः पालके विमाने देवा इव शोभिरे. दूताहूतो दशरथोऽपि चतुःपुत्रपरिवृतो धर्म इवागात्. चंद्रगतिर्विद्याधरोऽपि भामंडलयुतः समागात्. एवमनेके राजानो जनकेनाहूतास्तत्र स-मागताः. मंडपमध्ये च ते वज्रमये यक्षसहस्राधिष्ठिते धनुषी तेन स्थापिते. तदैव सखीपरिवृता भ्र-चारिणी देवांगनानुकारिणी तत्रागता सीतापि धनुःपूजां कृत्वा रामचंद्रं च मनसि विधाय धनुःस-मीपेऽतिष्ठत. तदा भामंडलस्तु स्वयंवरमंडपमध्यस्थधनुर्द्वयं सीतां चालोक्य मारमार्गणाहतो मरणा-त्मको बभूव.

तस्मिन् समये सर्वेषु राजसूच्चमंचेषूपविष्टेषु जनको बाढस्वरेणावादीत्, भो भो लोकाः खेच-रा भूचरा महीधरा राजानो मंडलिकाश्च मद्वचनं शृणुत? आरोपयति यः कश्चि—देतयोश्चापदंड-योः ॥ अप्येकतरमप्येव । स उद्वहतु नः सुतां ॥ १ ॥ इत्युक्त्वा जनकस्तूष्णीं स्थितः. अथ तेषां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नृपाणां मध्याद्धनुःपार्श्वे गताः केचिन्नृपास्तद्धनुर्द्वयं पन्नगावेष्टितं ददृशुः, केचित्पन्नगमयं, केचिद्व-
ह्निसमूहमयं, केचिच्च भस्मराशिमयं, केचिच्च ज्वालामालामालितं ददृशुः. एवंविधं तद्धनुर्द्वयं दृष्ट्वा
न्यस्ताधोमुखा राजानो यथास्थितास्तथैवोपविष्टाः स्वस्वस्थानेषु. अथ दशरथपुत्रः श्रीरामचंद्रो गज-
गत्या चलंश्चंचलकुंडलविराजमानगल्लो धनुरुपांतं समागछन् चंद्रगत्यादिभिर्विद्याधरैः सोपहासं वी-
क्ष्यमाणो, जनकेन च सहर्षं निरीक्ष्यमाणो वज्रावर्तं महाधनुः सद्यः पाणिना पस्पर्श, महीपीठे च
स्थापयित्वा जानुना नेत्रवन्नामयित्वा स धन्विनां वरो रामचंद्रो धनुरधिज्यं विदधे. यथा—आक-
र्णांतं तदाकृष्य । रोदःकुक्षिंभरध्वनि ॥ धनुरास्फालयद्रामः । स्वयशःपटहोपमं ॥ १ ॥ स्वयंवरस्र-
जं रामे । स्वयं चिक्षेप मैथिली ॥ चापाच्चोत्तारयामास । रामचंद्रोऽपि शिंजिनीं ॥ २ ॥ लक्ष्मणोऽ-
प्यर्णवावर्तं । कार्मुकं रामशासनात ॥ अधिज्यं विदधे सद्यः । प्रेक्षितो विस्मितैर्जनैः ॥ ३ ॥ आ-
स्फालयच्च तन्नाद—बधिरीकृतदिङ्मुखः ॥ उत्तार्य मौर्वीं सौमित्रः । पुनः स्थाने मुमोच च ॥ ४ ॥
तत्स्वरूपं दृष्ट्वा विद्याधरराजानः सौमित्रये लक्ष्मणाय सुरकन्या इवाद्भुता अष्टादश कन्यका ददुः.
अथान्ये राजानो विद्याधराश्च जनकेन सन्मानिताः पूजिताश्च स्वं स्वं स्थानं ययुः. ततश्चंद्रगति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विद्याधरो नामंमलान्वितो विलक्षवदनो निजे पुरे ययौ. इति सीतानामंमलयोः पूर्वभवसंबंधः ॥

अथ राज्ञा जनकेन दशरथेन च महामहेन रामसीतयोर्विवाहश्चक्रे. तदा जनकभ्राता कनकोऽपि निजां सुप्रभाकुक्षिजां भद्रानाम्नीं पुत्रीं भरताय ददौ. एवं विवाहं विधाय पुत्रैः स्नुषाभिश्च परिवृतो दशरथोऽयोध्यां प्रकृतोत्सवो ययौ. अन्येद्युः स राजा दशरथो महत्या ऋद्ध्या श्रीशांतिनाथप्रासादे शांतिकृते स्नात्रं चक्रे. तत्स्नात्रनीरं दशरथः प्रथमं वृद्धकंचुकिहस्तेन महादेव्यपराजिताकृते प्राहिणोत्, पश्चादपरराज्ञीभ्यो दासीहस्तेन प्राहिणोत्. ता दास्यश्च यौवनमदोन्मत्ताः कूर्दत्यः प्रथममेव तासां राज्ञीनामर्पयामासुः, ता राज्यश्च शांतिजलं शिरसा ववंदिरे. वृद्धत्वान्मंदगामिनि सौविदल्लेऽसंप्राप्ते च शांतिजले महादेव्यपराजिताचिंतयत्, अहो सर्वासामपि राज्ञीनां जिनेंद्रस्नानवारिणा राज्ञा प्रसादो विहितः, परं मह्यं राज्ञा न प्रेषितं स्नात्रजलं, अतो निर्भाग्याया मे ध्वस्तमाने किं जीवितेन? इति विचिंत्य यावत्सा मरणोद्यताभवत् तावत्तत्र नरेंद्र आगात्, तां च तथावस्थां ददर्श.

मृत्युभीतो राजा राज्ञीं स्वोत्संगे निवेश्यैवमुवाच, हे देवि! त्वयेदं साहसं किमारब्धं? किं म-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



या तवापमानं विदधे? त्वं मरणसाहसं मा कुरु? तदा राज्ञ्युवाच हे राजंस्त्वया सर्वासां राज्ञीनां स्नात्रजलं प्रेषितं, मदर्थं च न प्रेषितं, अतः किं मे जीवितेन? एवं प्रोच्यमाने स एव कंचुकी स्नात्रजलयुतस्तत्र समागतः, तन्नीरं च वंदित्वा राज्ञा पृष्टं भो कंचुकिंस्त्वं विलंबेन किमागतः? तेनोक्तं हे स्वामिन्! धिग् वार्धकं, सर्वकार्याक्षमं वार्धकं मेऽपराध्यति. तत्र श्रुत्वा तं कंचुकिनं मुमूर्षुं, पदे पदे स्खलंतं मुखात्पतल्लालाजालं, गलितदशनं, सर्वांगश्वेतरोमाणं, शुष्कमांसं, शुष्कलोहितं, कंपमानांगं च दृष्ट्वा राजा दशरथश्चिंतयति, अहो! जरा पुरुषं बाढं विडंबयति, यतः—

गात्रं संकुचितं गतिर्विगलिता दंताश्च नाशं गता। दृष्टिर्भ्राम्यति रूपमेव ह्रसते वक्त्रं च लालायते॥ वाक्यं नैव करोति बांधवजनः पत्नी न शुश्रूषते। धिक्कष्टं जरयाभिभूतपुरुषं पुत्रोऽप्यवज्ञायते॥ १॥

इत्यादि चिंतयन् वैराग्यवान् विषयपराङ्मुखश्च नृपः कमपि समयमानैषीत्. इतश्च तस्यां नगर्यामयोध्यायामन्येद्युः सत्यभूतिनामा चतुर्ज्ञानी महामुनिः साधुसंघपरिवृतः समवासरत्. उद्यानपालेन गुर्वागमनवर्धापनेन प्रमोदितो राजा दशरथ उद्यानपालकाय दानं दत्वा पुत्रादिपरिवारपरिवृतो गुरुसमीपं गत्वा गुरून् वंदित्वा च देशनां श्रोतुं पुरतो निषसाद. तदानीमेव चंद्रगतिविद्या-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धरः सीताभिलाषसंतप्तभामंडलसहितो रथावर्ताचलेऽर्हंतं वंदित्वा विनिवृत्तस्तत्रायातो नभःस्थितस्तं मुनिं समवसृतं वीक्षांचक्रे.

ततोंबराङुत्तीर्य साधुं च वंदित्वा निषसाद, साधुरपि पापविनाशिनीं देशनां चक्रे, देशनांते चंद्रगतिविद्याधरेण सीताया भामंडलस्य प्रेमकारणं पृष्टे इति मुनिरपि चंद्रगतिपुष्पवत्योर्भामंडलसीतयोश्च पूर्वभवसंबंधं समाचख्यौ, भामंडलकुमारोऽपि निजयुग्मजाततां श्रुत्वा संजातजातिस्मरणो मूर्छया पृथिव्यां न्यपतत्, शीतोपचारैर्लब्धसंज्ञो भामंडलः सीतां नमश्चक्रे. सीता महासत्यपि जातमात्रमपहृतं निजसहोदरं भामंडलं ज्ञात्वा तस्मै आशिषं ददौ. ततः संजातसौहृदो विनयवान् भामंडलो ललाटस्पृष्टभूतलो रामचंद्रं नमश्चकार. चंद्रगतिविद्याधरोऽपि मिथिलायां गत्वा जनकं विदेहया देव्या समं विमाने समारोप्य साधुसमीपे समानैषीत्. सप्रियो जनको विमानादवतीर्य साधुं च नत्वोपाविशत्, गुरुणापि तथैव पूर्वभवादिकं शंसितं, पितरौ च स्वपुत्रं भामंडलं ज्ञात्वा हर्षितौ बभूवतुः, तदैव विदेहायाः स्तन्यमक्षरत्, पुत्रप्रेम्णा च सा तमालिलिंग, जनकोऽपि तं स्वोत्संगे निवेश्य मूर्ध्नि चुचुंबाश्रुवारिभिश्च सिक्तवान्. चंद्रगतिविद्याधरस्तत्स्वरूपं दृष्ट्वा वैराग्याद्भामंडलतनये

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राज्यं न्यस्य भवोद्विग्नस्तस्य सत्यभूतिमुनेः पार्श्वे प्रवव्राज. ततस्ते सर्वेऽपि मुनिद्वयं वंदित्वा स्वस्वपुरीषु समागताः.

इतश्च दशरथो राजा तं सत्यभूतिं मुनिं नत्वात्मपूर्वभवमपृच्छत, मुनिरपि दशरथराजस्य पूर्वभवानाह—नागपुरे पुरे भावनो नाम वणिक्, तस्य पत्नी दीपिका, तयोः पुत्र्युपास्तिनाम्न्यभूत्, परं सा साधुप्रत्यनीका साधूद्वेगकारिणी च, तेन पापेन सा तिर्यग्योनिषु बभ्राम. एवं भवं भ्रांत्वा चंद्रपुरे नगरे धन्यस्य वणिजः सुंदर्याः पत्न्या वरुणाख्यः पुत्रोऽभूत, स च धर्मवान् साधुभक्तो दानी विवेकवांश्च काले मृत्वा धातकीखंडे उत्तरकुरुषु युगलत्वेनोत्पन्नः. ततो मृत्वा स देवो जातः, देवलोकाच्च्युतः पुष्कलावतीविजये पुष्कलायां नगर्यां नंदिघोषस्य राज्ञः पृथ्वीदेव्या नंदिवर्धनो नाम पुत्रो जातः. नंदिघोषराजा च तं नंदिवर्धनं पुत्रं राज्ये न्यस्य यशोधरमुनेः पार्श्वे दीक्षां लात्वा ग्रैवेयके ययौ, स नंदिवर्धनो राजा राज्यं पालयन् यशोधरमुनेः पार्श्वे श्रावकत्वं लात्वा चिरकालं च पालयित्वा मृत्वा च ब्रह्मदेवलोके गतः. ततः परिच्युतः प्रत्यग्विदेहे वैताढ्ये उत्तरश्रेण्यां शशिपुरे रत्नमालिविद्याधरनरेशितुर्विद्युल्लतापट्टराइयाः कुक्षौ पुत्रत्वेनोत्पन्नः, सूर्यविजय इति तस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाम पितृभ्यां दत्तं, अन्यदा स रत्नमालिराड् इमं विद्याधरनरेश्वरं वज्रनयनं विजेतुं सिंहपुरं नगरं ययौ. तत्र गत्वा वज्रनयनं च संग्रामे जित्वा सिंहपुरं नगरं सबालवृद्धं रत्नमाली ज्वालयितुमारेभे. तदोपमन्युनाम्ना पूर्वभवपुरोहितदेवेन सहस्रारदेवलोकादागतेनैवं विज्ञप्य स पापान्निवर्तितः, यथा भो रत्नमालिराट् त्वमतिलोभादुत्कटं पापं मा कृथाः, त्वं पूर्वजन्मनि भूरिनंदननामा राजाभूः, तत्र च त्वया मांसनिवृत्तिः कृता, उपमन्युपुरोहितेन गृहीतो मांसभोजननियमो न भग्नः, त्वं पुनर्मांसास्वादलुब्धोऽभूः.

अथैकस्मिन् दिने स उपमन्युपुरोहितः स्कंदनाम्ना सेवकेन मारितः, स उपमन्युश्च मृत्वा हस्ती जातः, स हस्ती भूरिनंदननृपेण गृहीतः, परं स रणे मृतः, मृत्वा च भूरिनंदनराज्ञो गांधारायां पत्न्यामरिसूदननामा पुत्रो जातः, स च जातिस्मृत्या प्रव्रज्य संयमं च प्रपाल्य मृत्वा सहस्रारे देवो जातः, सोऽहं च देवोऽस्मि. भूरिनंदनराजा च ततो मृत्वा वनेऽजगरो जातः, सोऽजगरो दावानलेन मृत्वा द्वितीयं नरकं गतः, एवं त्वं नरकगतोऽपि मया प्रतिबोधितः, ततो नरकादुध्धृत्य त्वं रत्नमाली राजा जातः, एवं त्वं मांसप्रत्याख्यानभंगान्नरके गतः, अतो राजन्ननंतदुःखोत्पादकं नगर-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दाहं त्वं मास्मकृथाः. तद्देववचोयुक्त्या रत्नमाली नंदननाम्नि स्वनंदने राज्यं न्यस्य वृद्धपुत्रेण सूर्यजयेन दशरथजीवेन सह व्रतमाददे तिलकसुंदराचार्यसन्निधौ. ततस्तौ द्वौ पितापुत्रौ संयमं प्रपाल्य महाशुक्रेऽमरोत्तमावभूतां, ततः सूर्यजयो राजा त्वं दशरथो जातः, रत्नमाली च प्रच्युत्यायं राजा जनको जातः, उपमन्युस्तु जनकलघुभ्रातायं राजा कनको जातः. नंदिवर्धनजन्मनि यो नंदिघोषः पिताभूत् स नंदिघोषः संयमं प्रपाल्य ग्रैवेयकं गतः, ततश्च्युत्वाहं सत्यभूतिर्नामा मुनिर्जातः. एवं मुनिनोक्ते जातसंवेगो राजा दशरथोऽयोध्यायां नगर्यां निजमालयं जगाम. इति दशरथजनकसत्यभूतिमुनिपूर्वभवकथा ॥

अथ संसारपराङ्मुखो दशरथो राजा सुतान् मंत्रिणो महामंत्रिणश्चाहूय सुधामधुरया गिरा सर्वांश्च संभाष्य दीक्षाग्रहणाय पप्रच्छ, भो मंत्रिणोऽहं संसारविमुखो दीक्षां गृहीष्ये, रामचंद्राय च राज्यं भवतु, तावता भरतो नत्वा बभाषे, हे ताताहमपि त्वया सह सर्वविरतिं समुपादास्ये, त्वां विनाहं गृहे नैव स्थास्ये. तदा कैकेय्या चिंतितमहोऽतः परं निश्चितमहं निर्वीरा भविष्यामीति विचिंत्य सा दशरथनृपं प्रत्यूचे, हे स्वामिन् स्मरसि? यस्त्वया स्वयंवरोत्सवे सारथ्यकर्मणि मह्यं वरो द-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्तः, मया च स न्यासीकृतः, सोऽधुना दीयतां? दशरथोऽवोचत् हे प्रिये! त्वं याचस्व यत्ते रोचते, तयोक्तं यदि याचितं ददासि तर्हि मम पुत्राय जरतायायोध्याराज्यं देहि, राज्यं च दत्वा ऋणरहितस्त्वं जव? ऋणार्त्तस्य हि दीक्षा न कल्पते, यतः—बाले बुड्ढे नपुंसे अ। जडे कीवे अ वाहिए ॥ तेणे रायवगारी य। उम्मत्ते य अदंसणे ॥ १ ॥ दासे दुट्ठे अ मूढे अ। ऋणत्ते जुंगिएपि अ ॥ बद्धए जइए चेव। सेहनिप्फेफ्भिआइ अ ॥ २ ॥ एतद्व्याख्या—बालो गर्भादष्टमवर्षांतवर्ती. वृद्धस्तपोयोगक्रियादिष्वसमर्थः, नपुंसको जात्या, जमो मूर्खस्तस्य पठनं नायाति, क्लीब इति स्त्रीभिर्जोगार्थं निमंत्रितोऽसंवृतायाः स्त्रियोंगोपांगानि दृष्ट्वा, मन्मनोल्लापादिकं श्रुत्वा समुद्भूतकामाजिलाषमधिसहितुं यो न शक्नोति. व्याधितः, स्तेनश्चौरः, श्रीगृहांतःपुरनृपतिशरीरतत्पुत्रादिद्रोहविधायको राजापकारी, उन्मत्त इति यक्षादिना प्रबलमोहोदयेन वा परवशं नीतः, अलोचनो बीजत्सो वा, दासः परायत्तः, कषायविषयदुष्टश्च, मूढो ग्रथिलः, ऋणार्त्तः, जुंगिक इति कोलिकादिजात्या, वागुरिकनापितसौकरिकादिनिंद्यकर्मकुर्वाणः, पंगुकुंटकुब्जवामनादिशरीरेण वेति त्रिधा जुंगिकः. बद्ध इति परायत्तः खुसरो वा. रूपकादिभृत्या धनिगृहादेशकारी, शिष्यनिस्फेटक इति दीक्षि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तुमिष्टस्यापसरणकारकः. इअ अठारस भेआ । पुरिसस्स इत्थिआइ ते चेव ॥ गुव्विणी सबालव-
ष्ठा । दुन्नि इमे हुंति अन्नेवि ॥ १ ॥ अतस्त्वं भरते राज्यं दत्वा ऋणरहितो भव? ततश्च दीक्षां
गृहाण? कैकेय्यैवं कथितो दशरथोऽवादीत हे प्रिये! राज्यं तु रामचंद्राय भवतु. त्वमन्यत्किमपि
याचस्व? कैकेय्या तु तदेवोक्तं, एवमुक्तिप्रत्युक्तिभिर्बोधितापि सा न बुबोध. पुनर्दशरथेनोक्तं हे
प्रिये! यदि तुभ्यं रोचते तर्हि रामाय राज्यं ददामि, भरताय च सौराष्ट्रं ददामि, यतः—

अल्पादेकेऽपि यत्रास्ति । दुर्भिक्षस्य पलायनं ॥ सौराष्ट्रं तत्र दास्यामि । मा मे रामो वनं
व्रजेत् ॥ १ ॥ कैकेय्या प्रोक्तं—किं करोमि सुराष्ट्रेण । नास्ति त्रिपुरुषं धनं ॥ न तेन रोचते म-
ह्यं । सौराष्ट्रे बंधुविग्रहः ॥ १ ॥ अंगवंगकलिंगेषु । सौराष्ट्रे मगधेऽपि च ॥ विना यात्रां न गंत-
व्यं । यदि कार्यशतं भवेत ॥ २ ॥ अतो मम सौराष्ट्रेण कार्यं नास्ति, मम पुत्राय त्वयोध्याराज्यं
देहि? रामाय च वनवासं देहि? तदैव च त्वं ऋणरहितो, नान्यथा. तत् श्रुत्वा दशरथो रामंप्र-
त्यूचे, भो पुत्र! अस्याः कैकेय्याः सारथ्यतुष्टेन मया पूर्वं वरो दत्तः, अधुना च तया स भरतरा-
ज्यार्थं याचितः, तव च वनवासो याचितः. तदा रामोऽभाषिष्ट, हे तातानया सुंदरं याचितं. यतो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मम च भरतस्य किंचिदप्यंतरं नास्ति, यादृशोऽहं तादृश एव भरतोऽप्यस्ति, अतस्त्वं भरताय राज्यं देहि? एवं च त्वं ऋणरहितो भव? दीक्षां च गृहाण? पुनर्दशरथंप्रति राम उवाच—यस्मै च कस्मै वनराज्यमेत—त्ततः प्रसादीकुरु ह्यर्थिनेऽपि ॥ तस्मिन्निषिधे तु मनो न तत्र । तत्पत्तिमात्रस्य न मेऽधिकारः ॥ १ ॥ सुतावन्नतां भरतोऽप्यहं च । दृशाविवां तुलितावुभावपि ॥ निवेश्यतां तद्भरतोऽत्र राज्ये । सुखेन तिष्ठामि च राज्यलीलया ॥ २ ॥ भरतोऽप्यहमेवास्मि । निर्विशेषावुभावपि ॥ अतोऽभिषिच्यतां राज्ये । भरतः परया मुदा ॥ ३ ॥

इति रामवचः श्रुत्वा । नृपतिः प्रीतिविस्मितः ॥ आदिदन्मंत्रिणो याव—द्भरतस्तावदब्रवीत ॥ ४ ॥ स्वामिन् सहव्रतादान—मादावप्यर्थितं मया ॥ तात तन्नान्यथाकर्तुं । ममात्र वचसार्हसि ॥ ॥ ५ ॥ ततो राजा दशरथ उवाच, हे वत्स त्वं मत्प्रतिज्ञां मा मुधाकुरु? त्वन्मातुः कैकेय्या मया वरो न्यासीकृतोऽस्ति, तेन वरेण च तव माता राज्यं याचते, अतो हे वत्स! ममाज्ञामन्यथाकर्तुं नार्हसि. अथ रामो भरतमूचे, भो भरत! यद्यपि तव गर्वो नास्ति, तथापि तातमातृवचः कर्तुं त्वं राज्यमुद्वह? अथ भरतो रामपादयोः पतित्वा साश्रुनयनः कृतांजलिरेवमुवाच, हे बांधव! किमहं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तातस्य सूनुर्नास्मि? किं वा तवानुजो नास्मि? किं वाहं मातृमुखोऽस्मि? यदेवंविधं गर्ह्यं कर्म करोमि. एतद्भरतोक्तं श्रुत्वा रामो दशरथंप्रत्यूचे भो तात! मयि राज्ये सति भरतो राज्यं नादास्ये, अतो राज्यं त्यक्त्वाहं वनवासाय यामि. इत्यनुज्ञाप्य राजानं । रामो नत्वा च भक्तितः ॥ भरते च रुदत्युच्चै—र्निर्ययौ चापतूणभृत् ॥ १ ॥ लक्ष्मण उवाच—आर्योऽथ मेऽयं तृणवद्विमुच्य । नादास्यते राज्यमिदं ससत्वः ॥ तातस्य दुःखं भविता च तस्मा—त्पदातिवद्राममनुव्रजामि ॥ १ ॥ हन्यां यदिह कैकेयीं । पापिनीं पतिदुःखदां ॥ पापात्मानं तु श्रीराम—स्त्यजेन्मां मातृघातकं ॥ २ ॥ लक्ष्मणः सुमित्रां नत्वोचे, हे मातरहं राममनुव्रजामि, सुमित्रया चोक्तं—रामं दशरथं मन्ये—र्मन्ये मां जनकात्मजां ॥ अयोध्यामटवीं मन्ये—वत्स गच्छ यथासुखं ॥ १ ॥

अथ दशरथं नत्वा रामं वनवासाय गच्छंतं लोका ईदृशं ददृशुः—आहूतस्याभिषेकाय । प्रस्थितस्य वनाय च ॥ ददृशुर्विस्मितास्तस्य । मुखरागं समं प्रजाः ॥ १ ॥ वनवासाय गच्छंतं । दृष्ट्वा दशरथः सुतं ॥ भूयो भूयो ययौ मूर्छा—मतुच्छस्नेहकातरः ॥ २ ॥ अथापराजितां देवीं । नत्वा रामोऽभ्यधादिति ॥ मातर्यथाहं तनयो । भरतोऽपि तथैव ते ॥ ३ ॥ स्वां प्रतिज्ञां सत्यापयितुं पिता

For Private And Personal Use Only

राम चरित्रं १४१

भरताय राज्यमदात्, मयि सति चैष भरतो राज्यं नादत्ते, अतो मया वने गंतव्यं, हे मातस्त्वं भरतं मम सदृशं जानीहि? यथाहं तव भरत इत्युक्त्वा तत्पादयोः पतित्वा मातुः समीपान्निर्गतो रामः. अथ रामं वनाय निर्गच्छंतं ज्ञात्वापराजिता यत्करोति तदाह—तामाकर्ण्य गिरं देवी । पपात भुवि मूर्छिता ॥ चेटीभिश्चंदनांभोभिः । सिक्ता तस्यावुवाच च ॥ १ ॥ आः केन जीवितास्म्येषा । मूर्छा हि सुखमृत्यवे ॥ सहिष्ये रामविरहं । दुःखं जीवंत्यहं कथं ॥ २ ॥ वनं व्रजिष्यति सुतः । पतिश्च प्रव्रजिष्यति ॥ श्रुत्वाप्येतन्न यद्दीर्णा । कौशल्ये वज्रमय्यसि ॥ ३ ॥ रामो जगाद भूयोऽपि । मातः पत्न्यसि मत्पितुः ॥ ततः किमिदमारब्धं । किन्नरस्त्रीजनोचितं ॥ ४ ॥ वनान्यटितुमेकाकी । याति केसरिणीसुतः ॥ स्वस्था तु केसरिण्यास्ते । न ताम्यति मनागपि ॥ ५ ॥ तातस्य ऋणमस्त्युच्चैः । प्रतिपन्नवरो ह्ययं ॥ अत्र स्थिते च मय्यंब । तस्यानृण्यं कथं भवेत् ॥ ६ ॥ इत्यादियुक्तिवचनैरपराजितामंबां बोधयित्वा नत्वा च रामो वनाय निर्ययौ.

अथ सीतापि दशरथमपराजितां च नत्वा रामानुगमनं ययाचे, तदापराजिता सीतां बभाषे, हे वत्से! देवीव लालितासि त्व—माजन्मोत्तमवाहनैः ॥ सहिष्यसे कथं वत्से । पादचंक्रमणव्यथां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ १ ॥ तवांगं सौकुमार्येण । कमलोदरसोदरं ॥ क्लिष्टं तापादिना कुर्या—त्क्लेशं दाशरथेरपि ॥२॥ स्वभर्तुरनुमानेन । क्लिष्टकष्टागमेन च ॥ न निषेधं न चानुज्ञां । यांत्यास्ते कर्तुमुत्सहे ॥ ३ ॥ ततः सीतापराजितां नत्वा राममनुययौ, तदा लोकोऽप्युवाच धन्यैषा सीता महासती या राममनुयाति, अहो एषा महासतीमुख्या शीलेन स्वकुलद्वयं पुनाति, इति लोकैर्यावर्ण्यमाना सा राममनुययौ. अथ लक्ष्मणः संधुक्षितक्रोधवह्निरिति दध्यौ, तातेन भरताय राज्यं दत्तं, अथाहं कैकेयीं सभरतां हत्वा रामे राज्यं न्यस्यामि, अथवा रामो राज्यं नादास्यते, तातस्यापि महद्दुःखं स्यादिति विचिंत्य लक्ष्मणः सुमित्रामपराजितां च नत्वा कार्मुकतूणभृदनुधाव्य रामस्य मिलितः. ततस्ते त्रयोऽपि विकस्वरमुखांबुजाः पुर्या निर्ययुः. एवं मैथिलीरामलक्ष्मणेषु नगर्या निर्यत्सु तन्नगरनरनार्यः कष्टां दशां लेभिरे. अयोध्यावासिलोकाः सपरिवारा राममनुययुः. नेत्रबाष्पपूरितो राजा दशरथोऽपि स्नेहरज्ज्वाकृष्टो राममन्वसरत्. रामलक्ष्मणयोर्नगरान्निर्गतयोरयोध्योद्वसेवाभूत्. अयोध्याबहिरुद्याने गत्वा रामो मातापितरौ न्यवर्तयत, तथा यथोचितालापैः पौरलोकानपि रामो विससर्ज. ततो रामः सीतालक्ष्मणसहितो देशांतरं ययौ, तत्र ग्रामे ग्रामे लोकैः पूज्यमानो महेभ्यैः स्तूयमा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नो धनकनकादिभिर्निमंत्र्यमाणः, सामंतादिभिर्निजराज्यप्रदैः प्रार्थ्यमानोऽपि निःस्पृहत्वेन किंचिदप्यगृह्णन् रामः प्रयाणमकरोत्.

अथ पश्चादागतो दशरथः शोकाकुलो निजहृदि चिंतयति—हे प्राणाः क्व गतो राम—स्तमनुव्रजताधुना ॥ जरसा जर्जरैरंगैः । शक्तिर्दशरथस्य का ॥ १ ॥ अथ मार्गे गच्छन् स श्रीरामश्चिंतयति—तत्तातस्य कृतादरस्य रभसादाह्वानकं दूरत—स्तच्चांके विनिवेश्य बाहुयुगलेनाश्लिष्य संभाषणं ॥ तांबूलं च तदर्धचुंबितमिति प्रेम्णा मुखेनार्पितं । पाषाणोचित हा कृतघ्नहृदय स्मृत्वा न किं दीर्यसे ॥ २ ॥ इतश्च दशरथो राजा भरतं राज्यदानायाह्वास्त, परं दशरथेन दीयमानं राज्यं भरतो नाददे, परं स्वभ्रातृविरहासहः स्वां मातरं कैकेयींप्रति चुक्रोश. ततः कैकेय्याज्ञया परिव्रज्योत्सुको दशरथः सलक्ष्मणं राममानेतुं सचिवान् सामंतांश्च प्राहिणोत. ते मंत्रिणोऽपि यानारूढास्त्वरितं गत्वा पश्चिमयायिनं रामचंद्रं मिलित्वा तत्पादयोः पतित्वा कथयंतिस्म, हे स्वामिन् दशरथस्त्वां राज्यदानाय कैकेय्यनुज्ञया पश्चादाह्वयति, अतो हे स्वामिंस्त्वं निवर्तस्व? सभरतश्च दशरथस्तव विरहं सोढुं न शक्नोति, अतस्त्वं निवर्त्य राज्यं गृहाण? एवं तैर्दीनवचनैः प्रार्थ्यमानोऽपि राघवो न

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्यवर्तयत्, यतो महतां प्रतिज्ञाद्रिपादपवन्न चलति. ततस्ते मंत्रिणो राघवेण विसृज्यमाना वारंवारं कथयंतोऽपि तन्निवर्तनकृताशयाः सहैव चेलुः.

अथ ते जानकीरामलक्ष्मणा उग्रश्वापदान्वितां निर्मानुष्यां घनद्रुमां व्यालजयंकरां चाटवीं प्रापुः. अथाग्रे गच्छंतस्ते त्रयोपि गंजीरावर्त्तजीषणां पृथक्प्रवाहानाम्नीं गंजीरां नदीमीक्षांचक्रिरे. तत्र स्थित्वा रामः सामंतादीनित्युवाच, यूयमितो निवर्तध्वं, नाहं समेष्यामि, अग्रे गच्छतां च युष्माकं कष्टं जविष्यति, यूयं च गत्वा तातस्यास्माकं कुशलोदंतं शंसत ? तथैवास्माकं जनन्योर्जरतस्यापि च कुशलोदंतो वाच्यः, इति कथयित्वा ससीतालक्ष्मणो रामो दुस्तरां गंजीरां च तां तरंगिणीमुत्तार. तटस्थितैस्तैर्मंत्रिभिर्दृष्टो रामो वनमाश्रितः. अथ राममदृश्यमाना बाष्पांबुसिक्तांशुका मंत्रिणो रुदंतो न्यवर्तंत, क्षेमेण चायोध्यां नगरीमगुः, तत्र ते मंत्रिणो दशरथं नत्वा प्रोचुः स्वामिन् रामलक्ष्मणौ तु नायातौ. दशरथस्तद्वचः श्रुत्वा जरतंप्रत्याह जो जरत! अथ त्वं राज्यं गृहाण? मम दीक्षाविघ्नाय च मास्मजूः. तदा जरतोऽवददहं राज्यं नादास्ये, परमहं स्वयं गत्वापि ममाग्रजं रामचंद्रं कथमप्यानेष्यामि. तदा कैकेय्यपि तत्रागत्य राजानं विज्ञपयति, स्वामिंस्त्वया जरताय राज्यं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्तं, परं विनयी भरतो राज्यं नादत्ते, तेन च ममान्यासामपि च राज्ञीनां महद्दुःखं जायते, मया- प्यविमृश्यकारिण्या शुभं न कृतं, ततो रामाय राज्यं देहि? यतः—कौशल्यायाः सुमित्रायाः। सु- प्रजायाश्च दुःश्रवं ॥ रुदितं मम शृण्वंत्या। हृदयं भवति द्विधा ॥ १ ॥ भरतेन समं गत्वा। तौ वत्सौ रामलक्ष्मणौ ॥ अनुनीय समानेष्या—म्यनुजानाहि नाथ मां ॥ २ ॥ तथादिष्टा प्रहृष्टेन। राज्ञा दशरथेन सा ॥ ययौ सभरतामात्या। प्रतिरामं कृतत्वरा ॥ ३ ॥

अथ सा कैकेयी जानकीरामलक्ष्मणान् पश्यंती षड्भिर्दिनैस्तद्वनं प्राप. ततः कैकेयी रामं दृष्ट्वा रथादुत्तीर्य वत्स वत्सेति भाषिणी प्रणमंतं रामचंद्रं मूर्ध्नि चुचुंब. वैदेहीलक्ष्मणावपि कैकेयीपादाब्ज प्रणमंतौ कैकेय्या बाहुभ्यामालिंग्यात्यर्थं रुरुदे. भरतोऽपि रामपादौ नमश्चक्रे, साश्रुदृशं भरतं रामो बाहुभ्यां धृत्वालिलिंग. ततस्ते सर्वेऽपि रामभरताद्याः कस्यचिद्वटवृक्षस्याधो विशश्रमुः. कैकेय्युवाच हे वत्स रामचंद्र! त्वं निवर्तस्व? अयोध्याराज्यं च गृहाण? भरतो राज्यं नादत्ते, अतस्त्वमेव भर- तः, एष सौमित्रिश्च तवामात्यो भविष्यति, भरतस्तव प्रतिहारः शत्रुघ्नश्च तवातपत्रभृद्भविष्यति. कैके- य्येवं प्रोक्ते भरतेनापि तथैवोक्तं. तदा राम उवाच, हे मातस्तातस्य दशरथस्य पुत्रो भूत्वाहं त्वां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिज्ञां कथं त्यजामि? तातेन भरतस्य राज्यं दत्तं मया ह्यनुमतं, अथ पुनः कथं तद्राज्यं गृह्णामि? तदस्तु भरतो राजा द्वयोरपि निदेशतः, इत्युक्त्वा सीतानीतैर्जलैः श्रीरामचंद्रः सर्वसामंतमंत्रिसाक्षिकमुच्चाय भरतं राज्येऽभ्यषिंचत. ततो रामः कैकेयीं बहु संभाष्य भरतं समंत्रिणं विससर्ज, स्वयं च दक्षिणां दिशं प्रतस्थे. भरतः कैकेय्या सममयोध्यां ययौ, तत्र च दशरथार्पितं राज्यभारं भरतो भ्रातृशासनादूरीचक्रे. दशरथश्च सत्यभूतिमहामुनेः पार्श्वे भूयसा परिवारेण समं दीक्षामुपाददे. अथ भरतो भ्रातृवनवासेन हृदि शल्यायितोऽर्हत्पूजोद्यतो रामस्योपानहौ सिंहासने संस्थाप्य स्वयं च यामिकवत्तत्सेवातत्परो राज्यं पालयामास. रामोऽपि सौमित्रिमैथिलसुतासहितो मार्गे गच्छंश्चित्रकूटमतीत्यावंतीदेशे कमपि देशमासादयत. ॥ इति श्रीमत्तपागच्छे भट्टारकश्रीहीरविजयसूरिराज्ये आचार्यश्रीविजयसेनसूरियौवराज्ये पंडितश्रीदेवविजयगणिविरचिते श्रीरामचरित्रे गद्यबंधे रामलक्ष्मणोत्पत्तिपरिणयनवनगमनो नाम चतुर्थः सर्गः समाप्तः ॥ श्रीरस्तु ॥

---

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ अथ पंचमः सर्गः प्रारभ्यते ॥

अथ श्रीरामोऽध्वनि वटस्य मूले विश्रमयितुं निषीदन् तं देशं च वीक्ष्य सौमित्रिमभ्यधात्, भो भ्रातरयं देशः कस्यापि भीत्याधुनैवोद्वसीभूतो लक्ष्यते, यतः—अशुष्ककुल्यान्युद्याना—नीकुवायाश्च सेक्षवः ॥ सान्नानि च खलान्याहु—र्नूतनोद्वसतामिह ॥ १ ॥ तदा च रामः पप्रछ । गछंतं जनमेककं ॥ किमुद्वचाल देशोऽयं । क्व वासि चलितोऽनघ ॥ २ ॥ स ऊचे एषोऽवंतिदेशः, तत्रावंतिनाम नगरी, तस्यां सिंहोदरो नाम राजा द्विषां सिंहवद्दुःसहो वर्तते. अवंतिदेशस्यैकदेशे दशाननपुरनाम नगरमस्ति, तत्र सिंहोदरस्य सामंतो वज्रकर्णनामा राजास्ति, सोऽन्येद्युः पापर्द्धिं कर्तुं वने गतः, तत्र प्रीतिवर्धननामानमेकं महामुनिं कायोत्सर्गस्थमैक्षिष्ट. तं महामुनिं नत्वा राजावोचत् भो महामुने त्वमेकाकी वने द्रुम इव किं तिष्ठसि? मुनिनोक्तमात्महितार्थमहं वने वसामि. तदा भूयोऽपि नृप ऊचे भो साधो अत्र खाद्यपेयादिवर्जिते वने तव किमात्महितं? मुनिस्तं योग्यं ज्ञात्वात्महितमार्हतं धर्ममाख्यत्, राज्ञाप्यर्हद्धर्मं श्रुत्वा साधुपुरतः श्रावकत्वं प्रपेदे, यथा—या देवे देवताबुद्धि—र्गुरौ च गुरुतामतिः ॥ धर्मे च धर्मधीः शुद्धा । सम्यक्त्वमिदमुच्यते ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पिधानं दुर्गतिद्वारे । निधानं सर्वसंपदां ॥ विधानं मोक्षसौख्यानां । पुण्यैः सम्यक्त्वमाप्यते ॥ २ ॥ अंतोमुहुत्तमित्तंमि । फासिश्रं हुज्ज जेहिं सम्मत्तं ॥ तेसिं अवढ्ढपुग्गल—परियट्टो चेव संसारो ॥ ॥ ३ ॥ इति सम्यक्त्वं श्रुत्वा राज्ञाभिग्रहो गृहीतो यथा—विना च देवमर्हंतं । विना साधुं च नापरं ॥ नमस्यामि तदग्रे स । प्रपेदेऽभिग्रहं दृढं ॥ १ ॥ स वज्रकर्णो राजा सम्यक्त्वमूलं द्वादशव्रतं श्रावकधर्मं च प्रतिपद्यैवंविधमभिग्रहं गृहीत्वा साधुं च नमस्कृत्य नगरमध्ये समागतः. अथ स चिंतयति यथा मम नायकः सिंहोदरो राजा, स च मां नमस्कारविमुखं दृष्ट्वा वैरी भविष्यतीति मत्वा मणिमयीं मुनिसुव्रतस्वामिप्रतिमां कारयित्वा स्वांगुलीये न्यवीविशत्. ततश्च यदावंत्यां सिंहोदरं नृपं नमस्कर्तुं स याति तदा तदंगुलीयं करे कृत्वा करौ चाग्रे विधाय राजानं नमस्करोति. एवंविधं वज्रकर्णवृत्तांतं कश्चिद्दुर्जनो मंदमतिः सिंहोदरमहीपतेः सर्वमेकांते समाचख्यौ, खलाः खलु सर्वकषाः, यतः—

तं नत्थि घरं तं नत्थि । देउलं राउलंपि तं नत्थि ॥ जत्थ अकारणकुविआ । दोतिन्निवि खला न दीसंति ॥ १ ॥ मृगमीनसज्जनानां । तृणजलसंतोषचित्तवृत्तीनां ॥ लुब्धकधीवरपिशुना ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निष्कारणवैरिणो जगति ॥ २ ॥ सहजांधदृशः स्वदुर्नये । परदोषेक्षणदिव्यचक्षुषः ॥ स्वगुणोच्चगिरो मुनिव्रताः । परवर्णग्रहणेष्वसाधवः ॥ ३ ॥ एवंविधं दुर्जनस्य वचनं श्रुत्वा तुच्छकर्णः सिंहोदरो महीपतिर्महाहिरिव निःश्वसन्नास्ते, तत्स्वरूपं केनापि पुरुषेण ज्ञात्वा कर्णाभ्यां च श्रुत्वा वज्रकर्णस्य कर्णे कथितं, तत् श्रुत्वा वज्रकर्णेनोक्तं भो महापुरुष! त्वया कथं ज्ञातः सिंहोदरस्य मयि कोपः? केन हेतुना च? तेन नरेणोक्तं श्रूयतां?—कुंदपुरनगरे समुद्रसंगमो नाम वणिगस्ति, यमुनाख्या तत्पत्नी, तयोः पुत्रोऽहमस्मि विद्युदंगनामा, क्रमाद्यौवनं च प्राप्तो भांडमादायाहं क्रयहेतवे उज्जयिन्यां पुर्यामागमं, तत्रोज्जयिन्यां क्रयविक्रयं कुर्वाणस्य मम यौवनोन्मत्ततया इंद्रियदुर्जयतया च कामलतानाम्न्या वेश्यया सार्धं रममाणस्य कालो यातिस्म. एवं काले गच्छति षड्भिर्मासैः सर्वमपि धनं मया विनाशितं, आजन्मपर्यंतं यदर्जितं तत्स्तोकैरेव दिनैर्विनष्टं, धिग्व्यसनं! यतः—द्यूतं च मांसं च सुरा च वेश्या । पापर्द्धिचौरी परदारसेवा ॥ एतानि सप्त व्यसनानि लोके । घोरातिघोरं नरकं नयंति ॥ १ ॥ नटविटभटयुक्तां सत्यशौचादिमुक्तां । कपटशतनिधानं शिष्टनिंदानिदानं ॥ धननिधननिधानं सद्गुणानां पिधानं । परिभवपदमेकं कः पणस्त्रीं भजेत ॥ २ ॥ अत्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



छाया तृणाग्निश्च । खले प्रीतिः स्थले जलं ॥ वेश्यारागः कुमित्रं च । षडेते बुद्बुदोपमाः ॥ ३ ॥ एवंविधया तया पण्यांगनया सार्धं भोगान् भुंजानस्य मम कालो यातिस्म.

अथैकस्मिन् दिने तया कामलतया वेश्यया सिंहोदरराज्ञः पट्टराज्ञी दृष्टा, तस्याः कुंडलयुगलं च विलोक्य मोहितया वेश्यया मम पार्श्वे तत्कुंडलयुगलं याचितं, कथितं च राज्यास्तत्कुंडलयुगलं चौर्येण हृत्वानीय मह्यं देहि? विना च तत्कुंडलयुगलं मम गृहे त्वया नागंतव्यं, तदा मयोक्तमेवमस्तु. ततोऽहं मरणभयमविचिंत्य काममोहितः कुंडलार्थं रात्रौ तत्र नृपौकसि गत एकत्र शय्यायां स्थितौ राज्ञीनृपौ वार्तां कुर्वाणौ मया शुश्रुवाते. श्रीधरया राज्या पृष्टं भो राजन्नद्य तव निद्रा कथं नायाति? उद्विग्न इव कथं दृश्यसे? किं कारणं? सत्यं ब्रूहि? सिंहोदरोऽवदद्देवि । तावन्निद्रा कुतो मम ॥ प्रणामविमुखो याव—द्वज्रकर्णो न मार्यते ॥ १ ॥ अमुं प्रातर्हनिष्यामि । ससुहृत्पुत्रबांधवं ॥ यात्वियं रजनी याव—द्विनिद्रस्यापि मे प्रिये ॥ २ ॥ एतद्वचनं श्रुत्वा कुंडलचौरिकां त्यक्त्वा साधर्मिकवात्सल्यादिह त्वरितं तव पार्श्वे समागतोऽस्मि. तत् श्रुत्वा वज्रकर्णः स्वं नगरं दुर्गखातिकाधान्यतृणकाष्ठादिभिः सज्जीकृत्य स्वयमपि सज्जो बभूव. ततो वज्रकर्णराज्ञा प्रचु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रधनदानपूर्वकं विसर्जितो विद्युदंगः स्वस्थानं गतः.

इतस्तत्क्षणं सिंहोदरोऽपि सबलवाहनः समागत्य जंबूद्वीपं समुद्र इव तत्पुरमावेष्ट्य स्थितः, ततोऽसौ दूतमुखेन वज्रकर्णमवदत्, भो वज्रकर्ण यदि जीवितेन कार्यं, यदि राज्येन कार्यं, यदि च सुखेन कार्यं तदांगुलीयं त्यक्त्वा मह्यं प्रणामं कुरु? अन्यथा त्वां सकुटुंबं हनिष्यामीति दूतेनोक्ते वज्रकर्णोऽवदत्, भो दूत तव राजा मूढो वर्तते यो मत्तः प्रणामं वांछति, मया त्वभिग्रहो गृहीतोऽस्ति, यथा—न पौरुषाभिमानोऽत्र । किंतु धर्माभिमानता ॥ विनार्हंतं विना साधुं । प्रणमाम्यपरं न हि ॥ १ ॥ धर्मद्वारं ततो देहि । मह्यं धर्माय कुत्रचित् ॥ अहमन्यत्र गच्छामि । धर्म एवास्तु मे धनं ॥ २ ॥ इति तदुक्तं दूतेन गत्वा सिंहोदरायोक्तं, परं सिंहोदरो न मन्यते, यतो मानिनः कदापि धर्माधर्मं न गणयंति. ततः परं स सिंहोदरो वज्रकर्णपुरं रुध्ध्वा स्थितोऽस्ति, तत्सैनिकाश्च वज्रकर्णदेशं मुष्णंति, तद्भयाच्चैते ग्रामादय उद्वसा जाताः, अहमपि सकुटुंबो नष्ट्वा प्रत्यासन्नग्रामे स्थितोऽस्मि. क्रूरकर्मया मद्गेहिन्या च किंचिदानेतुं पुनरहं प्रेषितोऽस्मि, अथ तत्कार्यं कृत्वाहं यास्यामि. एवमुक्त्वा यावदाज्ञां मार्गयित्वा स याति तावता रामेण रत्नस्वर्णमयं कटीसूत्रं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्मै दत्वा स विसर्जितः. तं च विसृज्य सीतारामलक्ष्मणा दशांगपुरमीयुः. तत्र नगरबहिश्चंद्रप्रभ-चैत्ये जिनान्नत्वा तन्मंडपे सीतासहितो रामस्तस्थिवान्. रामादेशात्सौमित्रिर्नगरमध्ये गंतुं प्रवृत्तः, नगरे प्रविश्य वज्रकर्णांतिके च गत्वा तत्संसदि स्थितोऽसौ तारामध्ये चंद्र इव शुशुभे. सदाकारं लक्ष्मणं दृष्ट्वा वज्रकर्णोऽभ्यधात्, भो महाभाग! त्वं मम भोजनातिथिर्भव? लक्ष्मणोऽप्युवाच मम प्रभुः सकलत्रो नगरबहिरुद्याने स्थितोऽस्ति, तमादौ भोजयित्वाहं भोक्ष्ये, नान्यथेति. ततो वज्र-कर्णो राजा सौमित्रिणा सार्धं भूयिष्टं भोजनं सव्यंजनमुपरामं निनाय, तेन भोज्येन भोजितौ रामलक्ष्मणौ सीतासहितौ संतुष्टौ. यतः—

देहस्नेहस्वरमधुरताबुद्धिलावण्यलज्जाः । प्राणोऽनंगः पठनसमताक्रोधहानिर्विलासाः ॥ धर्मश्रवणं सुरगुरुनतिः शौचमाचारचिंता । कुक्षौ पूर्णे जठरपिठरे प्राणिनां संभवंति ॥ १ ॥ भुक्त्यनंतरमनुशिष्य रामेण लक्ष्मणोऽवंतिनृपतिंप्रति प्रेषितः. लक्ष्मणः सिंहोदरंप्रति गत्वोचे, भो सिंहोदर! त्वं वज्रकर्णेन सह विरोधं माकार्षीः, सकलमहीभर्ता भरतो निषेधयति. तदा सिंहोदरोऽवोचत्, अयं वज्रकर्णो मत्सेवको मम सामंतो मह्यं नमस्कारं न कुरुते, ममाज्ञां च न मन्यते, तर्हि कथं म-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



या न हन्यते? तदा भूयोऽपि लक्ष्मणोऽवोचत् भो सिंहोदर! असौ त्वय्यविनयी न, किं त्वस्य प्रणामसंधा धर्मानुगा धर्मरक्षका च, अत एनं वज्रकर्णंप्रति मा कुप? इदं भरतेनोक्तं, किंचासमुद्रांतमेदिन्यां भरतः शासिता, ततः क्रुद्धः सिंहोदरो लक्ष्मणं स्माह भो पुरुष! को भरतः? किमहं भरतसेवकः? किं वा भरतो मम स्वामी? यो मां वज्रकर्णं शिक्षयितुं निषेधयति. तत् श्रुत्वा कोपारुणो लक्ष्मणः स्फुरदोष्ठदलोऽवोचत्, रे सिंहोदर! किं त्वं भरतं न जानासि? भरतं नोपलक्षयसि? उपलक्षयामि तावत, त्वं युद्धाय सज्जो भव द्रुतं, मद्भुजाशनिताडितस्त्वमधुनैव क्षयं यास्यसि. तदा सिंहोदरोऽपि ससैन्यो लक्ष्मणं हंतुमुद्यतोऽभवत. तावता लक्ष्मणो गजालानं भुजाभ्यामुन्मूल्य शत्रूंस्ताडयामास. पुनः सौमित्रिरुत्पत्य सिंहोदरेभं च मुष्टिनाहत्य सिंहोदरं केशेषु धृत्वा रज्जुबद्धांगमिव निन्ये रामपार्श्वे. अथ रामं दृष्ट्वा नत्वा च सिंहोदरोऽभाषत हे राजेंद्र! हे रघुकुलोत्तंसरामचंद्र! इहायातस्त्वं मया न ज्ञातः, अथ हे नाथ ममाज्ञानदोषं त्वं क्षमस्व? निजाज्ञां देहि? अहं तव किंकरोऽस्मि, भृत्ये च कोपः शिक्षामात्र एव स्यात्. सा तु मया प्राप्ता. तदा शिष्यं गुरुरिव रामस्तंप्रत्युवाच, हे सिंहोदर! त्वं वज्रकर्णेन सह संधिं कुरु? सिंहोदरोऽपि तथेति प्रत्यप-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



घत. वज्रकर्णोऽपि रामचंद्रस्य शासनात्तत्रागात, विनयेन रामपुरो भूत्वा कृतांजलिरित्युवाच च—स्वामिनौ वृषभस्वामि—वंशजौ रामशार्ङ्गिणौ ॥ युवां दृष्टौ मया दिष्ट्या । किंतु ज्ञातौ चिरादिह ॥ १ ॥ भरतार्धस्य सर्वस्य । युवां नाथौ महाभुजौ ॥ अहमन्ये च राजानो । युवयोरेव किंकराः ॥ २ ॥ ततोऽसौ रामचंद्रंप्रत्युवाच, हे प्रभो अद्य त्वमेनं मत्स्वामिनं सिंहोदरं मुंच? ततो रामचंद्रेणोभयोः संधानं विधाय मित्रत्वं कारितं. वज्रकर्णोऽपि निजां प्रतिज्ञां जगौ—

विनार्हतं विना साधुं । नमस्यो नापरो मया ॥ इति स्वाभिग्रहोऽग्राहि । महर्षेः प्रीतिवर्धनात् ॥ १ ॥ सिंहोदरोऽपि परया । प्रीत्या राघवसाक्षिकं ॥ राज्यार्धं वज्रकर्णाय । सोदर इव दत्तवान् ॥ २ ॥ श्रीधराकुंडले ते च । याचित्वावंतिपार्थिवात् ॥ अदत्त विद्युदंगाय । दशांगपुरपार्थिवः ॥ ॥ ३ ॥ ततो वज्रकर्णो राट् प्रीतयेऽष्टौ च कन्यका लक्ष्मणाय ददौ, सिंहोदरोऽपि समामंतो लक्ष्मणाय कन्याशतत्रयमदात्. समये परिणेष्यामि भवतः सुताः, इदानीं तु वयं मलयाचले स्थास्याम इत्युक्त्वा रामलक्ष्मणाभ्यां विसृष्टौ सिंहोदरवज्रकर्णौ निजं निजं पुरं ययतुः. रामलक्ष्मणौ तु सीतान्वितौ तां निशां तत्र स्थित्वा प्रगे चलितौ, गच्छंतौ च क्रमेण निर्जलं कमपि देशं प्रापतुः. ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति सिंहोदरवज्रकर्णकथानकं ॥

तत्र निर्जले देशे रामलक्ष्मणौ सीतासहितौ कस्यचित्तरोस्तले विश्रांतौ, तदा पिपासाकुला सीता जलं मार्गयतिस्म. तदा रामाज्ञया सौमित्रिर्जलमानेतुमगात. इतस्ततो वने भ्रमन् स एकं सरोवरं दृष्ट्वा हृष्टः. यतः—निंबचंपकवटांबरपाटलै—र्लिबुजंबूमुचकुंदपिप्पलैः ॥ दाडिमीकदलीचंदनांबुजैः । शाखिभिश्च कलितं महासरः ॥ १ ॥ गंभीरं सरसं स्वच्छं । सद्वृत्तं सत्वशोभितं ॥ दृष्टं सरोवरं तेन । तत्रैकं साधुचित्तवत ॥ २ ॥ दृष्टं सरोवरं रम्य—मनेकांभोजमंडितं ॥ दूरादानंदजनकं । वयस्यमिव वल्लभं ॥ ३ ॥ तत्सरो दृष्ट्वा हर्षितो लक्ष्मणो यावत्सरोवरमध्ये याति तावता कूबरपुराधीशः कल्याणमालाभिधो राजा लक्ष्मणेन दृष्टः, तेनापि लक्ष्मणो दृष्टः. अथ लक्ष्मणं दृष्ट्वा स्त्रीवत्स कामचेष्टां कर्तुं लग्नः, यथा—द्वाविंशती रामाणां विकारेंगितानि, यथोच्चैर्निष्टीवनं, सानुरागनिरीक्षणं, श्रवणसंयमनं, आलस्यमोटनं, मुद्रिकाकर्षणं, गुप्तांगदर्शनं, प्रजल्पने हसनं, स्तनप्रपीडनं, भूषणोत्पाटनं, नूपुरोत्कर्षणं, कर्णकंडूयनं, केशप्रसारणं, चरणसंयमनं, नखविलेखनं. परिधानसंयमनं, निःश्वासोच्छ्वसनं, मुहुर्जृंभणं, बालालिंगनं, बालमुखचुंबनं, प्रियाश्लेषणं, अतिक्रांतप्रेषणं,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१श्रात्कामस्मरणं च. स्निग्धं दृष्टिपथं विभूषितवपुः कर्णस्य कंडूयनं। केशानां च मुहुर्मुहुर्विवरणं बालस्य चालिंगनं ॥ नाभेर्दर्शनमग्रतश्च गमनं वार्ता सखीभिः सह। कुर्युः प्रीतिवशात्स्त्रियोऽपि सततं दृष्ट्वा नरं वांछितं ॥ १ ॥ स्त्री कांतं वीक्ष्य नाभिं प्रकटयति मुहुः क्षेपयंती कटाक्षान्। दोर्मूलं दर्शयंती रचयति कुसुमापीडमुत्क्षिप्य पाणिं ॥ निःश्वासस्वेदजृंभाः श्रयति कुचतटं संसिवस्त्रं विधत्ते। सोत्कंठं वक्ति नीवीं श्लथयति च दशत्योष्टमंगं भिनत्ति ॥ २ ॥

इत्यादिविकारान् दर्शयन् कल्याणमालो राजा लक्ष्मणंप्रति भोजनाय निमंत्रयति, लक्ष्मणो राज्ञो मान्मथं विकारं दृष्ट्वा पुनर्देहलक्षणानि च निरीक्ष्य दध्यावेषा पुंवेषाकारधारिणी नारी दृश्यते. इति ध्यात्वा लक्ष्मणोऽवोचत्, मत्प्रभुः सभार्य इतो दूरदेशेऽस्ति, तेन विनाहं न भुंजे, कल्याणमालराज्ञा स्वप्रधानपुरुषा रामं सप्रियमाह्वातुं प्रेषिताः, तेऽपि गत्वा प्रियवाक्यैः श्रीरामचंद्रं कल्याणमालराज्ञः समीपे आनिन्यिरे. कल्याणमालोऽपि रामचंद्रं सीतां च नत्वा तयोः कृते पटकुटीं तत्कालं काराप्य सपरिछदः सेवां चक्रे, तत्र कृतस्नानभोजनं श्रीरामलक्ष्मणं चोपविष्टं दृष्ट्वा कल्याणमालो राजा सहैकमंत्रिणा स्त्रीवेषभृद्भूत्वा रामचंद्रं प्रणनाम, राम उवाच हे भद्रे! पुरुषीभूय स्त्री-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भावं किं निह्नुषे? कूबरपतिः कल्याणमालोऽप्यूचे हे स्वामिन्नस्मिन् कूबरपुरे महानगरे वालिखिल्ल-नामा राजा, तस्य पत्नी नाम्नी पट्टराज्ञी, सा चापन्नसत्वाभूत्. इतश्च म्लेच्छसैन्यमागत्य वालिखिल्लेन सह संग्रामं विधाय वालिखिल्लं बध्ध्वा देशग्रामादिकं च भंक्त्वा स्वस्थानं प्राप्तं. अथ वालिखिल्लप-त्न्या पुत्री प्रसूता, तदा सुबुद्धिप्रमुखैर्मंत्रिभी राज्ञ्या पुत्रो जात इति नगरे ग्रामे चोद्घोषितं, त-त्प्रभृति चाद्ययावत्पुरुषवेषेण मयेदं राज्यं रक्षितं, मातृमंत्रिजनांश्च मुक्त्वान्यैर्नोपलक्षितास्मि, अहं म्लेच्छानां भूरिद्रव्यं यच्छामि, परं ते म्लेच्छा मत्पितरं न मुंचंति. अतोऽद्य त्वच्छरणं समागतास्मि, य-था युष्माभिः सिंहोदराद्वज्रकर्णो मोचितस्तथा तेभ्यो म्लेच्छेभ्यो मत्तातमपि मोचयत? रामोऽप्युवा-च भो कल्याणमालिन्! यावत्तव पितरं म्लेच्छेभ्यो मोचयामस्तावत्त्वं पुंवेषेणैव स्थिरीभव? कल्या-णमालोऽपि महाप्रसाद इत्युक्त्वा पुनः पुंवेषमकरोत. मंत्रिणोक्तं हे स्वामिन्! भवदाज्ञयास्या वरो लक्ष्मणो भवतु, रामचंद्र उवाच सांप्रतं तातादेशाद्वयं देशांतरं यामः, वलमानश्च लक्ष्मण एनां प-रिणेष्यति, तेनापि रामचंद्रवचनं प्रतिपन्नं.

अथ दिनत्रयं तत्र स्थित्वा निशाशेषे रामलक्ष्मणौ सीतासहितौ केनाप्यवज्ञातौ निर्गतौ, क-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ल्याणमालोऽपि प्रातरपश्यन् रामलक्ष्मणौ जानकीसहितौ विमनस्कः स्वपुरमागत्य तथैव राज्यं चक्रे, क्रमेण रामोऽपि नर्मदानदीमुत्तीर्य पथि चचाल, अग्रे पथिकैर्वार्यमाणास्ते विंध्याटवीं विविशुः, कथंभूतामटवीं? रौद्रां, भयंकरीं, घोरां, बिभत्सां, मानुषोज्झितां, दुःप्रापोदकां, दुर्लंघ्यां, शिवाफूत्कारसंपूर्णां, घूकघूघूत्कारां, सिंहनादसंपूर्णां, वेतालकिलकिलाकुलां, दावानलदीप्तां, पुलिंद्रीगीतमंडितां, कांतारजनभयंकरामिति. तत्रादौ दक्षिणदिशि कंटकीवृक्षस्थितः काक एको विरसं रटति, तथैवोत्तरादिशि स्थितोऽन्यः काकः क्षीरद्रुमोपविष्टो मधुरं विरौति, पुनः पुनस्तथैव जल्पंतौ काकौ श्रुत्वा तेषां न विषादो न च हर्षो जातः, महांतः शकुनापशकुनं न गणयंति. यतः—सिंह न जोवे चंदबल । नवि जोवे धणऋद्धि ॥ एकलमो सहसां भीडे । ज्यां साहस त्यां सिद्धि ॥ १ ॥ अथ तौ रामलक्ष्मणावग्रे गच्छंताबुदायुधं म्लेच्छसैन्यं ददृशतुः. भरतपालितपृथ्वीमुपद्रोतुं स्वदेशान्निर्गतो यवनसेनापतिश्चंमवेगः सीतां वीक्ष्य स्मरातुरः स्वपत्तीनित्यादिदेश, भो भो सुभटा एतौ द्वौ पुरुषौ विनाशयत? पश्चाच्च मत्कृते एतां वरस्त्रियं समानयतेति स्वामिवचनं श्रुत्वा म्लेच्छसेवका धाविता रामलक्ष्मणौ हंतुं. लक्ष्मणोऽपि म्लेच्छान् वीक्ष्य रामंप्रति बभाषे, भो आर्य! त्वं सीतया सह सुखं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिष्ट? यावदहममून् म्लेछान् शुनकानिव विद्रावयामीत्युक्त्वा लक्ष्मणो धनुरधिज्यं कृत्वाऽनादयत. तन्नादत्रासिता दिशोदिशं पलायमाना म्लेछाः शरणलालसा राममुपाययुः. म्लेछराजोऽपि मुक्तशस्त्रो दीनास्यो मरणभयग्रस्तो लक्ष्मणात्त्रस्तः स्यंदनादुत्तीर्य रामचंद्रं नत्वाग्रे समुपाविशत. ततः स म्लेछराज ऊचे श्रूयतां देव मच्चरित्रं, कौशांबीपुर्यां विश्वानरो द्विजवरोऽस्ति, सावित्री नाम तत्पत्नी, तयोः पुत्रो रुद्रदेवनामाहं विप्रोऽस्मि, सोऽहं बालत्वे पित्रा पालितः क्रमेण यौवनं प्राप्तः पित्रा परिणायितः, परं व्यसनग्रहग्रस्तः पित्रा गृहान्निष्कासितः.

अथैकस्मिन् दिने चौरिकां कुर्वन् क्षात्रमुखे धृतो दुष्टै राजपुरुषै राजाग्रे नीतः. कुपितेन राज्ञा च शूलायामारोपयितुमादिष्टः, ततः क्रूरै राजपुरुषैरहमुपशूलां नीतः, तत्र केनचित् श्रावकवणिजा दंडं दत्वाहं मोचितः. ततस्तेन वणिजोक्तं भो पुरुष! त्वमद्यप्रभृति चौरिकां माकार्षीः, यतः— चौर्यपापद्रुमस्येदं । वधबंधादिकं फलं ॥ जायते परलोके तु । फलं नरकवेदना ॥ १ ॥ इत्यादिशिक्षां दत्वा विसर्जितः सोऽहं चौरस्तं देशं त्यक्त्वा ग्रामाद्ग्रामांतरं भ्रमन्नत्रागां पल्लीपतिं च सेवे. कतिचिद्वर्षांते पल्लीपतिना स्वपदे स्थापितोऽहं म्लेछाधिपो जातः. कांकेतिदत्तनामास्यां पल्ल्यां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थितोऽहं देशं लुंटयामि, देशाधिपांश्च बध्वानयामि, तेभ्यश्च दंडं लात्वा तान्मोचयामि, परं कोऽपि मां जेतुं न शक्नोति, सर्वेऽपि राजानो मम वशवर्त्तिनः, अहं कस्यापि वशे नास्मि, परं तव वशेऽस्मि, तव गुणैश्च क्रीतोऽस्मि, ममादेशं देहि? तदा रामेणोक्तं त्वं वालिखिल्लं विमुंच? तत् श्रुत्वा किरातराट् वालिखिल्लं मुमोच. वालिखिल्लोऽपि राघवं नमश्चक्रे. ततो रामाज्ञया पल्लीपतिना कांकेन स वालिखिल्लः कुबेरपुरे निन्ये. तत्र राजा निजां सुतां कल्याणमालां पुंवेषामपश्यत्, तदा स मंत्रिणं पप्रछ भो मंत्रिन्नेषा पुत्री पुरुषवेषं किं बिभर्त्ति? तदा मंत्रिणा जन्मत आरभ्य सर्वोऽपि वृत्तांतः कथितः. पुनः प्रोक्तं चेयं कल्याणमाला लक्ष्मणाय दत्तास्ति. वालिखिल्लेनापि स्ववृत्तांतः कथितः. एवं तौ राजामात्यौ परस्परं संमिलितौ संतुष्टौ सुखमनुभवंतौ तिष्ठतःस्म. कांकः पल्लीपतिरपि राज्ञा वालिखिल्लेन पूजितः स्वस्थचित्तः स्वस्थानं गतः. ॥ इति वालिखिल्लनृपतत्पुत्रीकल्याणमालाकथा ॥

अथ रामोऽपि ततश्चलितो विंध्याटवीमतिक्रम्य तापीमहानदीं प्राप. तापीनदीमुत्तीर्य तद्देशप्रांतवर्तिनमरुणाख्यं ग्रामं रामः संप्राप्तः. तत्रापि पिपासिता सीता जलं ययाचे. तदा सलक्ष्मणो रामः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कस्यापि क्रोधिनोऽग्निहोत्रिणो विप्रस्य गृहे गत्वा सलिलं याचितवान्. तदा सुशर्मानाम्नी विप्रभार्या तेषां त्रयाणां पृथक्पृथगासने समुपावेश्य शीतलं जलं पाययामास. यथा—स्वच्छं सज्जनचित्तवल्लघुतरं दीनार्त्तवच्छीतलं । पुत्रालिंगनवत्तथातिमधुरं बालस्य संजल्पवत ॥ एलोशीरलवंगचंदनलसत्कर्पूरसंवासितं । पाम्भ्योत्पलकेतकीसुरभितं पानीयमानीयतां ॥ १ ॥ एवंविधं पानीयं यावत्सा तेषां पायति तावत्तस्य पतिः कपिलविप्रस्तत्र समायातः, स तु स्वभावेन रोषणः, पत्न्या जलं पायितं दृष्ट्वा पिशाच इव रुष्टो गेहिनीमभाषिष्ट, यथा—मलिनानां किमेतेषां । प्रवेशो मम वेश्मनि ॥ पापीयसी त्वया दत्तो—ऽग्निहोत्रमशुचीकृतं ॥ १ ॥ एवं च कुपितं विप्रं । क्रूरं राजानुजः क्रुधा ॥ करीवारभतोध्धृत्वा । परिभ्रमयितुं दिवि ॥ २ ॥ रामोऽप्युवाच को नाम । कोपोऽस्मिन् कीटमात्रके ॥ द्विजब्रुवं तमेनं च । मुंच मुंच हि मा तुद ॥ ३ ॥ रामाज्ञया च सौमित्रि—स्तं मुमोच शनैर्द्विजं ॥ ससीतालक्ष्मणो रामो । निर्जगाम च तद्गृहात् ॥ ४ ॥

अथ ते त्रयोऽपि गच्छंतः क्रमादेकं भयंकरं महदरण्यं प्रापुः. तत्रारण्ये स्थितयो रामलक्ष्मणयोः कज्जलश्यामजलदो वर्षाकालः समुपाययौ. तस्मिन् समये श्रीरामचंद्रो वटतरोरधस्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थौ, ततस्तेन लक्ष्मणंप्रत्युक्तं भो भ्रातरावां वर्षाकालमत्रैव वटतरोरधः स्थास्यावः. आकर्ण्य तद्वचो भीत—स्तन्न्यग्रोधनिवास्यपि ॥ इभ्यकर्णाभिधो यक्षो । गोकर्णं स्वप्रभुं ययौ ॥ १ ॥ तत्र गत्वा स निजस्वामिनं गोकर्णयक्षंप्रत्यूचे हे स्वामिन् मद्वटे द्वौ पुरुषौ सतेजस्कौ प्रतापाक्रांतविश्वौ समागतौ स्तः, ताभ्यां चाहं निजवासाद्वटान्निर्वासितः, अतो हे प्रभो ममात्राणस्य त्वं परित्राणं कुरुष्व? तौ हि मद्वटद्रुमे सकलां प्रावृषं स्थास्यतः. तदा गोकर्णयक्षेणावधिज्ञानं प्रयुक्तं. तेन ज्ञानेन ज्ञातं यदेतौ रामशार्ङ्गिणौ मम प्राघूर्णकौ, अनयोरर्थे एकां नवीनां नगरीं करोमीति चिंतयित्वोत्तुंगवप्रां प्रोत्तुंगप्रासादां धान्यपरिपूर्णां जिनप्रासादमंडितां नवयोजनविस्तीर्णां द्वादशयोजनायामां रामपुरीनामपुरीं गोकर्णसुरो रामकृते कृतवान्. अथ प्रातःसमये मंगलपाठकेन मागधेन बोधितो राजा चिंतयति किमेतद् दृश्यते? सप्तमभूमिस्थस्वर्णपल्यंकस्थं स्वं दृष्ट्वा तस्य विस्मयो जातः, कैषा नगरी? कोऽत्र राजा? किं देवेनेयं निर्मिता? मत्पुण्येन वा निष्पन्ना? इति चिंताप्रपन्ने रामे वीणाव्यापृतकरो गोकर्णयक्षोऽवादीत्, हे स्वामिन्! हे रघुकुलोत्तंस! हे श्रीरामचंद्र! त्वत्कृते एषा नगरी मया त्वत्पुण्येन कृतास्ति, अतस्त्वमत्र सपरिवारेण मया सेव्यमानः सुखं तिष्ठ? यथारुचि च सुखमनु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व? इति तेन यक्षेण प्रार्थितो यक्षयक्षिणीभिर्निषेवितः सीतासौमित्रिसंयुतः श्रीरामः सुखं तत्रावतस्थे. इतश्च कपिलनामा विप्रः समिधानयनहेतवे तत्र महारण्ये पर्शुपाणिः समाययौ, स विप्रो रामपुरीं दृष्ट्वा चिंतयति किमेषा नगरी वेंद्रजालं वा गांधर्वपुरं? एवं चिंताप्रपन्नो विप्रः कांचिन्नारीरूपधारिणीं यक्षिणीं दृष्ट्वाऽपृच्छत् कैषा नगरी? कोऽत्र राजा? तयोक्तमेषा रामपुरी, अत्र च श्रीरामचंद्रो राजा सीतालक्ष्मणयुतो राज्यं करोति, दीनादिभ्यश्च स दयानिधिर्दानं ददाति, अतो भो विप्र! त्वमपि गत्वा रामचंद्रं याचस्व? एष तव धनं दास्यति, विप्रेणोक्तं स रामो मया कथं लभ्यते? तयोक्तं शृणु? अस्यां नगर्यां द्वारचतुष्टयं विद्यते यक्षैश्च रक्ष्यते, अनुपलक्षितश्च यथातथा कश्चिदपि प्रवेशं नोपलभते. अस्या नगर्याः पूर्वद्वारे श्रीऋषभदेवचैत्यं वर्तते, तद्यथाविधि वंदित्वा श्रावकीभूय च यदा त्वं यास्यसि तदा प्रवेशं लप्स्यसे, नान्यथा. कपिलोऽप्यर्थार्थी तद्वचनं श्रुत्वा साधूपांते गत्वा चैत्यवंदनादिकं च शिक्षयित्वा लघुकर्मत्वात्क्रमेण श्रावकोऽभवत्, स्वां भार्यामपि च श्राविकां व्यधात. ततः स कपिलो जन्मदौःस्थ्यदग्धः पूर्वद्वारस्थिते जिनचैत्ये जिनप्रतिमां नत्वा रामपुरं गत्वा राजद्वारे प्रविश्य मैथिलीरामलक्ष्मणानुपलक्ष्योच्चैः स्वकृतपूर्वाक्रोशं स्मरन् विभाय.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदा लक्ष्मणो मिष्टवचनेन तमभ्यधाद्भो विप्र! त्वं मा भैषीः, रामचंद्रं याचस्व? ततः कपिलो रामचंद्राद्धनं ययाचे. तदा रामेण पृष्टं भो विप्र! त्वं कुतः समायातः? विप्रेणोक्तं हे स्वामिन्! किं त्वं मां न वेत्सि? अहमरुणग्रामवासी कपिलनामा विप्रोऽस्मि, येन यूयमतिथीभूता मया दुर्वचसापमानिताः, कुपितेन च लक्ष्मणेन मार्यमाणो युष्माभिर्मोचितः सोऽहं कपिलनामा विप्रः, ततो भूरिद्रविणदानेन रामेण कृतार्थीकृतः स विप्रो भूरिधनसंयुतः स्वग्रामं गतः. ततः स कपिलो दीनादिभ्यो दानं ददानो नंदावतंससूरिणां समीपे व्रतमग्रहीत. अथ वर्षायामतीतायां रामं यियासुं प्रेक्ष्य गोकर्णो यक्षो विनयाद्विनम्रदेहः कृतांजलिरिदमूचे, भो स्वामिन्! मया यत्किंचिद्भक्तिस्खलितं त्वयि कृतं तत्त्वं क्षमस्व? यतो महापुरुषा नतवत्सला भवंति. इत्युक्त्वा रामं नत्वा तस्मै स्वयंप्रभनाम हारमदत्त, सौमित्राय च चूडामणिं कुंडलयुगलं च, सीतायै चेप्सितदायिनीं वीणां दत्वा रामं च बहु संभाष्य स यक्षस्तिरोदधे, स्वां कृतां च रामपुरीं संजह्रे. इति गोकर्णयक्षकथानकं ॥

अथ तौ रामलक्ष्मणौ जानकीसहितौ पृथ्वीं भ्रामंतौ प्रतिदिनं चेलतुः, क्रमेण विजयपुरं प्राप्तौ, तस्मिन्नगरे बहिरुद्याने मरुद्दिशि न्यग्रोधवृक्षतले वेश्मसन्निभे सीतारामलक्ष्मणा विशश्रमुः, स-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कल्लं दिनं तत्र वटे स्थित्वा निशायां लक्ष्मणं प्राहरिकत्वे मुक्त्वा सीतासहितो रामः सुखं सुष्वाप. अथ तस्मिन्नगरे महीधरो नाम राजा, तस्य पट्टदेवींऽद्राणीनाम्नी, तयोः पुत्री वनमालास्ति, सा बाल्येऽपि सौमित्रेर्गुणसंपदं श्रुत्वा रूपं चाकर्ण्य तद्वरणे कृतनिश्चयान्यं वरं न वांछति. इतश्च स महीधरो राजा दशरथं नृपं प्रव्रजितं श्रुत्वा, रामलक्ष्मणौ च वनवासाय निर्गतौ श्रुत्वा मनसि विषण्णः. ततः स महीधर इंद्रपुरे नगरे चंद्रनरेशितुः पुत्राय सुरेंद्ररूपाय वनमालां ददौ. अथ सा वनमाला तत् श्रुत्वा मरणे कृतनिश्चया तस्यां रात्रौ तस्मिन्नुद्याने रामलक्ष्मणपवित्रिते वटे गता, यक्षायतने प्रविश्य वनदेवताः प्रपूज्य वटे चारुह्य वटाधिष्ठायितां देवीं च मनसि संस्मृत्य जिनदेवगुरून् स्मृत्वा प्रांजलिं कृत्वोचे यथा—सा प्रोचे प्रांजलिर्भूत्वा । मातरो वनदेवताः ॥ दिग्देव्यो व्योमदेव्यश्च । सर्वाः शृणुत मद्वचः ॥ १ ॥ नाभूदिह भवे ताव–न्मद्भर्ता स च लक्ष्मणः ॥ भूयाद् भवांतरे तर्हि । भक्तिस्तव ममास्ति चेत ॥ २ ॥ इत्युदित्वा कंठपाशं । विधायोत्तरवाससा ॥ बध्ध्वा च वटशाखायां । झाक्स्वात्मानमलंबयत् ॥ ३ ॥ भद्रे मा साहसं कार्षी—र्लक्ष्मणोऽहमिति ब्रुवन् ॥ लक्ष्मणोऽपास्य तत्पाशं । तामादायोत्ततार च ॥ ४ ॥ प्रभातसमये जाते प्रबुद्धयो रामसीतया·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लक्ष्मणोऽशेषं वनमालाया वृत्तांतं शशंस. वनमालापि ह्रियाधोमुखी तत्क्षणं जानकीरामचरणारविंदेभ्यो नमस्कारमकरोत.

इतश्च महीधरपत्नींद्राणी राज्ञी वनमालामपश्यंती करुणस्वरं पूचक्रे. तत् श्रुत्वा महीधरो राट् सपरिकरस्तदन्वेषणाय निर्ययौ, गत्वा च सर्वत्र विलोकयन् यत्र ते रामलक्ष्मणाद्यास्तत्राजगाम. तत्र च सीतासमीपे वनमालां दृष्ट्वा राजा चिंतयति, नूनमेतौ कुमारिकातस्करौ, अरे हतहतैतान् कुमारिकातस्करानिति श्रुत्वा तत्सैनिका धाविताः. तान् सैनिकानागच्छतो दृष्ट्वा रामानुजो धनुरास्फाल्य ज्यानादं कुर्वाणो लक्ष्मणो महीधरसैन्यं विद्रावयामास. भग्नं स्वसैन्यं दृष्ट्वा महीधरेणोपलक्षितो लक्ष्मणः, पादयोः पतित्वा क्षामितश्च. ततो लक्ष्मणेन स महीधरो नीतो रामसमीपं. सोऽपि रामं नत्वा स्तौति, यथा धन्योऽहं यस्य गृहे यूयं प्राघूर्णकाः समायाताः, मयाऽज्ञानवता च न ज्ञाताः, अथ फलितं मे प्राचीनं कर्म, फलितः कल्पतरुः, तव साम्यं केनानुमीयते? यथा—क्षारो वारिनिधिः कलंककलुषश्चंद्रो रविस्तापकृत । पर्जन्यश्च जमाशयः स्वयमुताहश्यः सुवर्णाचलः ॥ शून्यं व्योम सुधा द्विजिह्वविधुरा स्वर्गस्य धेनुः पशुः । काष्ठं कल्पतरुर्दृषत्सुरमणिस्तत्केन साम्यं सतां ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ १ ॥ इति स्तुत्वा पुनः स कथयति यूयं मत्सुतापुण्यैः प्रेर्यमाणा इहागताः, मयेयं वनमाला पुत्री पूर्वं लक्ष्मणाय कल्पिताभूत्, अतो हे रामचंद्र सांप्रतं मया तव साक्षिकं तस्मै दत्तेति कथयित्वा स जानकीरामलक्ष्मणान्निजसद्मनि निनाय, भक्त्या च भोजयामास.

इतश्च तेषु तत्र तिष्ठत्सु अतिवीर्यराड्दूतो महीधरंप्रत्यूचे, भो महीधर! नंदावर्तपुराधीशोऽतिवीर्यो राजा भरतेन सह विग्रहे जाते साहाय्याय त्वामाह्वयति, तस्यान्येऽपि बले भूयांसो भूभुजोऽभ्येयुः, अतस्त्वमपि महाबलत्वादतिवीर्येणाहूयसे. अथ लक्ष्मणो महीधरमपृच्छत्, भो महीधर! केन हेतुनातिवीर्यस्य राज्ञो भरतेन सह विरोधः? महीधरेणोक्तमतिवीर्यो राडतिवीर्यत्वाद्भरताद्भक्तिमिच्छति, भरतोऽप्यस्याज्ञां न मन्यते. एतदेव विग्रहकारणं. ततः स दूतं पृच्छति भो दूत! अतिवीर्यस्य संगरे भरतः किं समर्थो भविष्यति? दूतोऽप्यूचे, अतिवीर्यो महाराजा, भरतोऽपि तथैव च, अतोऽनयोः संगरे जयलक्ष्मीर्दोलायते, न ज्ञायते कस्य जयोऽथवा कस्य पराजयो भविष्यतीति कथयित्वा स्थिते दूते महीधरेण राज्ञोचे भो दूत! त्वं गच्छ? अहं सपरिकरस्त्वरितमेव समेष्यामीत्युक्त्वा प्रेषितो दूतः. अथ राजा महीधरश्चिंतयति, धिगहोऽतिवीर्यस्याल्पमेधित्वं! यदस्मानाहूय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भरतं योधयिष्यति. अथ राम उचे भो महीधर! त्वमत्र तिष्ठ? बलसंयुतैस्तव सुतैः सहाहमेव यास्यामि, गत्वा च यथोचितं करिष्यामि, महीधरेणोक्तमेवमेव भवतु.

इत्युक्त्वा महीधरेण निजपुत्रबलपरिकरपरिवृतौ रामलक्ष्मणौ सीतासहितौ प्रेषितौ, तावपि नंदावर्तपुरं यातौ, तदा तन्नगरोपांते क्षेत्रदेवता राममभाषत तव किमभीष्टं करोमि? रामेणोचे भो देव! तत्कुरु येन मम सर्वेऽपि सैनिकाः स्त्रीरूपाकारधारिणो भवंति, अहमपि स्त्रीरूपो भवामि. यथा लोके वार्ता भवति यदतिवीर्यः स्त्रीभिर्जितः. एवमतिवीर्यस्यायशःकृते तेन स्वसैन्यस्य स्त्रीरूपं कारापितं. इतश्च रामेणातिवीर्योपरि दूतः प्रेषितः, दूतेनोक्तं भो अतिवीर्य! तव साहाय्यकृते महीधरेण स्वसैन्यं प्रेषितमस्ति, अतिवीर्यः स्त्रीसैन्यमागतं श्रुत्वा महीधरोपरि कुपितो बाढस्वरेणैवं वक्ति, नूनं मुमुर्षुरयं महीधरो येन स्त्रीसैन्यं प्रेषितं. अथ भो भो सेवकाः! इदमयशस्करं सैन्यं द्रुतं निर्वास्यतां? एकोऽप्यहं भरतं जेष्यामि, एभिः सहायैः किं स्यात? किंच भो सामंताः? नूनं महीधरेण मम हास्यकृते स्त्रीसैन्यं प्रेषितं. एवं प्रोच्यमानेऽतिवीर्ये तत्क्षणादेव तत्स्त्रीसैन्यं द्वारमागतं, तदातिवीर्येणोक्तं, भो सामंता एताः स्त्रियो गले धृत्वा निर्वास्यतां? ततः सामंताः सपदातयः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समुद्भाय स्त्रीसैन्यमुपद्रोतुं यावद्यांति तावता रामेणोन्नस्तंमुन्मूल्य तेन स्तंभेन हत्वा सामंता भूमौ पातिताः, तेन सामंतभंगेनातिवीर्यो भृशं कुपितो दारुणं खड्गमाकृष्य रणाय स्वयमुत्तस्थौ. अथ लक्ष्मणस्तत्खड्गमाच्छिद्य तं च केशेष्वाकृष्य वस्त्रेण बध्ध्वा रामसमीपमनयत्. अथ सीतासहितेन रामेण करुणापरेण मोचितोऽतिवीर्यः सीतारामलक्ष्मणानां पादयोर्निपत्य भरतसेवां च प्रत्यपद्यत. ततः क्षेत्रदेवतया सर्वेषां सैनिकानां स्त्रीवेषः संजह्रे. ततोऽतिवीर्येण महत्सन्मानं विधाय रामलक्ष्मणौ संतोषितौ.

अथ सोऽतिवीर्यो मानध्वंसेन दध्यावहमथान्यं नृपं कथं सेविष्ये? इत्यहंकारपरोऽसौ दीक्षार्थी रामेण निषिद्धोऽपि विजयाख्ये निजपुत्रे राज्यं न्यस्य प्राव्रजत. ततोऽसौ विजयाख्यो राजा रतिमालाभिधां निजां भगिनीं लक्ष्मणाय ददौ. ततः ससैन्यो रामो विजयपुरपत्तनं ययौ, विजयराजा च भरतं सेवितुमयोध्यां गतः. भरतोऽपि विज्ञाततदुदंतो नतवत्सलो विजयरथं बहुमेने. विजयनृपोऽपि निजभगिनीं विजयसुंदरीं भरताय ददौ. इतोऽतिवीर्यो मुनिर्विहरंस्तत्राययौ, भरतस्तं साधुं वंदित्वा क्षमयामास. तद्देशनां श्रुत्वा हर्षितो भरतो विजयनृपं व्यसर्जयत्, सोऽपि निजे नंदा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वर्त्तपुरे गत्वा तत्र सुखमनुभवन्नास्ते. इतश्च रामचंद्रो महीधरमनुज्ञाप्य वनाय गंतुं समुद्यतः, तदा वनमाला लक्ष्मणमनुयियासुरेवमुवाच, हे सुंदरि वनमालेऽधुनाहं भ्रातुः शुश्रूषकोऽस्मि, अतः सांप्रतं तव पाणिग्रहणं कृत्वा कथं भ्रातुः शुश्रूषां करोमि? तव पाणिग्रहणे कृते भ्रातृशुश्रूषा न भवेत्, अतस्त्वमधुना गृहे तिष्ट? पुनर्यदि समेष्यामि तदा त्वां सह नेष्यामि, तया च तद्विषये स रात्रिभोजनशपथं कारितः, यथा हे सुंदरि रात्रिभोजिनां पुरुषाणां पापेनाहं लिप्ये यद्यहं भूयोऽपि चेन्नायामीत्युक्ते तयापि मानितं. ततश्चलितौ रामलक्ष्मणौ सीतासहितौ. ॥ इति महीधरनृपपुत्रीवनमालाकथानकं ॥

इतश्च रामलक्ष्मणौ क्रमाद्वनान्युल्लंघ्य क्षेमांजलिपुरीं प्रापतुः, तन्नगराद्बहिरुद्याने लक्ष्मणानीतैः फलैर्जानकीकरसंस्कृतै रामो बुभुजे. अथ तत्र राममनुज्ञाप्य कौतुकाल्लक्ष्मणः पुर्यां प्राविशत्. तत्र स सौमित्रिरुच्चैरित्युद्घोषणामश्रौषीत्—शक्तिप्रहारं सहते । योऽमुष्य पृथिवीपतेः ॥ तस्मै पणियनाय । ददात्येष स्वकन्यकां ॥ १ ॥ तत्पटहं निशम्य लक्ष्मणेन तन्नगरनिवासी कश्चित्पुमान् पृष्टः, सोऽवददत्रास्ति बलीयान् शत्रुदमनाभिधो राजा, तस्य राज्ञः कनकादेवी पट्टराज्ञ्यस्ति, तयो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्च पुत्री जितपद्मानाम्नी. सा च यौवनवती पित्रैकदा दृष्टा, ततस्तस्या वरपरीक्षार्थमिदमारभ्यते, यो मे शक्तिप्रहारं सहते तस्यैवैषा कन्या दीयते, परं तादृशः कोऽपि नास्ति यस्तच्छक्तिप्रहारं सहते. तत श्रुत्वा लक्ष्मणो राजानमपृच्छत् नो राजन् त्वया किमिदमारब्धं शक्तिप्रहारादिकं? राज्ञोक्तं त्वं कोऽसि? लक्ष्मणेनोक्तमहं भरतदूतोऽस्मि, केनचित्प्रयोजनेन च गच्छन्निमां तव पटहोद्घोषणां श्रुत्वा तव कन्यां परिणेतुमागतोऽस्मि. राज्ञोक्तं भो दूत! किं त्वं मम शक्तिघातं सहिष्यसि? लक्ष्मणेनोक्तं, न केवलमहमेकं ते शक्तिघातं सहिष्ये, किंत्वेवंविधान् पंच प्रहारानपि सहिष्ये. तदानीं सा जितपद्मा राजकन्यापि रामानुजं दृष्ट्वा तत्क्षणादेव मदनातुरा जाता. ततो लक्ष्मणानुरागिण्या तया राजपुत्र्या वार्यमाणोऽपि राजा लक्ष्मणाय दुस्सहं शक्तिपंचकं चिक्षेप, लक्ष्मणस्तु ताः शक्तीरग्रहीत्, यथा—द्वे कराभ्यां द्वे कक्षाभ्यां । दंतैरेकां च लक्ष्मणः ॥ अग्रहीज्जितपद्मायाः । कन्याया मनसा सह ॥ १ ॥ तत्स्वरूपं शक्तिपातादिकं वीक्ष्य विस्मिता जितपद्मा शत्रुदमनराजाज्ञया लक्ष्मणकंठे वरमालामक्षिपत. राज्ञोक्तं भो वीर! अथ त्वमेनां कन्यामुद्वह? लक्ष्मण ऊचे ममाग्रजो दाशरथी रामो बाह्योपवनेऽस्ति, अहं सर्वदा तस्य परवशोऽस्मि. अथ शत्रुदमनो राजा तौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रामलक्ष्मणौ ज्ञात्वा तत्क्षणं तत्र गत्वा नमश्चक्रे. स्तुत्वा च स्ववेश्मनि समानीय महत्या प्रतिपत्त्या स राममपूजयत. सामान्योऽप्यतिथिः पूज्यः, किं पुनः पुरुषोत्तमः? अथ रामस्ततोऽपि चलितः, तदा लक्ष्मणो महीपतिमुवाच वलमानोऽहं त्वत्सुतां परिणेष्यामि. ॥ इति शत्रुदमननृपकथानकं ॥

ततो रामलक्ष्मणौ सीतासहितौ निशांते निर्गतौ, पथि चलंतौ च सायं वंशस्थलनाम पत्तनं प्रापतुः शैलतटस्थितं. तस्मिन्नगरे लोकं भयाकुलं विलोक्य रामः कंचिन्नरं पप्रछ, भो महापुरुष! अत्र ग्रामे लोको भयाकुलो दृश्यते, तद्भयस्य किं कारणं? तत् श्रुत्वा तेन पुरुषेणोक्तं भो महापुरुष! तद्भयस्याद्य तृतीयो वासरो जातः, अमुष्मिन् पर्वते रात्रौ रौद्रो ध्वनिरुच्छलति, तद्भयाच्चात्रत्योऽखिलोऽपि जनो रात्रिमन्यत्र गमयति, प्रातश्च पुनरायाति, एवं च नित्यमियं कष्टस्थितिर्वर्तते. ततः कौतुकाल्लक्ष्मणेन प्रेरितो रामस्तं गिरिमारुरोह. तदा तत्र पर्वते कायोत्सर्गस्थितौ कुलभूषणदेशभूषणनामानौ द्वौ मुनीश्वरौ रामोऽपश्यत. रामलक्ष्मणौ सीतासहितौ तौ द्वौ मुनी भक्त्या वंदाते. ततो रामस्तदग्रे गोकर्णयक्षार्पितां वल्लकीमवादयत, ततोऽसौ सौमित्रिसहितो हृद्यं मनोऽभीष्टं गीतं जगौ, रामपत्नी सीता च तदग्रे ननर्त. इतोऽर्कास्तं ययौ, रात्रिश्च प्रादुर्बभूव. इतो विकृता-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नेकवेतालोऽनलप्रनाभिधो देवस्तत्रागात्, भूत्वा भयंकरोऽट्टट्टहासैश्च नभः स्फोटयन् स तौ महर्षी उपद्रोतुं प्रावर्तत. तदा तस्मै देवाय रामलक्ष्मणौ चुकोपतुः. सीतां च साधूपांते मुक्त्वा तौ तं देवं निहंतुं समुत्तस्थौ, तदा स देवोऽपि तयोस्तेजोऽसह्यमानो निजं स्थानं ययौ. तयोः साध्वोश्च तदा केवलज्ञानमुत्पेदे, देवैश्च तत्केवलज्ञानमहिमा विदधे.

अथ रामेण मुनिभ्यां नत्वा पृष्टं भो मुनींद्रौ! युवयोस्तेन देवेन सह किं विरोधकारणं? तदा तयोर्मध्यात्कुलभूषणः प्राह पद्मिन्यां नगर्यां विजयपर्वतो नाम राजा, तस्य राज्ञोऽमृतस्वरनामा दूतोऽस्ति, तस्य दूतस्योपयोगानाम्नी पत्नी, तत्पुत्रावुदितमुदितनामानौ. अथ तस्यामृतस्वरस्य वसुभूतिनामा विप्रो मित्रमासीत, स वसुभूतिविप्रो मित्रपत्न्योपयोगया सह रेमे. उपयोगापि तदासक्ता कथयति, हे वसुभूते मत्पतिममृतस्वरं त्वं तथा मारय यथा कोऽपि न जानाति. अथैकदा नृपादेशात्सोऽमृतस्वरो देशांतरंप्रति चलितः, तदा स वसुभूतिरपि तत्पश्चाद्गत्वा तस्य मार्गे मिलितः, अथ मार्गे गच्छता तेन वसुभूतिविप्रेण छलं लब्ध्वा सोऽमृतस्वरो निपातितः. तत आगत्य तेन तत्पत्न्यै उपयोगायै तत्स्वरूपं निवेदितं, तयोक्तं वरं कृतं, अथेमौ पुत्रावपि मारय? यथा निर्मोदिकं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मधु सुखेन गृह्यते, आवयोः संभोगरंगश्च सुखेन स्यात. तदा तेन पापिना वसुभूतिविप्रेण तदपि प्रतिपन्नं, धिक्कामचेष्टितं, काममोहितो हि जनः पुण्यं पापं च न विचारयति. यतः—अनुचितकर्मारंभः । स्वजनविरोधो बलीयसा स्पर्धा ॥ प्रमदाजनविश्वासो । मृत्युद्वाराणि चत्वारि ॥ १ ॥ अहो! पापिपुरुषाणां पापसंख्या नास्ति, यदि मेघस्य धारासंख्या भवेत्, दिवि तारासंख्या भवेत, भूतले रेणुसंख्या भवेत्, समुद्रे मत्स्यसंख्या भवेत, मेरुगिरौ स्वर्णसंख्या, मातुः स्नेहसंख्या, सर्वज्ञस्य गुणसंख्या, दुर्जनस्य दोषसंख्या, आकाशस्य प्रदेशसंख्या, सत्पात्रदानस्य च पुण्यसंख्या भवेत्तथापि दुराचारिणो जनस्य पापसंख्या न भवेत्. तया पापिन्या च पुत्रमारणं प्रोक्तं. तेन दुष्टेन वसुभूतिमित्रेणापि च प्रतिपन्नं. परं तयोस्तद्वचो वसुभूतिपत्न्या श्रुतं, तया चेर्ष्यावशेनोदितमुदितयोराख्यातं.

उदितेन रुषा सद्यो । वसुभूतिर्निपातितः ॥ मृत्वैषोऽनलपल्ल्यां च । म्लेछः समुदपद्यत ॥१॥ उदितमुदितौ च वैराग्यात्साधूपांते धर्मं श्रुत्वा प्रव्रज्यामाददाते. ततस्तावुदितमुदितौ साधू संमेते चैत्यानि वंदितुं चलितौ, क्रमेण विहरंतौ च तौ भ्रातृसाधू तां वसुभूतिजीवम्लेछाधिष्टितां पल्लीं स-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मायातौ. तदा स म्लेछः पूर्वनववैरात्तौ साधू निरीक्ष्य हंतुं दधावे, परं म्लेछाधिपेन स वारितः. स म्लेछाधिपश्च पूर्वनवे खगोऽनूत. नदितमूदितजीवान्यां च स व्याधान्मोचितः. तेन पूर्वनवस्नेहेन म्लेछाधिपेन तौ मोचितौ. तौ साधू च क्रमेण विहरंतौ संमेते समेत्य चैत्यानि ववंदाते, यतः—

सयं पमज्जणे पुंणं । सहस्सं च विलेवणे ॥ सयसाहस्सिया माला । अणंतं गीयवाइए ॥ १ ॥

किं बहुना? नेत्रानंदकरी नवोदधितरी श्रेयस्तरोर्मंजरी । हर्षोत्कर्षशुभप्रवाहलहरी व्यापल्लताधूमरी ॥ श्रीमद्धर्ममहानरेंद्रनगरी रागद्विषां जित्वरी । पूजा श्रीजिनपुंगवस्य विहिता क्षेमंकरी देहिनां ॥ ॥ १ ॥ पुष्पात्पुण्यफलं जलाद्विमलता सद्गंधधूपाद्दिप—ध्वंसोऽज्ञानतमःप्रनावहननं दीपाद् घृतात् स्निग्धता ॥ नई चाक्षतपात्रतः सुरनिता वासात्फलाद्रूपता । ह्येवं पूजनमष्टधा जिनपतेरौचित्यलभ्यं फलं ॥ २ ॥ एवं चैत्यानि वंदित्वा कतिचिद्वर्षाणि च पृथिव्यां विहृत्यांतसमये सम्मेतशैलपर्वतेऽनशनं विधाय मृत्वा महाशुक्रे तौ सुंदरसुकेशनामानौ महर्द्धिकौ सुरौ जातौ. अथ स वसुनूतिजीवो म्लेछो नवं भ्रांत्वा कथंचन मानुषं जन्मावाप्य तस्मिन् नवे तापसोऽभूत्. स तापसो मृत्वा ज्योतिष्के देवो जातः, यतः—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तावस जा जोइसिया । चरपरिव्वाय बंजलोगो जा ॥ जा सहस्सारो पंचिंदि—तिरिय जा अच्चुत्त सड्ढा ॥ १ ॥ स च तत्र धूमकेतुनामा मिथ्यादृष्टिर्दुराशयो जातः. उदितमुदितजीवौ तु महाशुक्राच्च्युत्वात्रैव जरतेऽरिष्टपुरे नगरे प्रियंवदमहीपतेः पद्मावत्याः पट्टराज्याः कुक्षौ रत्नरथचित्ररथनामानौ पुत्रावजूतां. धूमकेतुरपि देवजवाच्च्युत्वा तस्यैव राज्ञः कनकाजानाम्न्या देव्या अनुद्धरनामा पुत्रो जातः, स च रत्नरथचित्ररथयोरुपरि समत्सरोऽजूत, तौ द्वौ भ्रातरावपि तस्योपरि मात्सर्यं बिजरांचक्रतुः. स्वायुःपर्यंते प्रियंवदो राट् रत्नरथे राज्यं न्यस्य, द्वयोश्चान्ययोः पुत्रयोः पुनर्यौवराज्यं न्यस्यानशनं कृत्वा षट्दिनानि यावच्चानशनं प्रपाल्य मृत्वा सुधर्मे सुरोऽजवत. अथ कश्चिद्राजा स्वपुत्रीं श्रीप्रजामनुद्धरे याच्यमानेऽपि रत्नरथस्य ददौ, ततोऽनुद्धरः क्रुद्धो राज्यं मुक्त्वान्यत्र गतः, रत्नरथस्य चोर्वीमलुंटयत, ततो रत्नरथेन स ढत्ते पातयित्वा जग्रहे, बहुधा विर्म्बय च मुमुचे. एवं विर्म्बितोऽसौ दुःखेन तापसोऽजूत, स्त्रीसंगाच्च भ्रष्टशीलो निजं तपो मोघीचक्रे. ततो मृत्वा स मनुष्येषूत्पन्नः, तत्रापि तापसीजूयाज्ञानतपश्चकार. एवं बहून् जवान् भ्रांत्वा पुनस्तापसो जूत्वा मृत्वा ज्योतिष्कदेवेऽनलप्रजनामा देवो जातः, सोऽयं देवोऽस्ति.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ तौ रत्नरथचित्ररथौ युवराजौ दीक्षां जग्रहतुः, सम्यग्दीक्षां प्रपाल्याच्युते कल्पेऽतिबलमहाबलनामानौ देवौ बभूवतुः प्रवर्द्धिकौ. आयुःपर्यंतेऽच्युतदेवलोकाच्च्युत्वा सिद्धार्थपुरे नगरे क्षेमंकरमहीपतेर्विमलनाम्न्याः पट्टदेव्याः कुक्षाववतेरतुः. क्रमेण तौ कुलभूषणदेशभूषणनामानौ तस्याः पुत्रौ बभूवतुः. क्रमेणाष्टवार्षिकौ जातौ तौ पित्रा विद्याघोषाख्योपाध्यायस्य समीपे पाठितौ, सर्वाः कला द्वादशाब्दीं यावत्तावपठतां. त्रयोदशेऽब्दे तौ तेनोपाध्यायेन सह नृपोपांते यातौ. तत्र राजवेश्मनि वातायनस्थितां कांचित्कन्यां दृष्ट्वा तौ तस्यामनुरागपरौ जातौ. ततस्ताभ्यां सकलाः स्वकला नृपाय दर्शिताः. ततो मात्रा प्रोक्तं भो पुत्रावेषा युवयोः स्वसा कनकप्रभानाम्नी विद्याघोषोपाध्यायसदने युवयोस्तस्थुषोर्जाता द्वादशवार्षिकी. परं भवद्भ्यां सा नोपलक्षिता. तत श्रुत्वा लज्जितावावा—मज्ञानात्स्वसृकांक्षिणौ ॥ क्षणाद्वैराग्यमापन्नौ । प्रव्रजितौ गुरोः पुरः ॥ १ ॥ तप्यमानौ तपस्तीव्र—मिहायातौ महागिरौ ॥ स्थितौ च कायोत्सर्गेण । निरपेक्षौ वपुष्यपि ॥ २ ॥ हे रामलक्ष्मणौ! आवयोर्वियोगेन पिता क्षेमंकरो राजाऽनशनं गृहीत्वा मृतो महालोचननामा गरुडेशो देवोऽभवत, स गरुडेशो देव आवयोरुपसर्गं विज्ञायासनकंपेन संप्रति प्राग्जन्मस्नेहमोहित

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्ट्वायातः, स च समीपस्थो गरुडेशदेवो मुनिभ्यां दर्शितः.

इतश्च वसुभूतिविप्रजीवोऽनलप्रभो ज्योतिष्कदेवोऽनंतवीर्यमहामुनिकेवलिनः समीपे देवैः परिवृतोऽगच्छत्, गत्वा नत्वा चोपाविशत्, तस्मिन् समये केनचिच्छिष्येणेति देशनांते पृष्टं, हे स्वामिन्! मुनिसुव्रततीर्थे पाश्चात्यकेवली को भविष्यति? केवलिनोक्तं मम निर्वाणात्पाश्चात्यकेवलिनौ कुलभूषणदेशभूषणनामानौ द्वौ भ्रातरौ भविष्यतः, तदा पूर्वभवमत्सरी सोऽनलप्रभो ज्योतिष्कदेवस्तद्वचनं श्रुत्वा निजं स्थानं गतो विभंगेन च कायोत्सर्गस्थितौ नौ दृष्ट्वाचिंतयत् यदनंतवीर्यवचनमहमन्यथा करोमीति. ततः प्राग्जन्मवैराद्वायं वसुभूतिविप्रजीवो देव आवयोरुपसर्गं करोति, तस्योपसर्गं कुर्वाणस्य चत्वारि दिनान्यतीयुः. इतोऽत्रायातौ युवां, युष्मद्भीत्या च सोऽनश्यत, आवयोः कर्मक्षयाच्च केवलं समजायत, अयं पूर्वभववैरी वसुभूतिजीवो देव उपसर्गपरोऽपि कर्मक्षयसहायोऽभूत. भो रामचंद्र! ययोर्मुनयोः कथानकं कथितं तावावां कुलभूषणदेशभूषणनामानौ भ्रातरौ. अथ स गरुडाधिपो कुलभूषणदेशभूषणयोः पिता रामंप्रत्यूचे भो रामचंद्र! त्वया साधु कृतं, त्वयेयं साधुसेवा कृता, तेन तुष्टोऽहं तव किं प्रत्युपकरोमि? रामेणोक्तमहं कस्यापि नार्थयामि, दे-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वेनोक्तं तथापि सहायं करिष्यामीत्युक्त्वा स गरुडाधिपो देवः स्वस्थानमगमत्. अथ वंशस्थलाधीशो । राजा नाम्ना सुरप्रभः ॥ तत्रागत्य नमश्चक्रे । राममानर्च चोच्चकैः ॥ १ ॥ रामाज्ञया तत्र शैले । सोऽर्हच्चैत्यान्यकारयत् ॥ रामनाम्ना रामगिरि—र्गिरीशोऽभूत्तदादितः ॥ २ ॥ इति कुलभूषणकथानकं ॥

अथ श्रीरामलक्ष्मणौ सुरप्रभं राजानमापृच्छ्य प्रस्थानक्रमेण यांतौ भयंकरं दंडकारण्यं प्रविष्टौ. कथंभूतं तदरण्यमित्याह—अनेकोत्कटवृक्षगहनं विविधव्यालशार्दूलकालकंकालवेतालक्षेत्रपालशाकिनीडाकिनीयोगिनीयक्षराक्षसगंधर्वविद्याधरखेचरभूतप्रेतपिशाचक्रोंदिककरिकोलभंबभंबरभिल्लकर्बरशबरतस्कररशंबरसरभकासरव्याघ्रसिंहशृगालवृश्चिकशूकरादिश्वापदरौद्राकारघूकशिवाफेत्कारडाकिनीडमरुकात्कारयुतं. एवंविधदंडकारण्यमध्ये तौ रामलक्ष्मणौ सीतासहितौ चेलतुः. अरण्यमध्ये गत्वा महागुहागृहे आवासं विधाय काकुस्थः स्ववेश्मनीव तत्र स्थितः. अथ भोजनवेलायां लक्ष्मणो वने गत्वा शाल्यादीन्यरण्यधान्यानि समानीय सीतायै समर्पयामास. तानि धान्यानि यथा—रक्तशालिमहाशालिकलमशालिसुवर्णशालिसुगंधशालिप्रभृतीनि. ततो मुद्गदालिस्तुषाररहिता पीतवर्ण-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सहिता लघुकैरेः खंडिता सुवर्णवर्णमंम्डिता बहुजलेन पाचिता मिताग्निसंस्कृता शरीरपुष्टिकारिणी दर्शनमनोहारिणी च. अथ घृतं सद्यस्कं तापितं प्रीत्या नामितं मांजिष्टवर्णं अमेयसौरभ्यनासापुटपेयं साक्षादमृतमिव तद्घृतं. तेमनानि च बहुतैलघृततलितानि, वटकवटिकापर्पटपर्पटिकादीनि मरिचछमत्कारात्यंतसुकुमारतिक्तकटुकषायाम्लमधुराणि जीरकादिभिः संस्कृतानि च सज्जितानि. दुद्धं सहावसुद्धं । सक्करकलियं पयोगपित्तहरं ॥ घटघटघटुकं पीद्धं । तं दुद्धं अमियसारिछं ॥ १ ॥ इत्यादिभोज्यं सीतया यावत्सज्जितं तावता भोजनवेलायां त्रिगुप्तसुगुप्तनामानौ द्वौ चारणौ मुनी तत्र नभसा समुपेयतुः, तौ च द्विमासोपोषितौ पारणार्थं सीतागृहे समागतौ, तौ च दृष्ट्वा हर्षिता सीता, यथा—आनंदाश्रूणि रोमांचो । बहुमानं प्रियं वचः ॥ किंचानुमोदना पात्र—दानभूषणपंचकं ॥ १ ॥ अनादरो विलंबश्च । वैमुख्यं विप्रियं वचः ॥ पश्चात्तापश्च पंचापि । दानदूषणपंचकं ॥ २ ॥ एवं दानभूषणभूषितं दूषणवर्जितं च दानं सीता मुनिभ्यां ददौ. रामलक्ष्मणावपि भक्त्या तौ मुनी वंदित्वा स्तुत्वा च दानभूषणभूषितं दानं ददतुः. यथा—यथोचितैरन्नपानैः । सीता तौ प्रत्यलाभयत् ॥ तदा देवैर्विदधिरे । रत्नगंधांबुवृष्टयः ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तन्मुनिदानं दृष्ट्वा कंबुद्वीपाधीशौ द्वौ सुरौ रत्नजटी विद्याधरश्च एते त्रयः श्रीरामचंद्राय प्रीताः संतः साश्वं रथं ददुः. तन्मुनिदानभूमौ गंधांबुवृष्टिगंधेन गृध्रनामा कुष्टः पक्षी पादपाद्उत्तीर्य समाययौ. स पक्षी मुनिदर्शनात्संजातजातिस्मरणो मूर्छया भूमौ पपात. सीता च तं गृध्रपक्षिणं शीतलांभोभिः सिषेच, लब्धसंज्ञः स गृध्रपक्षी समुत्थाय साधुपादेष्वपतत्. साधोः संस्पर्शौषधीलब्ध्या स पक्षी तत्क्षणान्नीरोगोऽभवत. किंविशिष्टः स पक्षी जातो यथा—पक्षौ हैमावजायेतां । चंचुर्विद्रुमविभ्रमः ॥ पद्मरागप्रभौ पादौ । नानारत्नप्रभं वपुः ॥ १ ॥ रत्नांकुरश्रेणिनिभा । जटा शिरसि चाभवत ॥ जटायुर्नाम तस्याभू—त्ततः प्रभृति पक्षिणः ॥ २ ॥ तं पक्षिश्रेष्टं वीक्ष्य रामस्तौ महर्षी अप्रृच्छत्, भो साधू एष गृध्रपक्षी मांसाशी युवयोः पादौ पतित्वा शांतः कस्माज्जातः? इतः स पक्षिराडपि स्वगिरोचे हे भगवन्नहं पूर्वमत्यंतविरूपकुष्टाभिभूतो भूत्वा सांप्रतं हेमरत्नोत्करद्युतिः कथं जातः? तदा स गुप्तर्षिरप्याचख्यौ भो राम! भो पक्षिराट् च श्रूयतां? कुंभकारकटकं नाम नगरं, तत्र दंडकिनामा राजाभूत्. तदा श्रावस्त्यां नगर्यां राजा जितशत्रुरजायत, तत्पत्नी धारिणी राज्ञी, तयोः पुत्रः स्कंदकनामा कुमारो मारसन्निभोऽस्ति, पुत्री च पुरंदरयशानाम्न्यस्ति. सा च पुरंदरय-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शा कुंभकारकटकस्वामिना दंमकिराज्ञा परिणीतास्ति.

अन्यदा स दंमकी राजा स्वकीयं पालकाभिधं विप्रं दूतं केनाप्यर्थेन जितशत्रुनृपांतिके प्राहिणोत. तस्मिन् समये राजसभास्थितो जितशत्रुनृपः स्वपुत्रेण स्कंदककुमारेण सहार्हद्धर्मगोष्ठीपरो यावद्भवत्तावता पालकः कुधीरभव्यो जैनं धर्मं दूषयितुं प्रारेभे. स दुराशयः पालकः स्कंदककुमारेण राजपुत्रेण सत्यसंवादपूर्वकं युक्त्या निरुत्तरीचक्रे. तदा सभ्यलोकैस्तिरस्कृतो निंदितो गर्हितश्च राज्ञा जितशत्रुणा च विसृष्टः पालकः स्कंदकोपरि द्वेषमुद्वहन् स्वस्थानं गतः. यद्यपि सत्योक्तितो द्वेषो भवत्येव तथापि हितेच्छुना सत्योक्तिर्न मोक्तव्या, यतः—रूसउ वा परो मा वा । सवसं वा परियत्तउ ॥ भासियव्वा हिया भासा । सपक्खगुणकारिया ॥ १ ॥ वाङ्मात्रसाराः परमार्थबाह्या । न दुर्लभाश्चित्रकरा मनुष्याः ॥ ते दुर्लभा ये जगतो हिताय । धर्मे स्थिता धर्ममुदाहरंति ॥ २ ॥ तथैव स्कंदककुमारो धर्मे स्थितो धर्मं साधुसमीपे श्रुत्वा विरक्तश्चान्यदा पंचशतराजपुत्रैः परिवृतो मुनिसुव्रतस्वामिपादांते व्रतमाददे. क्रमेण पठितसिद्धांतः स्वामिनाचार्यपदे स्थापितः स स्कंदकाचार्यो मुनिसुव्रतजिनं पप्रछ, हे स्वामिन्नहं तवाज्ञया कुंभकारनगरे यामि, स्वामिनोक्तं तन्नगरे तव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मरणांतिकोपसर्गो भविष्यति, पुनः स्कंदकाचार्येणोक्तं स्वामिन्नाराधको विराधको वा भविष्यामि? स्वामिनोक्तं त्वां विनान्ये सर्वेऽप्याराधका भविष्यंति. स्कंदकेनोक्तं मयि विराधकेऽन्ये आराधका भवंतु, मम त्वेतावतैवालं, अहो! पूर्वोपार्जितं केनापि लंघयितुं न शक्यं, यतः—यस्मिन् देशे यदा काले । यन्मुहूर्ते च यद्दिने ॥ हानिर्वृद्धिर्यशो लाभो । भवेत्तत्रैव नान्यथा ॥ १ ॥ स्कंदकाचार्यः स्वामिनं पृष्ट्वा स्वामिना नानुज्ञातो न निषिद्धश्च पंचशतमुनियुतः क्रमेण गच्छन् कुंभकारकटकं नगरमासादयामास, तत्र च स पूर्ववने समवसृतः, उद्यानपालकेन वर्धापितः सपरिकरो राजा तद्वंदनाय निर्गतः, गुरुं वंदित्वा पुरो निषण्णो राजा देशनां शृणोति, यथा—धर्मो जगतः सारः । सर्वसुखानां प्रधानहेतुत्वात् ॥ तस्योत्पत्तिर्मनुजाः । सारं तेनैव मानुष्यं ॥ १ ॥ भो भविका एवंविधं मानुष्यमवाप्य धर्मे यत्नो विधेयः

इत्यादिदेशनां श्रुत्वा नृपराज्ञीश्रेष्ठिसेनापत्यादिलोकाः स्वस्थानं गताः, एवं तत्र दिनानि यांतिस्म. अथैकदा स्कंदकाचार्यं दृष्ट्वा क्रूरकर्मा पालकस्तं पूर्वपराभवं संस्मरन्नुपायं कर्तुं प्रवृत्तः, अहो विरोधो दुःखकारणं, यतः—विरोधो नैव कर्तव्यः । साधुरेभ्यो विशेषतः ॥ त एव विपरीताः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यू । राक्षसा एव केवलं ॥ १ ॥ ततः स पालको राक्षसप्रायोंतःकोपनो दक्षिणोद्याने पंचशतसुनटयोग्यानि शस्त्राणि जूमौ न्यखातयत. ततः स पालकः साधुसमीपे गत्वा तानेवमवादीत, हे स्वामिन्नत्र वने राजा क्रीडार्थं समागमिष्यति, अतो यूयं दक्षिणवने समवसरतेत्युक्त्वा तान् वनांतरं नीत्वा स स्वस्थानं गतः, अहो! दुर्जनचेष्टितं, यतः—पन्नरखंड खंमहालाहल । विसहरखंम खंड दावानल ॥ चार खंड मेली समजाया । दुर्जनपुरुष घड्या विहिराया ॥ १ ॥ अथ तेन पापिना पालकेन विजने गत्वा रहसि राज्ञोऽग्रे विज्ञप्तं स्वामिन्नेष स्कंदको जग्नव्रतपरिणामः शिष्यसुनटैः परिवृतस्तव राज्यं गृहीतुं समागतोऽस्ति, मुनिवेषधरोऽप्येष पाखंडी सहस्रयोधिभिः पुंभिः परिवृतः स्वल्पपरिवारपरिवृतं भवंतं हत्वा तव राज्यं गृहीष्यति, एतैर्मुनिवेषसुनटैः स्वानि शस्त्राणि जूमौ क्षिप्तानि संति.

इत्युक्त्वा तेन पापिना पूर्वक्षिप्तानि शस्त्राणि राज्ञे दर्शितानि, तानि दृष्ट्वा राजा परं विषादं प्राप्तः, अविचार्य च पालकमादिदेश जो पालक! यत्तव रोचते तत्कुरु? अस्योचितं कर्तुं त्वमेव जानासि, जूयो जूयोऽहं न प्रष्टव्यः, राज्ञेत्युक्ते पालकः पापात्मा शीघ्रं गत्वा नैरवयंत्रमकारयत्, य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



थ्या—इत्युक्तः पालकः शीघ्रं । गत्वा यंत्रमकारयत् ॥ स्कंदकस्याग्रतः साधू—नेकैकं च न्यपीलय-त् ॥ १ ॥ निष्पील्यमाना नेत्राश्रु—देशनापूर्वकं स्वयं ॥ अकारयत्स्कंदकोऽपि । सम्यगाराधनावि-धिं ॥ २ ॥ उपर्यंत्र शिशौ नीते । परिवारांतिमे मुनौ ॥ कारुण्यात्स्कंदकाचार्य । इत्यन्नाषत पाल-कं ॥ ३ ॥ आदौ पीलय मामेव । कुरुष्व तद्वचो मम ॥ बालं मुनिं न पश्यामि । पील्यमानं यथा ह्यमुं ॥ ४ ॥ तत्पीडापीडितं ज्ञात्वा । स्कंदकं पालकोऽपि हि ॥ तमेव बालकमुनिं । तत्पीडार्थम-पीलयत् ॥ ५ ॥ उत्पन्नकेवलाः सर्वे—ऽप्यवापुः पदमव्ययं ॥ प्रत्याख्याय स्कंदकस्तु । निदानमि-ति निर्ममे ॥ ६ ॥ दंडकस्य पालकस्य । तथा तत्कुलराष्ट्रयोः ॥ व्यापादनाय न्रूयासं । तपसोऽ-स्य फलं यदि ॥ ७ ॥ एवं कृतनिदानः स्कंदको मुनिस्तेन पालकेन पापिना पीलितस्तद्ध्यानपरो वह्निकुमारो देवोऽन्नूत.

इतश्च स्कंदकन्नगिनी पुरंदरयशाया दत्तं रत्नकंबलतंतुजं रजोहरणं रुधिरेणाक्तं शकुनिकाहर-त्, तद्रजोहरणं दोर्दम्बुद्ध्या तया गृहीत्वा पुरंदरयशादेव्या अंगणे पातितं, तद् दृष्ट्वा पुरंदरयशा बाढस्वरेण पूत्करोतिस्म, हा हा दैवेन किमिदं कृतं! मम बांधवरजोहरणमिदं दृश्यते, नूनं केनापि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पापिना मम बांधवो हतः, किंचाद्य भिक्षार्थं साधवोऽपि नागताः, नूनं हतास्ते साधवः. आः! साधुहत्यातः किं भविष्यति? इत्यादिवचनैः सा दंडकिराजानमाक्रोशयत्, राजानं मंत्रिणं च धिक्कुर्वंतीं शोकमग्नां तां पुरंदरयशां शासनसुर्युत्पाट्य मुनिसुव्रतपादांते मुमोच, तयापि स्वामिपादांते प्रव्रज्या गृहीता. अथ स स्कंदकजीवोऽग्निकुमारसुरोऽवधिना पालकं वैरिणं ज्ञात्वा तत्रायातः, तन्नगरीं तृणकाष्ठैः संपूर्य सनृपं समंत्रिणं सलोकं तन्नगरं सोऽदहत्, तदादित इदं दंडकारण्यमुद्वसं जातं, अत्र स्थाने पूर्वं दंडकिराजाभूत्तन्नाम्ना चेदं दंडकारण्यं पप्रथे. सुमंत्र्यभावे राज्यनाशो भवति, यथा—एकं विषरसो हंति । शस्त्रेणैकश्च हन्यते ॥ सबंधुराष्ट्रं राजानं । हंत्येको मंत्रिविप्लवः ॥ ॥ १ ॥ एवं पालकेन राज्यं निर्गमितं, स च पालको मृत्वा सप्तमनरकपृथिव्यां गतः, एषश्चाभव्यः, यतः—संगमय १ कालसूरी २ । कविला ३ अंगार ४ पालया ५ दोवि ॥ एए सत्त अभवा । उदायनिवमारगे चेव ॥ १ ॥ अतः पालकोऽभव्यः पंचशतमुनिघातको नरकं गतः, दंडकोऽपि नीचयोनिषु भवान् भ्रांत्वायं गृध्राख्यः पक्षी जातः, कुष्टरोगाभिभूतोऽस्मद्दर्शनात्संजातजातिस्मरणोऽभूत्, अस्मत्स्पर्शौषधीलब्ध्या चास्य रोगः क्षयमासदत्. तत् श्रुत्वा स जटायुपक्षिराम्भूयोऽपि मुनि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पादयोः पपात, धर्मं श्रुत्वा च स श्रावकत्वं प्रपेदे, त्रिगुप्तसुगुप्तमुनिपादांते च स जीवघातमांसाहा-रात्रिभोजनप्रत्याख्यानमकरोत, द्वादशव्रतधारकश्च जातः. पुनर्मुनिनोक्तं भो राम! भो लक्ष्मण! हे सीते! अयं पक्षी युष्माकं साधर्मिकः, वात्सल्ययोग्यश्चास्ति. रामेणोक्तं हे स्वामिन्नस्माकमेष प-रममित्रमद्यप्रभृति च बंधुवत्पाल्योऽस्ति. ततस्ते जानकीरामलक्ष्मणास्तं दिव्यरथमारुह्य जटायुसहि-ताः स्वेछया क्रीमावने विजह्रुः, दंमकारण्ये शिलागृहे च सुखं तस्थुः. ॥ इति स्कंदकाचार्यदंडकि-नृपकथा. ॥

इतश्च पाताललंकायां खरनामा विद्याधरोऽस्ति, तस्य रावणभगिनी चंद्रणखानाम्नी पट्टराज्ञी वर्तते, तयोः पुत्रौ शंबूकसुंदरनामानौ नवयौवनावभूतां. अन्यदा शंबूको मातापितृभ्यां वार्यमाणो-ऽपि सूर्यहासखड्गसाधनार्थं दंमकारण्यमुपेयिवान्. तत्र गत्वा क्रौंचखानदीतीरे वंशगह्वरांतरे स तद-सिरत्नमसाधयत, यथा—एकान्नाशनशुद्धात्मा । ब्रह्मचारी जितेंद्रियः ॥ अधोमुखो वटशाखा—नि-बद्धचरणद्वयः ॥ १ ॥ विद्यां जपितुमारेभे । सूर्यहासासिसाधनीं ॥ सप्ताहाग्रद्वादशाब्द्या । या सि-द्धिमुपगछति ॥ २ ॥ एवं च तस्थुषस्तस्य । वल्गुलीस्थानकस्पृशः ॥ वर्षाणि द्वादशातीयु—श्चत्वा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रि दिवसानि च ॥ २ ॥ एवं स शंबूकोऽधोमुखो वटशाखानिबद्धपादो वंशगह्वरे सूर्यहासखड्गं वंशकुडंगाद्बहिर्मुक्त्वा यावत्तपस्तेपे, तावल्लक्ष्मण इतस्ततो भ्राम्यन् क्रीडां कुर्वंस्तत्रायातः, तत्र पतितं च सूर्यहासखड्गं करेण स आददे, ततस्तं विकोशं कृत्वा तत्तेजोविलोकनार्थं तीक्ष्णत्वपरीक्षार्थं च तत्खड्गघातेन वंशजालिं स लुलाव. तदा लक्ष्मणस्तत्र वंशजालिमध्ये कस्यचित्पुरुषस्य मौलिकमलं पतितमपश्यत्. ततो लक्ष्मणोऽग्रे गच्छन् वटशाखानिबद्धं कबंधं ददर्श. अहो मया किं कृतं? कश्चिद्विद्यासाधको नरो हतः. लक्ष्मण आत्मानं निनिंद, यथा—

अयुध्यमानोऽशस्त्रश्च । पुमान् कोऽपि हतो मया ॥ अमुना कर्मणा धिग्मा—मित्यात्मानं निनिंद सः ॥ १ ॥ गत्वा च रामचंद्राय । तदशेषं शशंस सः ॥ असिं च दर्शयामास । रामोऽप्येवमभाषत ॥ २ ॥ असावसिः सूर्यहासः । साधकोऽस्य त्वया हतः ॥ अस्य संभाव्यते नूनं । कश्चिदुत्तरसाधकः ॥ ३ ॥ अत्रांतरे चंद्रणखा रावणभगिनी शंबूकजननी हर्षितमानसा चाद्य मत्सूनोर्विद्या सेत्स्यतीति मत्वा पूजोपस्कारान्नपानादिसहिता तत्र समाययौ, तत्रायाता च लुलितकुंडलं शंबूकशिरश्छिन्नं दृष्ट्वा साचिंतयत्, आः किं जातं? मूर्छिता भूमौ पतिता च पुनर्लब्धचैतन्या सा वि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लपतिस्म. हे वत्स शंबूक! त्वं कासि? कुत्र गतोऽसि? अहो! केन पापिना त्वं हतोऽसि? अरे! निःकारणवैरिणा दैवेन किं कृतं? एवं दैवोपालंभान् यच्छंती सेतस्ततो विलोकयंती लक्ष्मणपदपंक्तिं ददर्श. दृष्ट्वा च चिंतितं तया नूनमेष एव मे पुत्रघातकः, अत एनं विलोक्य शिक्षां ददामीति ध्यात्वा तत्पदपद्धत्या गच्छंती चंद्रणखा रामं ददर्श. कथंभूतं रामं? नेत्राभिरामं, अभिरामगुणग्रामं, पीनोन्नतस्कंधं, सत्यामृतसिंधुं, कमलवदनं, उज्ज्वलरदनं, सुरभिनिःश्वासं, लक्ष्मीनिवासं, चेत्यादि- लक्षणोपेतं रामं दृष्ट्वा हर्षिता शूर्पणखा कामपरवशाभवत. अहो! कामिनीनां कामे समुत्पन्ने शो- कोऽपि दूरे याति. अहो! कामविलसितं. अहो दुश्चारिणीचरित्रं! यतः—आलिंगत्यन्यमन्यं रम- यति वचसा वीक्षते चान्यमन्यं। रोदित्यन्यस्य हेतोः कलयति शपथानन्यमन्यं वृणीते॥ शेते चा- न्येन सार्धं शयनमुपगता चिंतयत्यन्यमन्यं। स्त्रीमायेयं प्रसिद्धा जगति बहुमता केन धृष्टेन सृष्टा ॥ १ ॥ एवं रामरूपमोहितया तया शूर्पणखया विलासहाससुंदरमतिमनोहरं कन्यारूपं विकृत्य म- न्मथार्तया कामरूपिणं रामं ज्ञात्वा शरणं प्रपेदे. रामस्तां बालिकां बभाषे हे बाले त्वं कुत इहा- गता? अस्मिन् दंडकारण्ये कृतां तैकनिकेतने एकाकिनी च कथमागता? साप्यूचे, अवंतीदेशाधि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पस्याहं कन्यका गुणसुंदरीनाम्नी केनापि विद्याधरेण निशायां सुतापहृता. स मां गृहीत्वेहारण्ये समायातः, इह तस्यान्यो विद्याधरो मिलितः, सोऽपि मां दृष्ट्वा मोहितो मां गृहीतुकामः संग्रामसज्जो बभूव. अन्योऽपि मां मुक्त्वा परस्परं तौ युद्धपरौ जातौ, युद्धे च तौ द्वावपि विपेदाते. अहं चैकाकिनी दीनाऽनाथा पतिविहीनो ऽभयत्रष्टा भ्रमंतीहागता त्वां शरणं प्रपन्ना मरुस्थले कल्पवृक्षमिव. अतो हे नाथ! हे गुणरत्नरत्नाकर! सुकुलोत्पन्नां तव योग्यां मां कुमारिकां परिणय? यतो महत्स्वर्थिनां प्रार्थना वृथा न जायते.

अथ तामत्युत्कटामद्भुतवेषधारिणीं मायाविनीं नटवद्वेषधरां कूटनाटकनटीं च विलोक्य रामश्चिंतयति, अहो! इंगितेन ज्ञायते नूनमेषा दुश्चारिणी बालिकावेषधारिणी वर्तते. यतो द्वाविंशतिः प्रमदानां विकारोंगानि यथा—उच्चैर्निष्ठीवनं, सानुरागनिरीक्षणं, श्रवणसंयमनं, आलस्यमोटनं, मुद्रिकाकर्षणं, गुप्तांगदर्शनं, हास्ययुक्तप्रजल्पनं, स्तनोपपीडनं, त्रपणोत्पाटनं, नूपुरोत्कर्षणं, कर्णकंडूयनं, केशप्रसाधनं, पुनः पुनरुत्तरीयाकर्षणं, परिधानसंयमनं, निःश्वासोच्छ्वसनं, विजृंभणं, बालालिंगनं, बालमुखचुंबनं, प्रियाश्लेषणं, अतिक्रांतप्रेक्षणं, पश्चात्कामस्मरणं च. चतुर्विंशतिरसतीनां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लक्षणानि यथा—द्वारदेशशायिनी, पश्चाद्विलोकनी, बहुभाषिणी, संभोगार्थिनी, गोष्टीप्रिया, राजमार्गान्विता, मार्गमन्वेषिणी, पतिद्वेषिणी, दीनं वदंती, जलवाहिनी, नृसंगिनी, विनोदप्रिया, अतिमानिनी, पानीयार्थं दूरं यायिनी, कुंभकाररजकसंगतिकारिणी, कृत्रिमलज्जायुता, परप्रीतिरता, सततहास्या, निर्व्यजने बहिर्गामिनी, लोभान्विता, बहुभाषिणी, क्रीडनप्रिया, केशसंवाहनसावधाना, स्वगृहं परित्यज्य परगृहगोष्ठ्यां रसिका, स्वपतिं त्यक्त्वा परपुरुषान्वेषणासक्ता चेत्यसतीलक्षणानि. एभिर्लक्षणैर्लक्षितेयं दुश्चारिणी दृश्यते, इति विचिंत्य रामेण लक्ष्मणमुखं विलोकितं, लक्ष्मणेनापि राममुखं विलोकितं. अथ रामस्तां बभाषे—कलत्रवानहं बाले । कनीयांसं भजस्व मे ॥ इति रामो वृषस्यंतीं । वृषस्कंधः शशास तां ॥ १ ॥ हे सुंदरि! सभार्योऽहमतस्त्वं लक्ष्मणं भजस्व? तदा सा विषयार्थिनी लक्ष्मणंप्रति गता. लक्ष्मणं मन्मथोपमं दृष्ट्वा हर्षिता सा लक्ष्मणं बभाषे भो महापुरुष! त्वं मां परिणय? लक्ष्मणो बभाषे हे सुंदरि! प्रथममार्य श्रीरामचंद्रं त्वं गता, तर्हि राममेव भजस्व? किंच त्वं मम भ्रातृजाया जाता, तदनया वार्तयालं. तदा पुनः सा रामं गता, पुनश्च लक्ष्मणं गता, एवं पुनः पुनः कुर्वाणा शूर्पणखा सीतया हसिता यथा हे सुंदरि!

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वयेदं हीनकुलोचितं किमारब्धं? ततो लज्जिता सा शूर्पणखा यावत्खंभनात्सीताहास्यात्पुत्रवधा-च्चात्यर्थं कुपिता भृशमुद्वेजिता चिंतयति यद्येतौ रामलक्ष्मणौ मम पुत्रवधकौ खरदूषणाद्यैर्विद्याधरैर्मा-रयामि तर्हि रावणस्वसा शूर्पणखा, नान्यथेति कृत्वा विद्युदिव चंचला व्योममार्गेण सा पाताललं-कां गता, गत्वा च तत्सर्वं निजपत्युः खरस्याग्रे विज्ञप्तं. तत् श्रुत्वा कुपितः खरदूषणश्चतुर्दशविद्याध-रसहस्रैः परिवृतो यत्र तौ रामलक्ष्मणौ तत्रायातो राममुपद्रोतुं शैलमिव द्विपः. तदा रामं संग्रामस-सज्जं दृष्ट्वा लक्ष्मणो बभाषे भो बांधव! मयि सेवके सत्येतादृशैः सह त्वं कथं संग्रामसज्जो भव-सि? अहमेवैभिः साकं संग्रामं करिष्यामि, तत् श्रुत्वा रामोऽवदत् हे वत्स! गच्छ यथासुखं? यदि च ते संकटं भवेत्तदा ममाहूत्यै सिंहनादं कुर्याः.

इति संकेतं कृत्वा लक्ष्मणः संग्रामायाचलत्सिंहवत्, यतः—सीह न जोवे चंदबल। नवि जोवे धनरिद्धि ॥ एकलमो सहसां भीडे। ज्यां साहस त्यां सिद्धि ॥ १ ॥ अथ लक्ष्मणो रामा-ज्ञया धनुष्टंकारं कुर्वाणस्तान् विद्याधरान् हंतुं प्रववृते तार्क्ष्य इवोरगान्. लक्ष्मणखरयोर्युद्धे जायमाने स्वभर्तुर्बलज्ञा शूर्पणखा रावणसमीपे गत्वेत्यूचे, भो बांधव रावण! दंडकारण्ये रामलक्ष्मणावायातौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वर्तते, तत्रैकेन लक्ष्मणेन मत्पुत्रः शंबूकः सूर्यहासखड्गविद्यां साधयन् निरपराधो हतो यमसद्मनि मुक्तश्च, पुत्रमरणं श्रुत्वा शोकार्तः खरविद्याधरश्चतुर्दशसहस्रसुभटैः परिवृतो दंडकारण्ये गतः, लक्ष्मणेन सह युद्धं च कुर्वन्नास्ते, लक्ष्मणभ्राता श्रीरामस्तु सीतया भार्यया सह तत्रैव सुखं रमते, भ्रातृवीर्येण गर्वितो रामश्च सर्वं तृणवद्गणयन्नास्ति, तत श्रुत्वा रावणस्तूष्णीको बभूव, पुनः शूर्पणखा सीतारूपं वर्णयति यथा—सीता च रूपलावण्य—श्रियां सीमेव योषितां ॥ न देवी नोरगा नापि । मानुषी नैव कापि सा ॥ १ ॥ तस्या दासीकृताशेष—मशेषसुवधूजनं ॥ त्रैलोक्ये तत्प्रतिछंद—रूपं वाचामगोचरं ॥ २ ॥ आसमुद्रांतभूमध्ये । यानि कान्यपि भूतले ॥ तवैवार्हंति रत्नानि । तानि सर्वाणि बांधव ॥ ३ ॥ दृशामनिर्मीषाकार—कारणं रूपसंपदां ॥ स्त्रीरत्नमेतद् गृह्णीया । न चेत्तन्नासि रावणः ॥ ४ ॥ आरुह्य पुष्पकमथा—दिदेश दशकंधरः ॥ विमानराज त्वरितं । याहि यत्रास्ति जानकी ॥ ५ ॥ ययौ चात्यंतवेगेन । विमानमुपजानकीं ॥ स्पर्धयेव दशग्रीव—मनसस्तत्र गच्छतः ॥ ६ ॥

तत्राकाशे पुष्पकविमानस्थो दशकंधरः सीतासहितं रामं ददर्श, अहो यथा हुतवहाद्व्याघ्रस्त्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यति तथा रामादहमपि वसामीति ध्यात्वा स यावत्तत्रैवाकाशे स्थितः किंचिद्विमृश्य च पश्चादव-लोकनीं विद्यामस्मार्षीत्, तदैव सा विद्योपतस्थे किंकरीव कृतांजलिः. अथ सा रावणमूचे किं क-रोमि भो रावण! रावणेनोक्तं सीतां हरिष्यतो मम शीघ्रं साहाय्यं कुरु? साप्रोचद्वासुकेर्मौलि—रत्नमादीयते सुखं ॥ न तु रामसमीपस्था । सीता देवासुरैरपि ॥ १ ॥ देव्योक्तमुपायः क्रियते, य-तः—उपायेन हि तत्कुर्या—द्यन्न शक्यं पराक्रमैः ॥ काक्या कनकसूत्रेण । कृष्णसर्पो निपातितः ॥ १ ॥ अत उपायं कृत्वा जानकी गृह्यते, रावणेनोक्तं क उपायः? अवलोकिन्योक्तं रामेण ल-क्ष्मणस्य संकेतः कृतोऽस्ति यथा वत्स कष्टे सति त्वया सिंहनादो विधेयः, अतस्त्वं सिंहनादं कुरु? तं नादं श्रुत्वा यदा रामो लक्ष्मणंप्रति याति तदैकाकिनीं सीतां त्वमपहर? रावणेन तथैव कृतो दू-रे गत्वा सिंहनादो यथा लक्ष्मणः कुर्यात्, तं सिंहनादं श्रुत्वा रामश्चिंतयति. नूनं मम बांधवः श-त्रुणा जितः, यतस्तेन सिंहनादो विहितः, अहो विधिना किं कृतं! जगत्प्रतिमल्लो हस्तिमल्ल इ-वानुजो मे संग्रामे जितः

एवं वितर्कयति रामे सीतोचे हे आर्यपुत्र! लक्ष्मणे संकटे पतितेऽद्यापि त्वं किं विलंबसे?

द्रुतं गत्वा लक्ष्मणं त्रायस्व? इत्यादिसीतावचनैः सिंहनादेन च प्रेरितो रामोऽपशकुनैर्वार्यमाणोऽपि त्वरितं जगाम, तावत्तैकाकिनीं सीतां दृष्ट्वा रावणस्तां हृत्वा यावता पुष्पकविमाने आरोपयितुमारभते, तावत्सीता विलापमकरोत, सीताविलापवाक्यानि—हा धीमतां प्रथमलक्ष्मण हार्यपुत्र। हा तात हा दशरथक्षितिपालचंद्र ॥ नीतास्मि निर्जनवने पिशिताननेन। त्रायस्व मामिति मुहुर्विललाप सीता ॥ १ ॥ सा नीयमाना विललाप सीता। श्येनेव चिल्लीव दशाननेन ॥ भामंडलभ्रातरहं च नीये। हा राम हा देवर तात मातः ॥ २ ॥ तान् विलापान् श्रुत्वा जटायुपक्षी धावित्वा जजल्प, हे स्वामिनि! त्वं मा भैषीः, आगतोऽहं हन्मि निशाचरमित्युक्त्वा धावित्वा स रावणं रोषादूचे—रेरे राक्षस मास्म शंकरवर भ्रांत्या विभ्रांक्षीर्नयं। रुष्टो मूढ तवैव यन्मतिमदात्सीतापहारे हरः ॥ नो चेदिष्टकपालमम्मलभृता पाखंडपुंसावली। भक्त्या ढौकितमीश्वरेण किमिति प्रत्यर्पितं प्राभृतं ॥ १ ॥ मा भैषीः पुत्रि सीते व्रजति मम पुरो नैष दूरं दुरात्मा। रेरे रक्षः क्व दारां रघुपतितिलकस्यापहृत्य प्रयासि ॥ चंचुक्षेपप्रहारैः स्फुटितधमनिभिर्दिक्षु विक्षिप्यमाणै—रशापालोपहारं दशभिरपि भृशं त्वच्छिरोभिः करोमि ॥ २ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क यासि रे दुरात्मन्नित्युक्त्वा स तत्पृष्टे चंचुप्रहारान् ददौ. एवं रावणहृदयं नखैर्विदारयन् पुनः पुनश्च वचसा तर्जयन् स तदनु दधावे. ततो दशग्रीवो जटायुंप्रति क्रुद्धो दारुणं खड्गमाकृष्य तत्पक्षौ चिच्छेद. तेन स पतत्री भूमौ पपात. अथ निःशंको दशग्रीवः सीतां पुष्पकविमाने समारोप्य पूर्णप्रायमनोरथस्तूर्णं नभसा चचाल. नभसा ह्रीयमाणा सीता तरूनपि रोदयंती रुरोद. तदा तत्सीतारुदितमर्कजटिनंदनो रत्नजटिविद्याधरोऽशृणोत्. तदा स चिंतयति नूनमेष रामपत्न्याः शब्दः समुद्रोपरि श्रूयते, नूनं रामलक्ष्मणौ छलितौ, रावणेन चेयं सीता ह्रीयते. तदा स भामंडलसेवको रत्नजटी खड्गमाकृष्य रावणंप्रति दधावे बभाषे च रे दुष्ट! मत्प्रभोर्भगिनीं सीतां हृत्वा क यास्यसि? रे निर्लज्ज! रे कुलाधम! रे कुलपांशन! इत्युक्त्वा यावता स खड्गप्रहारं ददाति तावता दशाननः स्वविद्यासामर्थ्यतस्तस्य सर्वां विद्यां सद्यः संजहार, तेन स छिन्नपक्षः पक्षीव त्वरितं कंबूद्वीपे कंबूशैलोपरि पतितः, रावणोऽपि विमानस्थो व्योम्ना गच्छन् समुद्रोपरि संचरन् कामातुरो मैथिलीं प्रोचे, हे सुंदरि! भूचरखेचरनरेंद्राणामधीश्वरं मां त्वमवेहि? तस्य च त्वमग्रमहिषी भविष्यसि, अतस्त्वं हर्षस्थाने विषादं मा कुरु? सृतं विषादेन, किं भूयो रोदिषि? सृतं दुःखेन, सुखं भजस्व?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूचरखेचराणां स्वामिनी भव? ममाग्रमहिषीपदं प्राप्नुहि? तवाहं तुष्टोऽस्मि, रामेण मंदभाग्येन त्वां योजयता विधिना विरूपमाचरितं, अधुना मयोचितं कृतं, अतो मां पतिं मन्यस्व? अहं तव दासत्वं करिष्ये, मयि दासे तव खेचरखेचर्यादयः सर्वेऽपि दासाः स्युः. एवं रावणे ब्रुवाणे सीताऽधोमुखी तस्थौ, भक्त्या च मंत्रवद्राम इत्यक्षरद्वयं स्मरतिस्म, रावणोऽपि स्मरातुरो जानकीपादयोर्मूर्धानं ननाम, सीता तु परपुरुषस्पर्शकातरा स्वपादमपसारयंत्, चुकोप यथा—आचुक्रोश च सीतैवं । निरनुक्रोश निस्त्रप ॥ अचिराल्लप्स्यसे मृत्युं । परस्त्रीकामनाफलं ॥ १ ॥ यतः—प्राणसंदेहजननं । परमं वैरकारणं ॥ लोकद्वयविरुद्धं च । परस्त्रीगमनं त्यजेत ॥ १ ॥ एवं सीतयोक्तोऽपि रावणस्तदध्यवसायान्न विरराम.

तदानीं मंत्रीश्वरा रावणं सन्मुखमाययुः, अन्येऽपि सेवका राक्षसा दशमुखसन्मुखमभ्येयुः, क्रमेण पुष्पकविमानारूढो रावणो मंत्रिसामंतपरिवृतः सीतासहितोऽद्वितीयपराक्रमो लंकानगर्यामागतः, लंकायामागते रावणे सीताऽभिग्रहमकरोद्यथा—यावद्रामसौमित्रिक्षेमोदंतस्य समागमो न भवति तावदन्नपानादिकं न भोक्ष्ये, इत्युच्चैः सीताभिग्रहमग्रहीत्, रावणेन पूर्वदिशिस्थदेवरमणोद्या-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नेऽशोकतरुतले त्रिजटादिराक्षसीभिः सहिता सीता मुक्ता, प्रमुदितो रावणश्च स्वधामागात्. ॥ इति श्रीमत्तपागच्छे भट्टारकश्रीहीरविजयसूरिराज्ये आचार्यश्रीविजयसेनसूरियौवराज्ये पंडितश्रीदेवविजयगणिविरचिते गद्यबंधे श्रीरामचरित्रे सीताहरणो नाम पंचमः सर्गः समाप्तः ॥ श्रीरस्तु ॥

---

॥ अथ षष्टः सर्गः प्रारभ्यते ॥

इतश्च रामचंद्रो धनुर्नादं वितन्वानो यत्र लक्ष्मणो वर्तते तत्रागात्. राममायांतं विलोक्य सौमित्रिरित्यभ्यधात, भो आर्य! त्वमार्यामेकाकिनीं मुक्त्वा कथमत्रागाः? राम उवाच तव सिंहनादेनाहूतो विरहविधुर इहागां, लक्ष्मण ऊचे हे बांधव! सिंहनादो मया नाकारि, त्वया स कथं श्रुतः? नूनं वयं केनापि वंचिताः, त्वं शीघ्रमार्यासमीपे याहि? सिंहनादस्य किंचिदपि कारणं वर्तते, अतो हे बांधव! त्वं शीघ्रं व्रज? अरीन् हत्वाहमपि समेष्यामीत्युक्तो रामचंद्रः सीतापवित्रिते उटजे समागात, तत्र सीतामपश्यन् भूमौ पतितो मूर्छामगमत्. पुनर्लब्धचैतन्यो राम इतस्ततो भ्राम्यन् प्रस्फुरंतं कंठगतप्राणं छिन्नपक्षं जटायुपक्षिणं दृष्ट्वापृछत्, भो जटायो! क्व सीता? जटायुनोक्तं राव-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णस्तां हत्वा गतः, अहं पृष्टे धावितः खड्गप्रहारेण छिन्नपक्षो भूमौ पतितः, अथ मह्यं त्वं नमस्कारं देहि? ततो रामस्तस्मै परलोकाध्वशंबलं परमेष्टिनमस्कारं ददौ. ततः स जटायुर्मृत्वा नमस्कारप्रभावान्माहेंद्रदेवलोके देवोऽभवत. रामः सीतामन्वेष्टुं तस्यामेवाटव्यामितस्ततो बभ्राम. इतश्च रामानुजो वैरिभिः सह युध्यमानोऽनेकान् विद्याधरभटान् निघ्नन् विद्रावयन् समुद्रं मंथान इव मथन्नास्ते.

अत्रांतरे त्रिशिरनामा लघुबांधवो स्वज्येष्टबांधवं खरमवोचत, हे बांधवानेन भूचरेण सह तव कः संग्रामः? तव सदृक्षैः सह संग्रामः श्रेष्टः, कोऽयं भूचरः? एवं तत्समर्थवचनं लक्ष्मणेन यावता श्रुतं, तावता त्रिशिरविद्याधरो लक्ष्मणेन बाणेन हतो मृतः. ततस्तत्सैन्यमपि भग्नं, परं खरविद्याधरः पुत्रवधाद्भ्रातृवधाच्च भृशं युयुधे, तदा पाताललंकेशश्चंद्रोदरनृपात्मजो विराधः सर्वसन्नाहिसैन्ययुतः समाययौ, विराधो रामसोदरं नत्वा बभाषे हे स्वामिन्नहं तव सेवकोऽस्मि, एते खरादयश्च मम शत्रवः, यतो मम पितरं चंद्रोदराख्यं निर्वास्यामी रावणपत्तयः पाताललंकां जगृहुः, तव साहाय्याच्च मम पाताललंकाराज्यं समागमिष्यति, अतस्त्वं मम स्वामी, रणाय च ममाज्ञां समादिश? केऽमी वराकाः खरादयः? इत्युक्त्वा यावता स युद्धसज्जोऽभवत्तावता लक्ष्मणोऽवोचत, हे विराधाद्यप्रभृति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ते स्वामी श्रीरामः, परं मया तव पाताललंकाराज्यं दत्तं, अहं तवोपकारं करिष्ये, यथा तत्र पातालंकाराज्यं भविष्यति, महाप्रसाद इत्युक्त्वा स खरेण समं युद्धं करोतिस्म. अथ लक्ष्मणसमीपे विराधं दृष्ट्वा खरो धनुरारोप्य लक्ष्मणमब्रवीत, रे लक्ष्मण! रे शंबूकघातक! रे त्रिशिरवधक! वराकेणानेन विराधेन सख्या सह त्वां परलोकाध्वनिनं करिष्ये, तत् श्रुत्वा सौमित्रिरुवाच भो खर! तव पुत्रभ्रातृमिलनेच्छा चेदस्ति, तर्हि संग्रामे सज्जो भव? यथा तव मनोरथं पूरयामि, तव सूनुस्तु मया क्रीडया पादघातेन कुंथुवद्धतोऽस्ति. रे मूढ! तत्र मे पौरुषं नास्ति, अधुना यदि त्वं स्वं सुभटं मन्यसे तर्हि ते मनोरथं पूरयिष्ये, सज्जो भव? तव शरीरेण कीनाशं प्रीणयामि.

तत श्रुत्वा खरः खरवत्पूत्कारं कुर्वाणो दंतीव गिरिसानुनि लक्ष्मणे प्रहर्तुमारेभे, लक्ष्मणोऽपि तीक्ष्णैः कंकपत्रैरंबरमाछादयामास. एवं तयोः खरलक्ष्मणयोर्भयंकरो गरीयान् संगरोऽजायत देवदानवयोरिव. एवं तयोः संग्रामे जायमाने खरवधे कालक्षेपं ज्ञात्वा लज्जितो लक्ष्मणः खरमूर्धानं क्षुरप्रेणाछिदत्, क्षणाद्धतं भ्रातरं ज्ञात्वा तथैव खरलघुभ्राता दूषणः संग्रामसज्जो बभूव, सोऽपि लक्ष्मणेन ससैन्यः संजघ्ने वनवह्निना कुंजरयूथ इव, ततो लक्ष्मणो जितकाशी खरदूषणसैन्यं हत्वा वि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राघेन सह चचाल, मार्गे गच्छतो लक्ष्मणस्य वामेक्षणं प्रास्फुरत, तदा लक्ष्मणश्चिंतयति, नूनमार्यस्य किंचिदशुभं भावीति विचार्य यावद्रामसमीपे याति, तावद्दूमांतरे सीताविरहितं रामचंद्रं दृष्ट्वा लक्ष्मणः परं विषादं ययौ. ततः सौमित्रिरागत्य रामचंद्रं नत्वा पुरः स्थितः. परं सीताविरहपीडितेन रामेण नोपलक्षितः, रामो वनदेवतां प्राह हे वनदेवता! अहमेकाकिनीं सीतां दीनां मुक्त्वा लक्ष्मणेनाहूतो लक्ष्मणसमीपं गतः, पुनर्लक्ष्मणेन परावृतोऽस्मिन् वने प्रत्यागतः, परं सीता न दृश्यते, क्व गतास्ति सा? एवमुक्त्वा मूर्छया भूमौ पतितो रामः शीतलोपचारैर्लक्ष्मणेन पुनः सज्जितो विलपति यथा—

हा सीते निर्जनेऽरण्ये । कथं मुक्ता प्रिये मया ॥ हा वत्स लक्ष्मण कथं । मुक्तोऽसि रणसंकटे ॥ १ ॥ एवं ब्रुवन् रामचंद्रो । मूर्छया न्यपतत क्षितौ ॥ क्रंदद्भिस्तरुभिरपि । वीक्ष्यमाणो महानुजः ॥ २ ॥ लक्ष्मणोऽप्यब्रवीदेव—मार्याय किमिदं ननु ॥ तवायं लक्ष्मणो भ्राता । जित्वारीन् समुपस्थितः ॥ ३ ॥ पीयूषेणेव संसिक्तो । रामचंद्रस्तया गिरा ॥ लब्धसंज्ञो ददर्शोच्चैः । सस्वजेव निजानुजं ॥ ४ ॥ लक्ष्मणं लघुभ्रातरं दृष्ट्वा रामो तमालिलिंग, कुशलोदंतं चापृच्छत. रामे-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णापि तस्मै सर्वः वृत्तांतः कथितः, तदा लक्ष्मणः प्राह नो बांधव! चिंतां मा विधेहि? केनापि पापिना सीताहरणकृते सिंहनादो विहितः, तेन सिंहनादेन च त्वां मोहयित्वा तेन सीता हृता. पुनर्लक्ष्मण उवाच, हे श्रीराम! तर्ह्यहं तवानुजो यदि तस्य प्राणैः सह जानकीमाहरिष्यामि, परमेष विराधः स्वपैतृके पाताललंकाराज्ये स्थाप्यो यतः खरदूषणसंग्रामे मयेति प्रतिपन्नं वर्तते. रामेणोक्तं नो विराध! मयापि तव पाताललंकाराज्यं दत्तं, त्वं निश्चिंतो नव? ततः स विराधः सीताप्रवृत्तिमानेतुं विद्याधरनटान् निजसेवकान् प्राहिणोत्, ते विराधसेवकाः दूरं दूरं भ्रांत्वा पश्चात्समाजग्मुः, परं सीताप्रवृत्तिं न प्रापुः. तदा विराधेनागत्य रामचंद्राय विज्ञप्तं स्वामिन् मत्सेवकैर्दूरं गत्वा विलोकितं, परं क्वापि सीताप्रवृत्तिर्न लब्धा, तत श्रुत्वा मूर्छितो रामः, पुनर्लब्धचैतन्यो लक्ष्मणंप्रति बनाषे—कोऽहं वत्स स एष आर्य नगवानार्यः स को राघवः। के यूयं बत नाथ पूज्यपदयोर्दासोऽस्म्यहं लक्ष्मणः ॥ कांतारे किमिहास्महे ननु विनो देवी गता कुत्रचित्। का देवी जनकाधिराजतनया हा जानकि क्वासि हा ॥ १ ॥ साधु साधु च यत्पृथ्वी—नारो नारोपितो मयि ॥ कलत्रस्यापि न त्राता । स्यां कथं रक्षिता क्षितेः ॥ २ ॥ आख्यास्वेति खग स्वर्गे । पितुर्दशरथस्य मे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ एकस्त्रीपरित्राणेऽपि । न रामः शक्तिमर्हति ॥ ३ ॥ राज्यभ्रंशो वने वासः । सीता नीता पिता मृतः ॥ एकैकमपि तद् दुःखं । यदब्धीनपि शोषयेत ॥ ४ ॥ दिवसो वरिससमाणो । वेला मासस्स तुल्ल मे जाई ॥ विरहानलतत्तंगं । दंसणअमिएण सिंचेह ॥ ५ ॥ रामः सीताविरहपीडितो रावणंप्रति बभाषे—जन्म ब्रह्मकुले हरार्चनविधौ कृत्वा शिरःकर्तनं । शक्तिं वज्रिणि घोरदंतिदलनव्यापारसक्तं मनः ॥ हेलोल्लालितकेलिकंदुकनिभः कैलास उत्पाटितः । तत्किं रावण लज्जसे न हरितुं चौर्येण पत्नीं रघोः ॥ ६ ॥

इत्यादि विलपन् रामो विराधसुभटानाह भो सुभटाः! यदि सीताप्रवृत्तिर्न प्राप्ता तर्हि भवतां को दोषः? दैवे विपरीते न दोषोऽयं भवतां. तस्मिन् समये विराधोऽप्यवदत् हे प्रभो! त्वं निर्वेदं मा कृथाः? अनिर्वेदः श्रियो मूलं, अहं तव भृत्योऽस्मि. अथ वयं पाताललंकां गच्छामः, तत्र सीताप्रवृत्तिः सुलभा भविष्यति, रामेणोक्तमेवं भवतु. ततो रामलक्ष्मणौ विराधसहितौ पाताललंकापुर्याः परिसरवने जग्मतुः, तत्र सुंदो नाम खरात्मजो महासैन्यसमावृतो रामंप्रति संमुखिनो रणायागात्, तत्र सुंदः पूर्वविरोधिना पुरोगेण विराधेन समं घोरं रणं चक्रे, तदा लक्ष्मणो विराधप्री-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्या सुंदं हंतुं दधावे, लक्ष्मणं संग्रामसज्जं दृष्ट्वा सुंदः शूर्पणखागिरा लंकानगर्यां रावणशरणं ययौ. ततो रामलक्ष्मणौ रघुपुंगवौ पातालंलकां प्रविश्य विराधं पैतृकपदे निवेशयामासतुः. रामलक्ष्मणावपि खरदूषणप्रासादे तस्थतुः, विराधः पुनर्युवराज इव सुंदवेश्मनि विवेश. एवं स विराधो रामलक्ष्मणसाहाय्यात्पातालंलकाराज्यं कुर्वन्नास्ते.

इतश्च साहसगतिनामा विद्याधरः सुग्रीवपत्नीताराभिलाषुको हिमवद्गिरिगह्वरे प्रतारणीं विद्यां साधयित्वा सिद्धविद्यः सुग्रीवरूपं विधाय किष्किंधां जगाम. तदा सुग्रीवे क्रीडार्थं बहिरुद्याने गते सति स कृत्रिमसुग्रीवस्तारादेव्या समं क्रीडार्थं सत्यसुग्रीवांतःपुरमगात, तावता सत्यसुग्रीवो द्वारे समागतः, तदा द्वारपालैः स्खलित्वोक्तं सुग्रीवो मध्ये वर्तते, त्वं कः? सुग्रीवेणोक्तमहमेव सुग्रीवः, द्वारपालेनोक्तं तर्हि किं सुग्रीवद्वयं वर्तते? एको मध्येऽन्यश्च बहिः, तयोः कोलाहलं श्रुत्वा सुग्रीवसूनुनांगदेनांतःपुरविप्लवं त्रातुं द्वावपि सुग्रीवावंतःपुरे प्रविशंतौ स्खलितौ. अथ सत्यसुग्रीवोंतःपुरे प्रवेशमलभमानः सैनिकानां चतुर्दशाक्षौहिणीरमेलयत, ता अक्षौहिण्योऽर्धार्धं भूत्वा द्वयोः पार्श्वयोरभवत्. एवं विटसत्यसुग्रीवौ ससैन्यौ सप्तसप्ताक्षौहिणीसहितौ परस्परं युयुधाते. ततः प्रवृत्ते युद्धं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



। सैन्ययोरुभयोरपि ॥ कुंतपातैर्दिवं कुर्व—दुल्कापातमयीमिव ॥ १ ॥ युयुधे सादिना सादी । निषादी च निषादिना ॥ पदातिना पदातिश्च । रथिको रथिकेन च ॥ २ ॥ चतुरंगचमूचक्र—विमर्दैनाथ मेदिनी ॥ अवाप कंपं मुग्धेव । प्रौढप्रियसमागमात् ॥ ३ ॥ एह्येहि रे परगृह—प्रवेशस्थ इति ब्रुवन् ॥ विटसुग्रीवमुद्ग्रीवः । सुग्रीवो योद्धुमाह्वत ॥ ४ ॥ युयुधाते महायोधौ । तौ क्रोधारुणलोचनौ ॥ विदधानौ जगत्त्रासं । कीनाशस्येव सोदरौ ॥ ५ ॥ शस्त्रखंडैरुच्छलद्भि—र्डुडुवे खेचरीगणः ॥ महायुद्धे तयोर्वृद्ध—खंडो महिषयोरिव ॥ ६ ॥ तौ छिन्नास्त्रावथान्योन्य—ममर्षणशिरोमणी ॥ युयुधाते मल्लयुद्धं । पर्वताविव जंगमौ ॥ ७ ॥ उत्पतंतौ क्षणाद्व्योम्नि । निपतंतौ क्षणाद् भुवि ॥ ताम्रचूडाविवाजातां । वीरचूडामणी उभौ ॥ ८ ॥

एवं तौ द्वावपि परस्परं युद्ध्वान्योन्यं जेतुमनीश्वरावपसृत्य तस्थतुः. अथ सत्यसुग्रीवः सहायार्थं पवनांजनयोः सुतं हनूमंतमाजूहवत, हनूमति पश्यत्यपि तथैव तौ युयुधाते. ततस्तयोर्भेदमजानन् हनूमान स्वस्थानं गतः, विटसुग्रीवेण सत्यसुग्रीवः कुट्टितः. अथ सत्यसुग्रीवो मनसि चिंतयति—धन्यो महाबलो वाली । योऽखंडपौरुषव्रतः ॥ राज्यं तृणमिव त्यक्त्वा । जगाम परमं पदं ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ १ ॥ चंद्ररश्मिकुमारो मे । बलीयान् जगतोऽप्यसौ ॥ किंतु द्वयोरभेदज्ञः । कं रक्षतु निहंतु कं ॥ २ ॥ किंच मत्पुत्रेण चंद्ररश्मिकुमारेणांगदेन च तत्साधु विदधे यत्तस्य पापीयसोंतःपुरप्रवेशनं रुद्धं. अथामुष्य वधाय कमपि बलीयांसं श्रयामि, तर्हि दशाननं सेवे. अथवायं स्त्रीलंपटः प्रकृत्या चंचलस्त्रैलोक्यकंटकश्च, तेन चैष रावणस्तं सुग्रीवं मां च हत्वा स्वयमेव तारामादास्यते. अहो! अस्मिन्नवसरे यदा खरोऽभविष्यत्तदा मम साहाय्यं कर्तुमीश्वरोऽभविष्यत्. अथ याभ्यां संग्रामे खरस्य पुत्रो भ्राता चतुर्दशसहस्रकुलपत्तयस्तथा खरोऽपि च हतस्तौ रामलक्ष्मणौ विराधस्य राज्यदायकौ सेवे, सांप्रतं च तौ पाताललंकामलंकुरुतः. एवं विमृश्य सुग्रीवः स्वं विश्वासभूतं दूतमनुशिष्य पाताललंकायां विराधंप्रति प्रेषयामास. दूतोऽपि तत्र गत्वा विराधं च प्रणम्य स्वस्वामिव्यसनवृत्तांतं च कथयित्वेदमब्रवीत्, मत्स्वामी सुग्रीवो महत्संकटे पतितोऽस्ति, अतस्तदुद्धारे राघवौ शरणीकर्तुं वांछति, विराधेनोक्तं भो दूत! त्वं शीघ्रं याहि? गत्वा च त्वत्स्वामिनं सुग्रीवं द्रुतं समानय? यतः सतां संगः पुण्येन भवति, एतौ च सत्पुरुषौ परकार्यतत्परौ, यतः—विरला जाणंति गुणा । विरला पालंति निद्धणा नेहं ॥ विरला परकज्जकरा । परदुक्खे दुक्खिआ विरला ॥ १ ॥ अतस्त्वं चपलं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गछ? त्वत्स्वामिनं चेहानयेति विराधवचनं श्रुत्वा गतो दूतः सुग्रीवसमीपं. तस्मै च तद् वृत्तांतं व्यजिज्ञपत्, तदा हर्षितः सुग्रीवो वानरेश्वरः स्वसैन्यपरिवृतो गगनाध्वना पातालल्लंकां प्राप, सुग्रीवमायांतं श्रुत्वा विराधस्तत्सन्मुखमियाय.

ततो विराधः सुग्रीवं तायिने रामचंद्राय नमस्कारं कारयामास, रामचंद्रोऽपि सुग्रीवमासनदानाभ्युत्थानादिना बहु मेने, सुग्रीवोऽपि स्वं दुःखं रामचंद्राय व्यज्ञपत्, रामोऽपि स्वं दुःखं सुग्रीवाय न्यवेदयत. ततः सुग्रीवो रामं प्रोचे हे स्वामिन्नहं तवानुगः सीताप्रवृत्तिमचिरादानयिष्ये, अतस्त्वं किष्किंधांप्रत्यागछ. ततश्चलितौ रामलक्ष्मणौ सुग्रीवसहितौ किष्किंधांप्रति. अथ रामचंद्रः किष्किंधामागत्योपवने स्थितः, तत्र स्थित्वा स विटसुग्रीवमाह्वास्त. ततस्तौ सुग्रीवविटसुग्रीवौ रामानुज्ञया परस्परं युयुधाते. शूरा हि भोजनाय द्विजा इव रणायालसा न भवंति. अथ तौ दुर्धरौ चरणन्यासैर्वसुधां कंपयंतावयुध्येतां, तौ च समपराक्रमौ समरूपौ सदृग्भावप्रविलासहास्यकलितौ दृष्ट्वा रामश्चिंतयत्यनयोर्मध्ये कः परः कश्चास्मदीय इति न ज्ञायते. अथ देवाधिष्टितधनुर्नादेन विद्या दूरं यास्यतीति निश्चित्य रामो वज्रावर्ताभिधधनुष्टंकारमकरोत्, तन्नादमाहात्म्यात साहसगतेर्विद्याधरस्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रूपांतरकरी विद्या व्याघ्राकरिणीव पलायिता, तदा तं विद्याधरंप्रति रामेणोक्तं भो पापिन्! भो मायिन्! मायया सर्वान् विमोह्य परदारान् रिरंससे, रे पाप! चापमारोप्य संग्रामाय सज्जो भव? मया सह च संग्रामं कुरु? इतः कोपारुणलोचनेन लक्ष्मणेनैकेन बाणेन हतो मृत्वा स नरकं गतः, यादृशमनुचितं तेनारब्धं तादृशं फलं लब्धं.

ततः श्रीरामेण विराधवत्सुग्रीवोऽपि किष्किंधाराज्ये स्थापितः, सुग्रीवश्च पौरैः पूजितो राज्यमकरोत. ततः सुग्रीवो निजास्त्रयोदशकन्यका अत्यंतसुंदरा रामचंद्राय दातुमयाचिष्ट, रामः सुग्रीवमुवाच भो सुग्रीव! सीतान्वेषणहेतवे प्रयतोऽहमेभिः कन्याभिः किं करोमीत्युक्त्वा रामो बहिरुद्याने गतः, रामानुज्ञया सुग्रीवश्च निजां पुरीं विवेश. इतश्च लंकायां पुर्यां मंदोदर्यादयो रावणस्त्रियः खरादिहननोदंतं श्रुत्वारुदन्. चंद्रणखापि सुंदसुतमरणतः पाणिभ्यामुरः शिरश्च कुट्टयंत्यास्फालयंती च रावणगृहं प्राविशत. रावणकंठे च लगित्वा रुदंत्येवं जगाद, हे बांधवाहं दैवेन हता, यथा—

हतः पुत्रो हतो भर्ता ; हतौ च मम देवरौ ॥ चतुर्दशसहस्राणि । हताश्च कुलपत्तयः ॥ १ ॥ पाताललंका चोछिन्ना । राजधानी त्वदर्पिता ॥ दर्पवद्भिर्द्विषद्भिश्च । बंधौ जीवत्यपि त्वयि ॥ २ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जीवग्राहं प्रणश्याहं । सुंदेन सह सूनुना ॥ त्वां शरण्यमिहायाता । कुत्र तिष्ठामि साधि मां ॥ ३ ॥ अबोधयद्दशास्योऽपि । रुदंतीं तां ससौष्टवः ॥ त्वद्भर्तृपुत्रहंतारं । हनिष्याम्यचिरादपि ॥ ४ ॥ शोकेनानेन वैदेही—विप्रलंभरुजापि वा ॥ फालच्युत इव द्वीपी । तल्पे तस्थौ निपत्य सः ॥ ५ ॥ अथ मंदोदरी देवी रावणमुपेत्याभ्यधात, हे स्वामिन्! प्राकृतलोकवच्छयायां निश्चेष्ट इव किं तिष्ठसि? रावणो मंदोदरीमवोचत, हे मंदोदरि! वैदेहीविरहाज्ञोक्तुं पातुं कीन्मितुं वक्तुं विलोकयितुं च न क्षमोऽस्मि, तर्हि त्वं तत्र वैदेह्याः समीपे गछ? गत्वा च तथा कुरु यथा सा सीता मया सह रिंसति, अन्यथा मम जीवितं नास्ति, यतः—

कंपः स्वेदः श्रमो मूर्छा । भ्रमिर्ग्लानिर्बलक्षयः ॥ राजयक्ष्मादिरोगाश्च । भवेयुर्मन्मथोछिताः ॥ १ ॥ स्त्रीसंभोगेन यः काम—ज्वरं प्रतिचिकीर्षति ॥ स हुताशं घृताहुत्या । विध्यापयितुमिछति ॥ २ ॥ वरं ज्वलदयःस्तंभ—परिरंभो विधीयते ॥ न पुनर्नरकद्वार—रामाजघनसेवनं ॥ ३ ॥ सतामपि हि वामभ्रू—र्ददाति हृदये पदं ॥ अभिरामं गुणग्रामं । निर्वासयति निश्चितं ॥ ४ ॥ वंचकत्वं नृशंसत्वं । चंचलत्वं कुशीलता ॥ इति नैसर्गिका दोषा । यासां तासु रमेत कः ॥ ५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवस्य बीजं नरक—द्वारमार्गस्य दीपिका ॥ वैरकंदः कलेर्मूलं । दुःखानां खानिरंगना ॥ ६ ॥ प्राणसंदेहजननं । परमं वैरकारणं ॥ लोकद्वयविरुद्धं च । परस्त्रीगमनं त्यजेत् ॥ ७ ॥ सर्वस्वहरणं बंधं । शरीरावयवच्छिदं ॥ मृतश्च नरकं घोरं । लभते पारदारिकः ॥ ८ ॥ लावण्यपूर्णावयवां । पदं सौंदर्यसंपदः ॥ कलाकलापकुशला—मपि त्यजेत्परस्त्रियं ॥ ९ ॥ इत्याद्युक्तिभिर्मंदोदर्या रावणपत्न्या प्रतिबोधितोऽपि रावणो न बुबुधे, बहुलकर्मत्वान्नरकगामित्वाच्च. पुनः रावणो मंदोदरींप्रति भणति, हे प्रिये! हे प्रियभक्ते! मया गुरुसमीपे नियमो गृहीतोऽस्ति यदहमप्रसन्नामनिच्छंतीं पररमणीं न रमे, इत्यभिग्रहो गुरुसाक्षिको मया गृहीतः, तदभिग्रहं प्राणांतेऽपि न त्यजामि, अतस्त्वं याहि? गत्वा च सा सीता यथा मयि रमते तथा कुरु? मंदोदर्यपि पत्युः पीडया पीडिता देवरमणोद्याने गत्वा सीतामेवमुवाच, हे सुंदरि! हे सीते! हे सुभगे! एषाहं दशाननस्याग्रमहिषी मंदोदरीनाम्नी त्वयि दासीत्वं प्राप्स्ये, मम वचसा त्वं दशकंधरं भजस्व? हे सुंदरि! अस्मिन् संसारे त्वमेव धन्यासि यां मम पतिर्विश्वसेव्यांह्रिकमलस्त्वामभिलषते, अतस्त्वं ममोक्तं वचनमंगीकुरु? रावणं च पतिं कृत्वा त्वं विश्वस्वामिनी भव? त्वं रामेण भूचरेण पत्तिमात्रेण पतिना भृशं भ्रांत्वा क

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यास्यसि? यदि दशाननः पतिर्लभ्यते तर्ह्यन्यैः किं क्रियते? रावणश्च द्वात्रिंशल्लक्षणोपेतोऽस्ति, यथा—कुलीनः, शीलवान्, प्रियंवदः, सततव्ययी, प्रीतिमान्, त्यागी, विवेकी, शृंगारी, अभिमानी, श्लाघावान्, उज्ज्वलवेषः, द्विसप्ततिकलाकुशलः, सत्यवाक्प्रियः, अवदान्यः, स्वजनप्रियः, सुगंधप्रियः, सुवृत्तः, मंत्रवान्, क्लेशसहः, ह्रस्वदंतः, अप्रकाशकः, पंडितोत्तमः, साधर्मिकः, महोत्साही, गुणग्राही, क्षमी, परिभावकश्चास्ति. हे सीते सुभगे! एवंविधैर्द्वात्रिंशद्गुणैः संयुक्तं नायकं रावणं यदि त्वं न सेविष्यसे तर्हि त्वं भोगैर्वंचिता दुःखभरैश्च संश्रिता कं नरं सेविष्यसे? एवं मंदोदरीवचनानि श्रुत्वा सीता सोच्छ्वासं सोपालंभं च—

रुषा बभाषे सीतैवं। क्व सिंहः क्व च जंबूकः॥ क्व सुपर्णः क्व वा काकः। क्व रामः क्व च ते पतिः॥१॥ दंपतीत्वमहो युक्तं। तव तस्य च पाप्मनः॥ रिरंसुरेकोऽन्यस्त्रीषु। दूती भवति चापरा॥२॥ द्रष्टुमप्युचिता नासि। किमुत्संभाषितुं हले॥ स्थानादितो गच्छ गच्छ। त्यज दृष्टिपथं मम॥३॥ एवं तिरस्कृता मंदोदरी रावणसमीपं गत्वा सीतोक्तमकथयत. ततो मंदोदरीसहितो रावणः सीतासमीपे समागत्य तांप्रति जगाद, हे सीते! त्वं कस्मात्कुपितासि? एषा मंदोदरी तव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दास्यस्ति, अहमपि तव दासोऽस्मि, हे देवि सीते! मयि प्रसादं कुरु? दृष्ट्या च मां विलोकय? इति श्रुत्वा सीता पराङ्मुखीभूय रावणंप्रत्युवाच, हे रावण! मां रामगेहिनीं हरंस्त्वं कृतांतदृष्ट्या दृष्टोऽसि, सानुजे रामे द्विषन् कियन्मात्रं जीविष्यसि? किं जीवनादुद्विग्नोऽसि यत्त्वं मां वांछसि. सीतयैवमाक्रोष्यमाणोऽपि रावणो भूयोभूयस्तथैवोवाच, धिगहो बलीयसी कामावस्था! भावहीनं मैथुनं न भवति, यतः—वस्त्रहीनमलंकारं । घृतहीनं च भोजनं ॥ स्वरहीनं च गांधर्वं । भावहीनं च मैथुनं ॥ १ ॥

एवं तयोर्वार्ता कुर्वतोः सूर्यो धाम्नां निधिः पश्चिमे लवणांबुधौ निर्ममज्ज, तदा घोरा निशा च प्रावर्तत, घोरबुद्धिरावणश्च सीतांप्रत्युपसर्गान् कर्तुं प्रचक्रमे. यथा—घूत्कारिणो महाभूकाः । फेत्कुर्वाणाश्च फेरवः ॥ वृका विचित्रं क्रंदंत । भतवोऽन्योन्ययोधिनः ॥ १ ॥ पुच्छाछोटकृतो व्याघ्राः । फूत्कुर्वाणा फणाभृतः ॥ पिशाचप्रेतवेताल—भूताश्चाकृष्टकर्त्रिकाः ॥ २ ॥ उच्छलंतो ह्युच्छलिता । यमस्येव सभासदः ॥ विकृता रावणेनैयु—रुपसीतं भयंकराः ॥ ३ ॥ त्रिभिर्विशेषकं ॥ अथ सीता पूर्वोक्तांस्तान् भयंकरान् श्वापदान् वीक्ष्य मनसा पंचपरमेष्ठिनमस्कारं ध्यायंती तस्थौ, न तु द-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शाननं भेजे. अथ प्रभाते बिभीषणस्तन्निशावृत्तं निशम्य सीतासमीपे चागत्य सीतांप्रत्येवमवोचत,
हे भद्रे त्वं कासि? केनेहानीता? केन हेतुना च राक्षसीभिः परिवृता स्थापितासि? परस्त्रीसोदर-
स्य मम सर्वं सत्यमाख्याहि? सीतयोक्तं हे बिभीषण! हे धर्मबांधव! मम वृत्तांतं शृणु? ततोऽधो-
मुखीभूय सैवमवदत्, अहं जनकपुत्री भामंडलस्वसा सीतानाम्नी रामचंद्रस्य पत्न्यस्मि, दशरथस्य
च वध्वस्मि, अहं पत्या समं सानुजेन लक्ष्मणेन देवरेण समं दंडकारण्यमागमं. तत्रारण्ये एकस्मि-
न् दिने मम देवरः क्रीडार्थमितस्ततो भ्राम्यन् सूर्यहासं महासिं ददर्श. तमसिं गृहीत्वा कुतूहलात
समीपस्थवंशजालिं तेन स चिच्छेद, तदाज्ञानात्तदंतःस्थविद्यासाधकनरस्य शिरश्छिन्नं. एवमज्ञानात्त-
त्साधकशिरश्छेदतः कृतपश्चात्तापोऽसौ भ्रातुः समीपमागात्, सर्वं च स्वरूपं कथयित्वा खड्गमदर्शय-
त, मत्पतिना रामेणोक्तं हे भ्रातस्त्वया साधु न विहितं, अस्य खड्गस्य साधकस्त्वया हतः, लक्ष्मणे-
नोक्तं हे बांधव! मयाज्ञानतः कश्चित्पुमान् हतः.

एवं तौ वार्तां कुर्वाणौ यावद्वर्तेते तावता मद्देवरस्यानुपदं काचिच्छूर्पणखेति नाम्नी कामिनी
तत्रागता, मत्पतिं च वीक्ष्य मोहिता कामाय ययाचे, रामेणोक्तं मम तु पत्न्यस्ति, त्वं लक्ष्मणं भ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जस्व? तदा सा लक्ष्मणं गता; लक्ष्मणेनोक्तं त्वं पूर्वं रामं गता, अतस्त्वं रामं भजस्व? त्वं मम भ्रातृजाया जाता, तस्मान्मम योग्या नासि. एवमुभाभ्यां तिरस्कृता सा स्वस्थानं गता, तत्क्षणादेव तया सैन्यं प्रेषितं, तत्सैन्यं समागतं दृष्ट्वा राममापृच्छ्य लक्ष्मणः सिंहनादसंकेतं कृत्वा युद्धं कर्तुं ययौ. तदा मायया क्ष्वेडानादं कृत्वा रामं च दूरं नीत्वा दुराशयो रावणो मां हृत्वात्रागतः. भो बिभीषण! एतन्मम चरित्रं. एतद्वचनं श्रुत्वा बिभीषणो रावणांतिके गत्वा रावणं नत्वा च बभाषे, हे बांधव! हे स्वामिंस्त्वया कुलोचितं न कृतं यत्सीताहरणं विहितं. अद्यापि किंचिद्गतं नास्ति, ततो यावद्रामस्य पार्श्वे सौमित्रिर्नायाति तावत्सीतामाश्वास्य तदंतिके मुच्यतां? इति बिभीषणोक्ते कोपं कृत्वा रावणो बभाषे, रे बिभीषण! त्वं किं भाषसे? किं मया सीता पुनः समर्पणाय समानीतास्ति? एषा तु मम भार्या भविष्यति, तौ वराकौ रामलक्ष्मणावहं हनिष्यामि. ऊचे बिभीषणो भ्रातः। सत्यं तद् ज्ञानिनो वचः ॥ यद्रामपत्न्याः सीतायाः। कृते त्वत्कुलसंक्षयः ॥ १ ॥ भक्तस्य बंधोर्मे वाचं। मन्यसे ह्यन्यथा कथं ॥ मया हतो दशरथः। स तावज्जीवितः कथं ॥ २ ॥ न यद्यप्यन्यथा भावि। वस्तुतस्तु महीभुज ॥ तथापि प्रार्थ्यसे मुंच। सीतां नः कुलघातिनीं ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनाकर्णितकेनेव । बिजीषणगिरामथो ॥ आरोप्य पुष्पके सीतां । भ्रमन्नेवमदर्शयत ॥ ४ ॥ हे सीते ! अमीमे क्रीमाशैलाः, अमूः स्वादुतोयाः पुष्करिण्यः, अमूनि नंदनोद्यानसन्निभान्युपवनानि, अमूनि धारावेश्मगृहाणि. अमूश्च केलिकूलिन्यः, अमूनि केलिवनानि, एतानि रतिवेश्मानि स्वर्गखंमोपमानि, अतो हे सुब्रु ! यत्र तवैषु रतिस्तत्र मया सह रमस्व ? यतः—

गतं ते यौवनं जीरु । जीवितं च निरर्थकं ॥ या न वेत्सि सदा पुंसां । सस्नेहं सुरतक्रमं ॥ ॥ १ ॥ सीतयोक्तमहमन्यं पुरुषं नेहामि, इत्युक्त्वैकं श्रीरामचंडं ध्यायंती सा मौनमस्थात. पुना रावण इतस्ततो भ्राम्यन् देवरमणोद्याने सीतां मुमोच, त्रिजटाराक्षसीं च सीतासमीपे संस्थाप्य रावणः स्वस्थाने गतः. अथ बिजीषणः स्वभ्रातरं रावणमेवंविधं वचोयुक्तेरगोचरं दृष्ट्वा कुलामात्याना-जूहवत्, ऊचे च जो कुलामात्याः ! अस्मत्स्वामी कामातुरः स्वकुलक्षयं करिष्यति, कामस्त्वेकोऽपि दुर्जयः, किं पुनः कृतसाहाय्यः परनारीरिरंसया ? अतः परं स महति व्यसनार्णवे पतिष्यति, अतो यूयं गत्वा मम बांधवं बोधयत ? यथा चास्मात्पापात्स निवर्तते तथा कुरुत ? अन्यथा सर्वेषां क्षयो जविष्यति. एवं बिजीषणवाक्यं श्रुत्वा ते मंत्रिणो रावणसमीपं गत्वा विज्ञपयंति यथा स्वा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिन्नेषा सीता मुच्यतां, अस्या निमित्तेन नः कुलक्षयो भविष्यति. ज्ञानिना नैमित्तिकेन च पूर्वमेव कथितमस्ति, अतो हे स्वामिन्नेनां मुंच? इत्यादिवचोयुक्त्या मंत्रिभिर्बहुविज्ञप्तोऽपि स सीतां नामुंचत्. यथाऽरण्ये धर्मोपदेशो न लगति तथा रावणेऽपि मंत्रिवचो नालगत्. पुनर्मंत्रिभिरुक्तं स्वामिन् सुग्रीवहनूमन्मुख्याः सुभटा राघवस्य साहाय्यं कर्तुं मिलिताः संति, यतो न्यायभाजां कः पक्षपातं नावलंबते, स्वामिन् सीतानिमित्तादिक्ष्वाकात्कुलक्षयो ज्ञानिनोक्तस्तत्सांप्रतं समुपस्थितं. एवं मंत्रिभिर्बहूच्यमानोऽपि रावणः सीतां नामुंचत्.

ततो बिभीषणोऽनागतं भयं दृष्ट्वा लंकावप्रं सज्जीकरोति. वप्रे कपिशीर्षकाणि खातिकायंत्रादि च सर्वं प्रगुणीकरोति. यतः—अनागतं हि पश्यंति । मंत्रिणो मंत्रचक्षुषा ॥ अथ रामकथा यथा—इतश्च कमपि कालं सीताविरहपीडितो रामः सौमित्रिणाश्वास्यमानः कतिचिद्दिनान्यत्यवाहयत्. अथैकस्मिन् दिने रामेणानुशिष्य प्रेषितो लक्ष्मणस्तूणचापकृपाणभृत्सुग्रीवंप्रति प्रतस्थे. लक्ष्मणश्चरणन्यासैः । कंपयंश्च वसुंधरां ॥ वेगांदोलितदोःस्पर्शा—न्मार्गवृक्षांश्च पातयन् ॥ १ ॥ उत्कटभृकुटीभीष्म—ललाटारुणलोचनः ॥ भीतैर्द्वाःस्थैर्मुक्तमार्गः । प्राप सुग्रीववेश्म सः ॥ २ ॥ युग्मं ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आयांतं लक्ष्मणं श्रुत्वा । निर्गत्यांतःपुराद् द्रुतं ॥ उपतस्थे कपिराजः । कंपमानवपुर्भयात् ॥ ३ ॥
ऊचे च लक्ष्मणः क्रुद्धः । कृतकृत्योऽसि वानर ॥ सुखं तिष्ठसि निःशंकः । स्वांतःपुरसमावृतः ॥ ४ ॥
स्वामी तरुतलासीनो । दिवसानब्दसन्निभान् ॥ यथात्येति न तद्वेत्सि । प्रतिपन्नं च विस्मृतं ॥ ५ ॥
सीताप्रवृत्तिमानेतु—मुत्तिष्ठस्वाधुनापि हि ॥ मा साहसगतेर्मार्गे । रामः संकुचिताननः ॥ ६ ॥

लक्ष्मणोक्तमेतद्वचनं निशम्य भीतभीतः सुग्रीवो लक्ष्मणपादयोः पतित्वावदत् हे स्वामिन्निममेकं ममापराधं सहस्व? त्वं तु मे प्रभुः. एवमुक्तः सौमित्रिः कपीश्वरं सुग्रीवमग्रे कृत्वा यत्र श्रीरामचंद्रोऽस्ति तत्रागतः, तत्रागत्य च स श्रीरामचंद्रं नमश्चक्रे. ततः श्रीरामः सुग्रीवंप्रत्यभाषिष्ट, भो सुग्रीव! सीताप्रवृत्तिं समानय? सीता कुत्रास्ति? यत्रास्ति तत्र च किं करोति? इति श्रीरामवचनं श्रुत्वा सुग्रीवः स्वान् सैन्यान् सर्वत्र ग्रामाकरनगरखेटकर्बटमडंबद्रोणमुखादिषु विद्याधरनगरादिषु च प्रेष्य सर्वत्र विलोकयामास. तेऽपि सुभटाः सर्वत्र भ्रांत्वा भ्रांत्वा विलोकयित्वा समाजग्मुः, परं केनापि सीताप्रवृत्तिर्न लब्धा.

इतश्च सीताहरणवृत्तांतो भामंडलेन श्रुतः, ततो भामंडलोऽपि तत्रागाद्यत्रास्ति रामः. विराधो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽपि ससैन्यः पाताललंकातस्तत्रागतः, एवमन्येऽपि विद्याधराः समाजग्मुः. ततः सुग्रीवः स्वयं विलोकनकृते निर्गतः, स च स्थाने स्थाने विलोकयन् कंबूद्वीपे समागतः. तं दृष्ट्वा रत्नजटी विद्याधरश्चिंतयति, किमेष सुग्रीवोऽत्रागतोऽस्ति? किं दशमौलिना ममापराधं संस्मृत्य मद्वधाय प्रेषितोऽस्ति? अथवा—हृता विद्या दशास्येन । पुरा तावन्महौजसा ॥ इदानीमेष मे प्राणान् । हरिष्यति हरीश्वरः ॥ १ ॥ इति चिंतापरं रत्नजटिविद्याधरंप्रति सुग्रीवः समीपे गत्वैवमुवाच, अहो रत्नजटिन् किं त्वं मां नोपलक्षसे? तथा त्वं व्योमगमने किमलसः? रत्नजट्यवोचत हे वानरेश्वर! मम विद्या दशास्येन हृता, जानकीं हरतो रावणस्य पृष्टेऽहं धावितः, मयोक्तं रे पापिन्! मत्स्वामिनो भगिनीं हृत्वा त्वं क्व यास्यसीत्युक्त्वा यावत्खङ्गमाकृष्याहं धावितस्तावता तेन रावणेन मम विद्या हृता, अहं चात्र पतितः. एतत् श्रुत्वा सुग्रीवेण विमाने समारोप्य स रत्नजटी रामसमीपं नीतः, तत्र च सुग्रीवेण सकलोऽपि वृत्तांतो रत्नजटिमुखेन विज्ञापितः, यथा हे श्रीराम! सीता रावणेन हृता, पुष्पके विमाने चारोपिता हा राम! हा देवरसौमित्रे! हा भ्रातर्भामंडल! इति वादिनी रुदंती समुद्रोपरि गच्छंती पूत्कुर्वंती मया श्रुता श्रवणाभ्यां, दृष्टा च नेत्राभ्यां, ततोऽहं धावितो मत्स्वामिभगिनीति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ध्यात्वा, परं तेन पापेन मम सर्वा विद्या अपहृताः, ततोऽहं कंबूद्वीपे पतितः, सुग्रीवेण राज्ञा चेहानीतः, एतच्च मम चरित्रं.

भूयोभूयोऽपि पप्रछ । सीतोदंतं रघूद्वहः ॥ भूयोभूयोऽपि सोऽप्याख्य—त्तन्मनःप्रीतिहेतवे ॥ ॥ १ ॥ अपृछद्रामचंद्रस्तान् । सुग्रीवादीन्महाभटान् ॥ इतः कियति दूरे सा । लंकापूस्तस्य रक्षसः ॥ २ ॥ सुग्रीवादयो विद्याधरा रामंप्रत्यूचुः हे श्रीराम! तया लंकयासन्नयाथवा दूरस्थया किं? तस्य रावणस्य जगद्विजिष्णोः पुरः के वयं? स रावणः सर्वानपि विद्याधरभटान् स्वौजसा तृणवद्गणयति. रामोऽप्यूचे भो विद्याधरास्तं रावणं मम दर्शयत? अहमपि तस्य पराक्रमं पश्यामि, यदि स मे भ्रातुर्मम च पुरतः स्थास्यति तदा ज्ञास्यतेऽसौ बलवान्, अन्यथास्य किं बलं? लक्ष्मण उवाच भो विद्याधराः! यः सारमेयवद्गृहं शून्यं वीक्ष्य सीतां च हृत्वा गतस्तस्य पराक्रमं किं वर्ण्यते? तावज्जांबवानाह ज्ञानवतानंतवीर्येणोक्तं यथा यः कोटिशिलामुत्पाटयिष्यति स रावणं हनिष्यति, ज्ञानिवचनं च नान्यथा भवति. ततो विद्याधरैरुक्तं भो रामलक्ष्मणौ! अस्मत्प्रत्ययहेतवे युवां तां शिलामुत्पाटयतं? रामेणोक्तमेवं भवतु. ततः सर्वेऽपि विद्याधरा लक्ष्मणं रामाज्ञया यानारूढं कृत्वा व्यो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ममार्गेण सपदि कोटिशिलांतिके निन्युः. लक्ष्मणोऽपि कोटिशिलांतिके गत्वा तां च पुष्पादिभिः संपूज्य देवगुरून् च संस्मृत्य वामेतरेण बाहुना दंती लतामिव संदध्रे, सुरैश्च लक्ष्मणोपरि पुष्पवृष्टिः कृता, साधु साध्विति चाकाशे गीरुच्छलिता. संजातप्रत्ययैर्विद्याधरैः पुनर्लक्ष्मणो विमाने समारोप्य किष्किंधायां रामसमीपे मुक्तः. ततः कपिवृद्धाः प्रोचुर्हे स्वामिन्नादौ द्विषां दूतः प्रेष्यः, नीतिमतां चेयं स्थितिः, यतः संदेशहारकेण दूतेन यदि प्रयोजनं सिध्येत तदा संग्रामोद्यमकर्मणा राज्ञां पर्याप्तं, तर्हि कश्चित्समर्थो दूतः प्रेष्यते यो गत्वा कार्यं च कृत्वा शीघ्रमायाति. तदा विद्याधराधीशेन सुग्रीवेण हनूमानाहूतः. हनूमानपि चागत्य श्रीरामचंद्रं लक्ष्मणं सुग्रीवं च नत्वैवमवोचत्, आदिशत स्वामिन् किं करोमि? तदा सुग्रीवो रामंप्रत्युवाच हे स्वामिन्नयं पावनंजयी हनूमान् विधुरे परमो बंधुः, अस्य तुल्यो द्वितीयः प्रभुकार्यकरणक्षमो नास्ति, ततः स्वामिन् सीताप्रवृत्तिलाभार्थमेनं समादिशत. हनूमानप्युवाच हे स्वामिन्! कपयस्त्वनेकशः संति, नामतो यथा गवो गवाक्षो गवलः शरभो गंधमादनो नीलो द्विविद इंदो जांबवान् नंदनोऽनलश्चेत्यादयो वानरेश्वराः कपिपुंगवा वर्तंते, एतेषामंत्योऽहमप्यस्मि त्वत्कार्यकरणक्षमः, कथय किं करोमि? यथा—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लंकां राक्षसद्वीपा—मुत्पाट्येह किमानये ॥ बध्ध्वा सबांधवमथा—नयामि दशकंधरं ॥ १ ॥
सकुटुंबं दशग्रीवं । हत्वा तत्रैव च द्रुतं ॥ देवीं जनकजामेवा—नयामि निरुपद्रवं ॥ २ ॥ रामो-
ऽपि निजगादैवं । सर्वं संभवति त्वयि ॥ तद्गच्छ पुर्यां लंकायां । सीतां तव गवेषय ॥ ३ ॥ मदूर्मि-
कामिमां देव्या । मदभिज्ञानमर्पयेः ॥ तस्याश्चूडामणिं वान्य—दभिज्ञानं समानयेः ॥ ४ ॥ पुनरिदं मद्वाचिकं शंसेः, यथा हे देवि लक्ष्मणाग्रजस्त्वद्वियोगातुरस्त्वामेव ध्यायंस्तिष्टति, त्वं जीवितं मात्याक्षीः, स्तोकैरेव दिनैरावयोः संगमो भविष्यतीति कथयेः, इत्युक्त्वा रामः स्वनामांकितां मुद्रां तस्मै ददाति, हनूमानपि तां मुद्रां लात्वा रामंप्रत्युवाच हे प्रभो! कार्यं कृत्वा यावदहमायामि तावद्भवानिहैव तिष्टतु. इत्युक्त्वा श्रीरामं नत्वा हनूमान् सपरिकरो लंकां पुरंप्रति विमानस्थोऽचालीत्, नभसा गच्छन् माहेंद्रगिरिशिखरे मातामहस्य माहेंद्रपुरपत्तनं दृष्ट्वा चिंतयति, इदं माहेंद्रपुरं नगरं, अत्र च माहेंद्राभिधो राजा. येन मम माता निरपराधा निर्वासिता, तत्तस्य मातामहस्य किंचिच्चमत्कारं दर्शयामीति संचिंत्य क्रुद्धो हनूमान् रणतूर्यमवादयत, तत्प्रतिशब्दैर्दिशो बधिरयन् ब्रह्मांडस्फोटसदृशं सिंहनादं कुर्वन् मातामहं माहेंद्रं स क्षोभयामास.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवंविधं शत्रुं दृष्ट्वेंद्रविक्रमो माहेंद्रः ससैन्यः सपुत्रः समित्रो रणकर्मणि तत्परो नगरान्निर्ययौ, तयोर्माहेंद्रहनूमतोश्च महारणः समजायत. तस्मिन् संग्रामे हनूमांस्तत्सैन्यान् प्रभंजनो द्रुमाणीव बभंज, माहेंद्रोऽपि हनूमता सह दौहित्रसंबंधमजानन् युयुधे, यथा—उभावपि महाबाहू । उभा वप्यतिमर्षणौ ॥ अन्योन्यं दृढयुद्धेन । जनयामासतुः श्रमं ॥ १ ॥ एवं युध्यमानो हनूमांश्चिंतयत्यहो महायुद्धमारब्धं, स्वामिकार्ये च विलंबो भवति, यदि मातामहो न जीयते, तर्हि मानक्षतिः, यदि च विलंबः क्रियते तदा स्वामिकार्यक्षतिः स्यादिति ध्यात्वा क्रुद्धो हनूमान् मोहिन्या विद्यया मातामहं मोहयित्वा जग्राह. ततस्तत्पादयोः पतित्वा स एवमुवाच, हे राजन्नेषोऽहं पवनांजनयोः पुत्रो हनूमान् स्वामिना श्रीरामचंद्रेण सुग्रीवेण च सीताप्रवृत्तिमानेतुं लंकां प्रेषितो व्रजन्माहेंद्रनगरोपरि गच्छंश्च पूर्वं मातृनिर्वासनाज्जातामर्षोऽहं तातस्य तवानुचितं विहितवान्, तद्भवता तातेन क्षंतव्यमित्युक्त्वा तत्पादयोः पतित्वा क्षामितवान्. माहेंद्रोऽपि हनूमंतं भुजाभ्यां समुध्धृत्य समालिंग्य चेत्यूचे, हे महाभुज! प्राग्जनश्रुत्या श्रुतोऽसि, सांप्रतमद्य मया दृष्ट्या दृष्टोऽसि विक्रमी. अथ त्वं गच्छ स्वस्वामिकार्याय, पंथानश्च ते शिवाय संतु.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति कथयित्वा माहेंद्रः ससैन्यो राघवांतिकेऽगात. ततश्चलितो हनूमान् व्योम्ना गछन् दधिमु- खाभिधे द्वीपे कायोत्सर्गे स्थितौ महामुनी प्रेक्षांचक्रे, तयोः साध्वोर्नातिदूरे तिस्रः कुमारिकाश्चाप- श्यत्, कथंभूताः? ध्यानस्था विषण्णांग्यो विद्यासाधनतत्पराश्च. तस्मिन् समयेऽखिले द्वीपे दावानलः प्रजज्वाल, तौ साधू कुमार्यश्च दवसंकटे निपेतुः, तद्वात्सल्येन हनूमान् सागरवारिभिर्मेघ इव तं दावाग्निं शमयामास, तदैव ताः कन्यकाः सिद्धविद्यास्तौ मुनी प्रदक्षिणीकृत्य हनूमंतं बभाषिरे, हे महापुरुष हनूमंस्त्वया साधु विहितं, यद्दावाग्निशमनेन साधुरक्षा कृता, त्वत्साहाय्येनास्माकमपि द्रुतं विद्याः सिद्धाः, हनूमता प्रोक्तं का यूयं? ताः प्रोचुरस्मिन् दधिमुखे द्वीपे गंधर्वराजास्ति, तस्य रा- ज्ञो वयं कन्यकाः स्मः, अस्मत्कृते खेचरोंगारक जन्मत्तोऽभवत्परमस्मत्पित्रा तस्मै न दत्ताः, ततस्ते- न कश्चिन्मुनिः पृष्टो हे स्वामिन्! मत्पुत्रीणां पतिः को भविष्यति? मुनिनोक्तं यः साहसगतेर्वि- द्याधरस्य हंता, स आसां तव पुत्रीणां वरो भावी, तत श्रुत्वास्माभिस्तं पुरुषं ज्ञातुं विद्यासाधनं वि- हितं, तद्विद्याभ्रंशनिमित्तमंगारकेण दावानलो विहितः, स च त्वया निष्कारणबंधुना शामितः, या विद्या षड्भिर्मासैः सिध्यति सा त्वत्साहाय्यात्क्षणमात्रेण सिद्धा मनोगामिनी नाम विद्या, तासां बा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लिकानामेतद् वृत्तांतं श्रुत्वा हनूमता तासामग्रे रामस्यापि सकलो वृत्तांतः कथितः. अथाहमपि सीताप्रवृत्तिनिमित्तं लंकां यामि, ततस्ता कन्या अपि मुदिताः पितुरग्रे गत्वा सर्वं रामवृत्तांतं हनूमद्वृत्तांतं च शशंसुः, सोऽपि गांधर्वराजा स्वपुत्रीभिः समं ससैन्यो रामचंद्रंप्रत्यागात्.

ततो हनूमानुत्पत्योपलंकां गतः, तत्र लंकासमीपे घोरां भयंकरां कालनिशामिव भयदामाशालिकां विद्यां स ददर्श, हनूमंतं दृष्ट्वाशाली प्रोचे—अरे कपे क्व यातोऽसि । यानसि मम भोज्यतां ॥ इति ब्रुवाणा साक्षेपं । विकाशयति सा मुखं ॥ १ ॥ हनूमांश्च गदापाणिस्तदाननं प्रविवेश, पुनश्च तां विदार्य निर्ययावभ्रमध्यादादित्य इव, तयाशाल्यया विद्यया च लंकायां विहितो यः प्राकारो हनूमांस्तं प्राकारं विद्यासामर्थ्यतः कर्परलीलया मंदवभांक्षीत्. ततश्चलितो हनूमान् लंकावप्रासन्ने गतः, तद्वप्ररक्षको वज्रमुखाभिधो विद्याधरो हनूमता सह युयुधे, हनूमानपि तं विद्याधरं संग्रामे हतवान्, हते च वज्रमुखविद्याधरे तत्पुत्री लंकासुंदरी कन्यका विद्याबलवती पितृवैराच्च कोपवती युद्धाय मारुतिमाह्वास्त, चतुरंगचमूयुक्ता साचालीद्धनूमदुपरि, हनूमांश्चिंतयत्येषा ह्यबला, अनया सह किं युद्धं करोमि? अस्याः शस्त्राण्येव भिनद्मि, इति ध्यात्वा स तस्या लंकासुंदर्याः सर्वा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णि शस्त्राण्यच्छिदत, एवं पावनंजयी तां स्त्रियं शीघ्रं निरस्त्रीं चकार निष्पत्रां वल्लीमिव. अथ तया- प्याश्चर्येण स हनूमान् विलोकितः, तं सुंदरं हनूमंतं सुभटं निरीक्ष्यमाणा सा कामपरवशा जाता, ततः सा हनूमंतं नेत्रबाणैस्ताडयंत्यूचे, भो महापुरुषाहमविचार्यैव त्वया सह युद्धसज्जा जाता, त त्क्षम्यतां, आख्यातं साधुना पूर्वं । यत्त जनकघातकः ॥ भावी भर्तेति त्वं चाद्य । मामुद्वह वशंव- दां ॥ १ ॥ पुनः सा प्रोवाच भो हनूमन् सकलेऽप्यस्मिन् जगति तव समोऽन्यः कोऽपि सुभटो ना- स्ति, अहमपि तव पत्नी भूत्वा नारीश्रेष्टा भविष्यामि, अतोऽहं त्वामेव परिणेष्ये, नान्यं, तत् श्रु- त्वा गांधर्वेण विवाहेन सानुरागां तां स परिणीतवान्. तदा भानुमानपि व्योमाटनश्रमात्स्नातुकाम इवापरवारिधौ ममज्ज निजं तेजोऽग्नौ दत्वेति. तस्यां निशायां च नागरीभिः स्वस्वगृहेषु प्रदीपाः कृताः. तदैव छलान्वेकं तमोऽप्युज्जृंभितुमारभत. तेन चांजनाद्रिचूर्णैः पूर्णमिव जगदिदमजायत. यतः—न हि स्थलं न हि जलं । न दिशो न नभो न भूः ॥ तदानीं किं बहूक्तेन । स्वहस्तोऽ- पि न लक्ष्यते ॥ १ ॥ एकाकारकरे विष्वक् । तमःपूरे प्रसर्पति ॥ विश्वं विश्वमनालोक—मभूत पातालसन्निभं ॥ २ ॥ तत्राभिसारिका रात्रौ । जानुप्रक्षिप्तमंजिरा ॥ तमालश्यामलांशुका । भन्नं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गच्छति शंकिता ॥ ३ ॥ समं च लंकासुंदर्या । पवनंजयनंदनः ॥ रममाणो निराशंक—स्तामतीयाय यामिनीं ॥ ४ ॥

अथ सुप्तं तं हनूमंतं लंकासुंदरी जागरणायेत्युवाच, यथा—अन्नतिपंगा प्राची रसपतिरिव प्राप्य कनकं । गतच्छायश्चंद्रो बुधजन इव ग्राम्यसदसि ॥ न दीपा राजंते द्रविणरहितानामिव गुणाः । क्षणात्क्षीणास्तारा नृपतय इवानुद्यमपराः ॥ १ ॥ लंकासुंदर्या निजपत्न्या एतद्वचः श्रुत्वा जागरितो हनूमान् प्रभातकृत्यं करोति, तत् कृत्वा लंकासुंदरीं च सुंदरोक्तिभिरापृच्छ्य स लंकानगर्यां प्राविशत्, तत्र च बिभीषणगृहं गतः, बिभीषणं नत्वा तत्समीपे समुपाविशत्. बिभीषणेन सत्कृत्य । पृष्टश्चागमकारणं ॥ अवोचदंजनासूनुः । सारं गभीरगीरिदं ॥ १ ॥ यद्भ्राता रावणस्यासि । शुभोदर्कं विचिंत्य तत ॥ रामपत्नीं हृतां सीतां । सतीं मोचय रावणात् ॥ २ ॥ किंच भो बिभीषण! परस्त्रीसंगादिह लोकेऽपवादादिभयं परलोके च नरकादिभयं भवति, अतो रामपत्नीं रावणाद्विमोचय? यतस्त्वं तस्य भ्रातासि, शिष्टोऽसि, स्वस्वामिभक्तश्चासि, अतः कथ्यते. बिभीषणोऽवोचत् हे हनूमंस्त्वया साधूक्तं, सीतां मोचयितुं स्वाग्रजो मया पूर्वमेवोक्तः, भूयोऽपि हि सनिर्बंधं प्रार्थयिष्ये.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं बिभीषणेनोक्तेंजनासुतः समुत्पत्य देवरमणोद्याने गतः, तत्राशोकतले च सीतां ददर्श, अशोकवृक्षोपरि स्थितो हनूमान् सीतां दृष्ट्वा चिंतयति—तत्राशोकतरोर्मूले । कपोलव्युलितालकां ॥ संतताश्रुपयोधारां । पल्वलीकृतभूतलां ॥ १ ॥ प्रम्लानवदनांभोजां । हिमात्तां पद्मिनीमिव ॥ अत्यंतक्षामवपुषं । प्रथमेंदुकलामिव ॥ २ ॥ उष्णनिःश्वाससंताप—विधुराधरपल्लवां ॥ ध्यायंतीं रामरामेति । निःस्पंदां योगिनीमिव ॥ ३ ॥ मलिनीभूतवसनां । निरपेक्षां वपुष्यपि ॥ ददर्श देवीं वैदेहीं । पवनंजयनंदनः ॥ ४ ॥ चतुर्भिः कलापकं ॥

एवंविधां तां सीतां दृष्ट्वा हनुमांश्चिंतयति, अहो! सीता महासती, अस्या दर्शनमात्रेण जनैः पवित्रीभूयते, अस्या विरहे च रामो यत् खिद्यते तद्युक्तं, ईदृक्पावनं कलत्रं कुतो लभ्यते. किंचैष वराको रावणोऽपि रामचंद्रप्रतापानले भूयसि स्वपापानले चैवं द्विधापि संकटे पतिष्यति. ततो हनूमान् विद्ययाऽदृश्यो भूत्वा सीतोत्संगेंगुलीयकं पातयामास, तां मुद्रिकां दृष्ट्वा सीतात्यर्थं मुमुदे, मुद्रिकां चापृच्छद्यथा—मुद्रे संति सलक्ष्मणाः कुशलिनः श्रीरामपादाः स्वयं । संति स्वामिनि मा विधेहि विधुरं चेतोऽनया चिंतया ॥ एनां व्याहरदेव मैथिलीसुते नामांतरेणाधुना । रामस्त्वद्विर·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हेण कंकणपदं यस्मै चिरं दत्तवान् ॥ १ ॥ तां मुद्रिकां दृष्ट्वा सीतां हृष्टां दृष्ट्वा त्रिजटाराक्षसी गत्वा दशकंठे व्यजिज्ञपत्, स्वामिन्नियत्कालं जानकी विषण्णासीत, अद्य सानंदा सविलासा च दृश्यते, दशाननेन चिंतितमस्या रामो विस्मृत इति नूनं मया सह रमिष्यते, इति निश्चित्य रावणेन सीतांप्रति मंदोदरी प्रेषिता, मंदोदरी सीतामुवाच हे सीते! अद्भुतैश्वर्यसौंदर्यो दशाननस्त्वां समीहते, त्वमप्यद्भुतलावण्यसौंदर्ययुक्ता, अतो युवयोः संयोगो प्रशस्यो भविष्यति, हे सुंदरि! त्वं रावणं भज? यथा रावणांतःपुर्यास्त्वं स्वामिनी भवेः, सीताप्यवोचदाः पापे! पतिदौत्यविधायिनि! तव मुखं कः वीक्षेत? मां रामस्य पार्श्वे जानीहि? रावणो मां वांछन्निश्चितं खरदूषणानुपदं यास्यति, हे पापिष्ठे भत्तिष्ठोत्तिष्ठ? दूरं याहि? अतः परं त्वया रावणविषये न वाच्यं.

एवं सीतया तर्जिता मंदोदरी कोपाटोपावेशं गता स्वस्थानं प्राप्ता. तावत्सीतापुरतो हनूमान् प्रकटीभूय तामित्यूचे, हे देवि सीते! सलक्ष्मणो रामस्त्वत्प्रवृत्तिमानेतुं मां हनूमंतं प्राहिणोत. तेन प्रेषितोऽहं चात्रागमं. अथ त्वमपि निजाभिज्ञानं चूडारत्नं मह्यं देहि? सीतयोक्तं चूडारत्नं दास्ये. हनूमानूचे मयि तत्र गते रामस्त्वत्कृते त्वरितं समेष्यति, बाष्पाविलाननना सीता हनूमंतमुवाच, हे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हनूमन्! दुर्लंघ्यमर्णवं श्रीरामः कथं लंघयित्वा समेष्यति? हनूमानुवाच हे सीतेऽहं पवनांजनयोः सुतो हनूमान्नामा गगनगामिन्या विद्यया समुद्रमुल्लंघ्येहागतोऽस्मि, यथाहं रामसेवकस्तथान्ये सुग्रीवाद्या विद्याधरा अपि त्वत्पतिसेवका वर्तंते, यथा—भामंडलो विराधश्च। माहेंद्राद्याश्च खेचराः॥ पत्तीभूयोपासते तौ। शक्रेशानाविवामराः॥ १॥ तव प्रवृत्तिमानेतु—महं सुग्रीवदर्शितः॥ रामेण प्रेषितो देवि। समर्प्य स्वांगुलीयकं॥ २॥ चूडामणिमभिज्ञानं। त्वत्त आनायितास्म्यहं॥ तद्दर्शनेन मामत्रा—यातं प्रत्येषति प्रभुः॥ ३॥ हनूमदुपरोधेन। रामोदंतमुदा च सा॥ एकविंशत्यहोरात्र—प्रांते व्यधीत भोजनं॥ ४॥

एवमेकविंशतिदिनांते पारणकं कृत्वा यावत्सा तिष्ठति तावद्धनूमता प्रोक्तं, हे मातः सीतेऽहं रामसेवकोऽस्मि, तदेहि मम स्कंधं समाश्रय? यथा त्वां स्कंधे समारोप्य ससैन्यं च रावणं जित्वा क्षणेन त्वां श्रीरामसमीपं नयामि, सीतयोक्तं हे हनूमंस्त्वयोक्तमहं रामसमीपं नयामि, परं परपुरुषस्पर्शो मनागपि मे नार्हति, तत्त्वं चूडामणिं गृहीत्वा शीघ्रमेव गछ? इत्युक्त्वा सीता हनूमते चूडामणिं ददौ, हनूमानूचे एषोऽहं रामसमीपं गछामि, परं किंचिन्मे विक्रमचापल्यं रक्षसामपि दर्श-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यामि, यतो रावणो जितकाशी परवीर्यं न मन्यते. अथ मे रामपत्तेः पराक्रममेष पश्यत्वित्युक्त्वा सीतां नत्वा चूडामणिं च लात्वा पादन्यासैर्धरां धुन्वन्नुच्चैश्चचाल. मार्गे गच्छन् स तावद्देवरमणोद्यानं भंक्तुं प्रचक्रमे, यथा—रक्ताशोकेषु निःशूको । बकुलद्रुमाकुलः ॥ सहकारेष्वकारुण्यो । निष्कंपश्चंपकेष्वपि ॥ १ ॥ अमंददोषो मंदारे—ष्वदयः कदलीष्वपि ॥ अन्यद्रुष्वपि रम्येषु । भंगलीलां चकार सः ॥ २ ॥ तदा तदुद्यानरक्षका राक्षसास्तं हनूमंतं हंतुं दधाविरे. कथंभूतास्ते निशाचराः? शस्त्रव्यापृतकराः, शस्त्रनामान्यमूनि—

तरवारित्रिशूलनाराचकौशलकृपाणचक्रगांमीवमुसंढिगदामुशललकुटमुद्गरच्छुरिकार्धचंद्रकरपत्रासिपत्रक्षुरप्रभिंदमालतोमरलांगूलपाशवज्रशक्त्यादिशस्त्रव्यापृतकरा रावणसुभटा देवरमणोद्यानरक्षका हनूमंतं हंतुं दधाविरे. हनूमांश्च तेभ्यः कुपितस्तान् पादप्रहारैरुत्पाटितवृक्षादिभिश्च ताडयामास. बलीयसां सर्वमप्यस्त्रं भवति. वृक्षास्त्रैर्हतास्ते सर्वेऽपि राक्षसा दिशोदिशं पलायिताः, केचिद्राक्षसाश्च गत्वा राक्षसेश्वराय तं वृत्तांतमाचचक्षिरे. तत् श्रुत्वा कुपितो रावणो हनूमंतं हंतुं स्वसैन्यं प्राहिणोत. तत्सैन्यं च गत्वा हनूमंतं निष्टुरवचनैस्तर्जयित्वा युयुधे. हनूमानपि राक्षसैस्तर्जितस्तान् विशि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिस्ताडयामास. तदा रावणपुत्रा हनूमंतंप्रति दधाविरे. हनूमानपि तैः सह युध्यमानो राक्षससैन्यं भृशमुपाद्रवत्. ततः स्वसैन्यं विद्रावितं दृष्ट्वा रावणात्मजः क्रुद्धः खड्गमाकृष्य धावितो हनूमतैकेन बाणेन हतो मृतः, यतः—पुष्पैरपि न योधव्यं । किं पुनर्निशितैः शरैः ॥ युद्धे विजयसंदेहः । प्रधानपुरुषक्षयः ॥ १ ॥ ततो भ्रातृवधात् क्रुद्ध इंद्रजिद्रावणपुत्रो हनूमंतं तर्जयन् द्वंद्वयुद्धेनायुध्यत. तयोर्महाबाह्वोरिंद्रजिद्धनूमतोः परस्परं रणः प्रववृते, यथा—वर्षंतौ वारिधाराव—न्नीरंध्रं शरधारणीः व्योमस्थौ तावलक्ष्येतां । पुष्करावर्तकाविव ॥ १ ॥ मुमोच यावंत्यस्त्राणि । दुर्वारो रावणात्मजः ॥ तावंति निजशस्त्रैश्च । तदा चिच्छेद मारुतिः ॥ २ ॥ हनूमदस्त्रक्षुण्णांगाः । सर्वेऽपींद्रजितो भटाः ॥ दृश्यंते रक्तनद्याढ्य—पर्वता इव जंगमाः ॥ ३ ॥

अथेंद्रजिद्रावणपुत्रो निजसैन्यं भग्नं वीक्ष्य क्रोधारुणलोचनो हनूमते नागपाशास्त्रममुंचत्. तेन नागपाशेन हनूमानापादमस्तकं यावत्पन्नगैश्चंदनद्रुम इवावेष्ट्यत. अथ हनूमान्नागपाशलोटने समर्थोऽपि कौतुकात्तथैवास्थात् यथेंद्रजिता बद्ध इति. ततो हृष्टेनेंद्रजिता स उपरावणं निन्ये. तत्र रावणसदसि सर्वै राक्षसैर्निरीक्ष्य स उपलक्षितः, तावता रावणेनोक्तं भो दुर्मते हनुमंस्त्वयेदं किं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृतं? आजन्म मम सेवको भूत्वांते किं रामलक्ष्मणौ समाश्रितः? तौ च तपस्विनौ वनवासिनौ फलाहारौ मलिनौ मलिनांशुकौ अभिनवकिरातौ तुष्टौ तव कां श्रियं दास्यतः? हे मंदबुद्धे त्वं तद्वाचा किमिहागतः? येनेहायातमात्रोऽपि प्राणसंशयं प्राप्तोऽसि. नूनं तौ भूचारिणौ महादक्षौ, याभ्यां त्वमदः कार्यं कारितः, यतोंगारान् परहस्तेन कर्षयंति धूर्तकाः. भो कपे! पूर्वं त्वं मम सामंतः सेवकश्चाभूः, सांप्रतं त्वया रामदूतत्वमंगीकृतं. तेन दूतत्वाच्च त्वमवध्योऽसि. ततो हनूमान् रावणमुवाच, भो दशाननाहं तव सेवकः कदासं? कदा च तव सेवा मया कृता? अहं तव स्वामीति कथयंस्त्वं किं न लज्जसे? त्वं मम स्वामी कदाभूः? एकदा मत्पित्रा पवनंजयेन तव सेवकः खरनामा विद्याधरो रावणान्मोचितस्तदपि किं त्वया विस्मृतं? अहमपि तव साहाय्यार्थं त्वयाहूतः पुराभ्यागमं, वरुणपुत्रेभ्यश्च त्वामरक्षं तदपि त्वया किं विस्मृतं? हे रावण! अतःप्रभृति त्वं मम साहाय्यस्य योग्यो न, यतः पापतत्परस्त्वं परस्त्रीसंगान्नष्टोऽसि, अद्यापि तव किमपि गतं नास्ति, सीतां मुंच? अहं तव हितं वच्मि, यतः—रूसउ वा परो मा वा । विसं वा परियत्तउ ॥ भासियव्वा हिया भासा । सपक्खगुणकारिआ ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं हनूमता बहुबहु प्रोच्यमानोऽपि स सीतां नामुंचत्. पुनर्हनूमान् रावणंप्रत्युवाच—इमौ दाशरथी राम—लक्ष्मणौ नतवत्सलौ ॥ पुरंदरौ द्विडडीणां । विश्वविख्यातविक्रमौ ॥ १ ॥ आज्ञापयति मे स्वामी । मन्मुखात्त्वां दशानन ॥ उत्तमानां स्वभावोऽय—मशाठ्यं सर्वकर्मसु ॥ २ ॥ कुलोचितं त्वया रक्षः । कृतं सीतापहारतः ॥ मायाविनो राक्षसा य—च्छूरत्वे कातराः श्रुतिः ॥३॥ पौरुषं त्वयि नास्त्येव । अस्ति चेत्तन्न सांप्रतं ॥ श्वापि गृह्णाति भोज्यं हि । निःस्वामिनि गृहे स्थितं ॥ ४ ॥ महत्यप्यपराधे हि । ते क्षमां तौ करिष्यतः ॥ सीतां समर्प्य स क्षाम्य—स्त्वया जीवितकांक्षिणा ॥ ५ ॥ रावण उवाच—राज्यान्निष्कासितौ राम—लक्ष्मणौ वनचारिणौ ॥ विद्याहीनौ मनुष्यौ तौ । वर्णितौ दूत सुनृतौ ॥ ६ ॥ एतद्रावणोक्तं श्रुत्वा पुनर्हनूमान् जगाद, भो रावण! सीतां समर्प्य रामपादयोश्च पतित्वा त्वं स्वं जीवितं रक्षस्व? वृथा मा म्रियस्व? एवमुक्तियुक्त्या बोधितोऽपि रावणो नाबुध्यत्, किंतु न वरं दशाननः कुपितो भृकुटीभीषणो निजोष्टं दशन्नेवमन्यधात्, भो हनूमन्! त्वं मदरातीनाश्रितोऽसि, पुनर्मां तिरस्करोषि, मदरातींश्च प्रशंससि, तन्नूनं मर्तुकामोऽसि, परं दूतत्वादवध्योऽसि, तथापि विडंब्य मुच्यसे, इति कथयित्वा सेवनाकार्य प्रोक्तं भो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सेवकाः! एनं हनूमंतं रासभे समारोप्य नगरे त्रिकचतुष्कचत्वरादिषु चोद्भ्राम्य मुंचतेति श्रुत्वा क्रुद्धो मारुतिर्नागपाशानत्रोटयत्, यतो नलिनीनालैर्बद्धः कुंजरः कियत्तिष्ठति? तत उत्पत्य हनूमांस्तडिद्दंड इव राक्षसप्रज्ञो रावणस्य किरीटं पादघातेन कणशश्चूर्णयामास. रावण ऊचे—हन्यतां गृह्यतां चैष । इति जल्पति रावणे ॥ अनाथामिव सोऽभांक्षी—त्तत्पुरीं पाददर्दुरैः ॥ १ ॥ क्रीडां कृत्वैवमुत्पत्य । सुपर्ण इव पावनिः ॥ राममेत्यानमत्सीता—चूडारत्नं समर्पयत ॥ २ ॥ सीताचूडामणिं तं तु । साक्षात्सीतामिवागतां ॥ स्वांके चारोपयामास । स्पृशन् रामो मुहुर्मुहुः ॥ ३ ॥ ततो दाशरथिना स हनूमानालिंग्योपवेश्य चोचे, हे वत्स! हे बांधव! इतो गत्वा त्वया किं कृतं? इति श्रीरामेण पृष्टेन हनूमता यथा कृतं तथा सर्वं प्रोक्तं श्रीरामपुरतः, तदेवाह—

यथा गतो, यथा आशाली गता, यथा लंकासुंदरी परिणीता, यथा बिभीषणगृहे गतः, यथा सीतांतिके गतः, यथा मुद्रिका दत्ता, यथा सीतया चूडारत्नं दत्तं, यथा मंदोदर्या सीतांप्रति प्रोक्तं, यथा सीतया प्रत्युत्तरं दत्तं, यथा सीताशिक्षां लात्वा वलितः, यथा देवरमणोद्यानमुन्मूलितं, यथा वनपालका राक्षसा हताः, यथेंद्रजिद्भ्राता हतः, यथेंद्रजिता बद्धो रावणाग्रे च नीतः, यथा रावणंप्र-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ति सीतां मुंचेत्याद्युक्तं, यथा रावणेनोक्तं, यथा रावणेनोक्तमेनं हनुमंतं रासभे समारोप्य मुच्यतां, यथा तत् श्रुत्वा कोपोत्पत्तिः, यथा नागपाशान् छित्वा रावणमस्तके पादघातेन तन्मुकुटः कणशः कृतः, यथा लंका दग्धा, यथा च स्वयं रामसमीपे समागतस्तथा तेनांजनेयेन सत्ये निवेदिते राम उवाच—त्रिदशैरपि दुर्भेद्या । लंकानाममहापुरी ॥ कथं वीर त्वया दग्धा । विद्यमाने दशानने ॥ १ ॥ हनुमानाह—प्रतापेन तु रामस्य । देव्या निःश्वसितेन च ॥ पूर्वं दग्धा तु सा लंका । पश्चाद्वह्निवशं गता ॥ १ ॥ शाखामृगस्य शाखायाः । शाखां गंतुं पराक्रमः ॥ यत्पुनस्तीर्यतेंभोधिः । प्रभावः प्राभवो हि सः ॥ ३ ॥ इत्यादितदुक्तां वार्तां श्रुत्वा हर्षितः श्रीरामचंद्रो हनूमंतं स्वभ्रातृवन्मेने. ॥ इति श्रीतपागच्छे पंडितश्रीदेवविजयविरचिते श्रीरामचरित्रे सीताप्रवृत्त्यानयनो नाम षष्ठः सर्गः समाप्तः ॥ श्रीरस्तु ॥

---

॥ अथ सप्तमः सर्गः प्रारभ्यते ॥

अथ रामचंद्रः सलक्ष्मणः सुग्रीवाद्यैः सुभटैः परिवृतो गगनाध्वना लंकाविजययात्रायै प्रतस्थे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शुभमुहूर्ते शुभलग्ने शुभशकुने शुभमंगले च. मंगलान्यमूनि यथा—कन्यागोशंखकुंभा दधि मधु कुसुमं पावको दीप्यमानो । यानं वा गोप्रयुक्तं वररथतुरगाश्चापि भद्रातिभद्राः ॥ उत्खाता चैव भूमिर्जलचरमिथुनं सिद्धमन्नं मुनिर्वा । वेश्यास्त्री मद्यमांसं हितमपि वचनं मंगलं प्रस्थितानां ॥ १ ॥ श्रीरामचंद्रस्य मार्गे गच्छतो बहूनि मंगलानि शुभसूचकानि च बहूनि शकुनानि संजातानि जयसूचकानि. तैः शकुनैः प्रेर्यमाणः श्रीरामः सुग्रीवाद्यैः परिवृतोऽग्रे प्रतस्थे. तेषां नामानि यथा—भामंडलो नलो नीलो । माहेंद्रः पावनंजयः ॥ विराधश्च सुषेणश्च । जववानंगदोऽपि च ॥ १ ॥ भटा विद्याधराधीशाः । कोटिशोऽन्येऽपि तत्क्षणं ॥ चेलू रामं समावृत्य । स्वसैन्यैश्छन्नदिङ्मुखाः ॥ ॥ २ ॥ विद्याधैराहतानि । यात्रातूर्याण्यनेकशः ॥ नादैरत्यंतगंभीरै—र्बिभरांचक्रुरंबरं ॥ ३ ॥ विमानैः स्यंदनैरश्वै—र्गजैरन्यैश्च वाहनैः ॥ खे जग्मुः खेचराः स्वामि—कार्यसिद्धिविधित्सया ॥ ४ ॥ एवं सकलसैन्यपरिवृतो निःस्वाननादैः पूरितदिगंतरः श्रीरामचंद्रः सलक्ष्मणो गगनाध्वना गच्छन् वेलंधरमहीधरदेशस्य वेलंधरपुरं प्राप, तत्र वेलंधरपुरे समुद्रसेतुनामानौ समुद्रवद्दुर्धरौ राजानौ वर्तेते, तौ द्वौ राजानावुद्धतौ मदोन्मत्तौ च रामाग्रसैन्येन सह योध्धुमारेभाते, तदा महाभुजो नल·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वानरः समुद्रं राक्षसमबध्नात्, तथा नीलवानरः सेतुं राक्षसमबध्नात्. तौ च द्वौ सेतुसमुद्रौ बध्ध्वा नलनीलौ कपी रामसेवकावुपराममनैषातां, काकुस्थस्तौ द्वौ राजानौ समुद्रसेतुनामानौ तथैव स्वराज्ये स्थापयामास, यतो महांतो हि निश्चितं कृपालवो भवंति. ततः समुद्रराजा रामानुजन्मने तिस्रो निजकन्यकाः प्रददौ, रामलक्ष्मणौ ससैन्यौ तां निशां तत्रैव स्थित्वा प्रभाते समुद्रसेतुसहितौ सुवेलां राजधानीं क्षणेनासादयामासतुः, तत्रैव सुवेलाभिधं राजानं जित्वा रामस्तत्रैकां निशामुवास. ततोऽपि भूयः प्रभातसमयेऽग्रे चचाल.

अथ क्रमेण मार्गे गगने चलन्नुपलंकं हंसद्वीपं स जगाम, तत्रापि हंसरथं नृपं जित्वा श्रीरामचंद्रः कृतावासस्तत्रैव तस्थौ, अथ काकुस्थ आसन्ने लंका क्रोशमुपेयाय, रावणस्य सामंता युद्धाय संनह्यंतिस्म, तेषां नामान्यमूनि—हस्तप्रहस्तमारीचिसारणनकुलपूरणाभिचंद्राद्याः सहस्रशः, रावणोऽपि रणतूर्याण्यवादयद्यथा—रावणो रणतूर्याणि । दारुणान्यथ कोटिशः ॥ किंकरैस्ताडयामास । द्विषत्ताडनपंडितः ॥ १ ॥ तदा रावणसमीपे बिभीषण आगत्य रावणं नत्वा बभाषे, हे बांधव ! क्षणं प्रसन्नीभूय मम शुभोदर्कवचः शृणु? त्वया पूर्वमविमृश्य कृतं, यत्परदाराहरणं कृतं, परदाराह-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रणेन चात्मीयं कुलं लज्जितं. अथ निजभार्यां समानेतुं काकुत्स्थः समायातः, अस्येदमेव चाति· थ्यं, यदेतस्मै रामचंद्राय सीतासमर्पणं कुरु? यदि न दास्यसि तथाप्यसौ रामो निजपत्नीं सीतां बलात्कारेणापि स्वयमेव हरिष्यति, सीतया सह तव राज्यं कुलं चापि हरिष्यति, पुनर्बिभीषणो ब· भाषे हे बांधव! रामलक्ष्मणौ तु दूरे आस्तां, तस्यैकेन सेवकेन पत्तिमात्रेण हनूमतेति कृतं, य· था—लंका दग्धा वनं भग्नं । राक्षसाः प्रलयं गताः ॥ यत्कृतं रामदूतेन । स रामः किं करिष्यति ॥ १ ॥ इंद्रश्रियोऽधिका श्रीस्ते । तां सीताकारणेन मा ॥ परिहार्षीर्भवेदेव—मुभयभ्रष्टता तव ॥ ॥ २ ॥ अथेंद्रजिदेवमुवाच हे बिभीषण! त्वयाजन्मभीरुणा तातस्य कुलं दूषितं, अतस्त्वं तातस्य सोदरो नासि, इंद्रस्यापि विजेतारं सर्वसंपन्नेतारमेवंविधं मत्तातमजानन् रे मूर्ख त्वं मुमूर्षसि? पुरा· प्यनृतभाषिणा त्वया मत्तातश्छलितः, यथायोध्यां गत्वा प्रत्यागत्योक्तं मया दशरथो हत इति. परं न कोऽपि हतः, पश्चादागत्य मत्तातपुरतश्चोक्तं मया द्वावपि हतौ. एवमसत्यं जल्पन् किं त्वं न ल· ज्जसे, यथा—

इहायातं दाशरथिं । तातादक्षितुमिच्छसि ॥ दर्शयन् भयमुत्पाद्य । भूचरेभ्योऽपि निस्त्रप ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तन्मन्ये रामगृह्योऽसि । मंत्रेऽप्यधिकरोषि न ॥ आप्तेन मंत्रिणा मंत्रः । शुभोदर्को हि भूभुजां ॥ ॥ २ ॥ तत् श्रुत्वा भृशं कुपितो बिभीषण इंद्रजितमेवमुवाच, रे पुत्ररूपेण शत्रो! रे कुलपांशन! तव पितृवत्त्वमपि कामांध इव दृश्यसे, रे मुग्ध त्वं किं वेत्सि? एवमिंद्रजितं निर्भत्स्य भ्रातरंप्रति स प्राह, हे राजन्! हे बांधव! अनेन तव पुत्रेण त्वच्चरित्रेण च त्वं महासंकटे पतिष्यसि. एतद्वचः श्रुत्वा रावणोऽप्यधिकं क्रुद्धो भीषणं खड्गमाकृष्य बिभीषणं हंतुमुदस्थात्. बिभीषणोऽपि भृकुटीभीषणः क्रोधारुणलोचन आयसं स्तंभमुत्पाट्य रावणंप्रति योध्धुमुत्तस्थौ. तावत्कुंभकर्णेंद्रजिद्भ्यामंतरा पतित्वा युद्धान्निषिध्य तौ स्वं स्वं स्थानं नीतौ. क्रुद्धो रावणश्च बिभीषणं लंकातस्तिरस्कारपूर्वकं निष्काशयामास, यथा—अरे निर्याहि मत्पुर्या । वैरिरूपोऽसि त्वं मम ॥ इत्युक्ते रावणेनागा—द्रामान्यर्णे बिभीषणः ॥ १ ॥ रक्षोविद्याधराणां चा—क्षौहिण्यस्त्रिंशदुत्कटाः ॥ हित्वा लंकाधिपं सद्यो—ऽप्यनुजग्मुर्बिभीषणं ॥ २ ॥

अथाक्षौहिणीमानं यथा—एकैकरथा त्र्यश्वा । पंक्तिः पंचपदातिका ॥ सेना सेनामुखं गुल्मो । वाहिनी पृतना चमूः ॥ १ ॥ अनीकिनी तथैव स्या—दिभाद्यैस्त्रिगुणैः क्रमात ॥ दशानी-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किन्योऽक्षौहिणी । मानमेवं हि वर्णितं ॥ ४ ॥ एवंविधाक्षौहिणीपरिवृतं बिभीषणमायातं वीक्ष्य सुग्रीवाद्या विद्याधराश्चुक्षुभुः, रामंप्रत्यूचुश्च हे स्वामिन्! शाकिनीनामिव रक्षसां विश्वासो न कर्तव्यः, यतः—न विश्वसेत्पूर्वविरोधितस्य । शत्रोश्च मित्रत्वमुपागतस्य ॥ दग्धा गुहा पश्य उलूकपूर्णा । काकप्रकीर्णेन हुताशनेन ॥ १ ॥ पुनः सुग्रीवो राममुवाच हे स्वामिन् यद्यप्याजन्ममायिनो राक्षसाः प्रकृत्या क्रूराः स्युस्तथाप्यनुरूपास्य बिभीषणस्य भक्तिः कार्या. तस्मिन् समये बिभीषणस्वरूपज्ञो धर्मात्मा विशालाभिधः खेचरो बिभीषणं रामस्य पार्श्वे समानयत. रामोऽपि पादयोः क्षिप्तमूर्धानं बिभीषणं संभ्रमात्परिरेभे. बिभीषण उवाच हे राजेंद्र श्रीरामचंद्र! अहं दुर्नयमग्रजं हित्वा त्वच्छरणमागतोऽस्मि, अतस्त्वं सुग्रीववन्मामपि सर्वं कार्यं समादिश? अहं तव सेवकोऽस्मि, श्रीरामेणोक्तं भो बिभीषण! भो लंकेश्वर! मया तव लंकाराज्यं दत्तं, तेनोक्तं महाप्रसाद इति. यतो महात्मसु प्रणिपातः क्वापि मुधा न भवति.

अथ बिभीषणो रामाग्रे कथयामास हे स्वामिन्! मया रावणाय बहूक्तं यथा सीतां मुंच? परमेष कामग्रस्तो नामुंचत्सीतां, नवरं प्रत्युत मां मारणाय धावितः, यतो बहूक्तोऽपि दुर्जनः किं स्वज-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नायते? बहूक्तोऽपि पापः किं पुण्यमाचरति? दुग्धधौतोऽपि काकः किं हंसायते? सुपुष्टोऽपि श्वानः किं सिंहायते? सुष्टूपचितोऽपि खरः किमश्वायते? सुघटितोऽपि काचः किं वैडूर्यमणिलीलां वहति? इक्षुरसैः सिक्तोऽपि निंबः किं डाक्षाफलानि सूते? सम्यगुत्तेजितापि रीरी किं सुवर्णछायां बिभर्ति? सुसंस्कृता अपि यवाः किं शालिलीलामाकलयंति? सुपूजितोऽपि खलः किं सज्जनायते? एवं बहुकथितोऽपि रावणः किं सुजनभावं भजते? इत्याद्यैर्मिष्टवाक्यैः सत्योक्तिभिः श्रीरामचंद्रं बिभीषणस्तुतोष. श्रीरामोऽपि बिभीषणं तथा सुग्रीवं भ्रातृवद्वहु मेने. क्रमेण रामलक्ष्मणौ बिभीषणसुग्रीवाद्यैः परिवृतौ गगनाध्वना गच्छंतौ हंसद्वीपे समागतौ. तत्र द्वीपेऽष्टौ दिनान्यतिवाह्य सर्वं सैन्यं च सज्जीकृत्य निःस्वाननिनादैर्दिशो बधिरयन् विद्याधरैः परिवृतः श्रीरामो लंकांप्रत्यचालीत्. क्रमेण रामः ससैन्यो रणसज्जः स्थेमपर्वते गत्वा विंशतियोजनीं पृथ्वीमाछाद्यावतस्थे. तदा दशकंधरसैनिका हस्तप्रहस्ताद्या राक्षसाः संग्रामसज्जा बभूवुः, यथा—

केचिन्मत्तभसंवाह्य—रपरे वाहवाहनैः ॥ शार्दूलवाह्यैरन्ये तु । खरवाह्यै रथैः परे ॥ १ ॥ कुबेरवाहनैः केचि—न्मेषैः केचित्तु वह्निवत् ॥ यमवन्महिषैः केचि—त्केचिद्देवतवच्छ्यैः ॥ २ ॥ वि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मानैर्देववत्केचि—त्प्रह्वाः समरकर्मणि ॥ उत्पत्य युगपद्वीराः । परिवव्रुर्दशाननं ॥ ३ ॥ त्रिभिर्विशे-
षकं ॥ रोषारुणाक्षः सन्नह्य । विविधायुधपूरितं ॥ अध्यास्त स्यंदनं रत्न—श्रवाः प्रथमनंदनः ॥४॥
कुंभकर्णः शूलपाणि—र्दंडपाणिरिवापरः ॥ उपेत्य दशकंठस्य । समभूत्पारिपार्श्विकः ॥ ५ ॥ तथें-
द्रजिन्मेघवाहनौ रावणस्यापरौ दोर्दंडाविवाग्रे तस्थतुः. एवमन्येऽपि रावणकुंभकर्णयोस्तनया दोष्मं-
तः कोटिशः शुकसारणमारीचिसुंदरादयः संग्रामशूरा अन्येयुः. अक्षौहिणीनां सहस्रैः परिवृतो लं-
कापुर्या निर्गत्य स्थेमपर्वताभिमुखं दशाननः प्रचचाल. कथंभूता रावणसैन्यकाः? यथा—शार्दूल-
केतवः केचित् । केचिच्छरभकेतवः ॥ व्याघ्रोरुकेतवः केचित् । केचित्करटिकेतवः ॥ १ ॥ मयूरकेत-
वः केचित । केचित्पन्नगकेतवः ॥ मार्जारकेतवः केचित् । केचित्कुर्कुटकेतवः ॥ २ ॥ कोदंडपाणयः
केचि—त्केचिन्निस्त्रिंशपाणयः ॥ मुषंढीपाणयः केचि—त्केचिन्मुद्गरपाणयः ॥ ३ ॥ त्रिशूलपाणयः
केचि—त्केचित्परिघपाणयः ॥ कुठारपाणयः केचि—त्केचित्तु प्रासपाणयः ॥ ४ ॥ विपक्षवीरान्
वृण्वंतो । नामग्राहं मुहुर्मुहुः ॥ दशास्यवीराश्चतुरा । विचेरू रणकर्मणि ॥ ५ ॥ पंचभिः कुलकं ॥
वैताढ्यस्येव सैन्यस्य । प्रथिम्नाभाय मेदिनीं ॥ पंचाशद्योचनान्यस्था—द्रावणो रणकर्मणि ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अष्टौ कोट्यश्चतुःसप्ततिर्लक्षाणि अशीतिसहस्राणि रथानां, हस्तिनामप्येवं संख्या ज्ञेया. षड्विंशतिकोट्यश्चतुर्विंशतिर्लक्षाश्चत्वारिंशत्सहस्रास्तुरंगमाः. त्रिचत्वारिंशत्कोट्यश्चतुःसप्ततिर्लक्षाश्च पदातयः, इति रावणचतुरंगबलसंख्या. यतः—अक्कोहिणीसहस्सं । हवंति चत्तारि बहुजिणुद्दिठा ॥ रावणबलस्स एवं । मगहवइ होइ परिमाणं ॥ १ ॥ रामसैन्यपरिमाणं यथा—

अक्कोहिणीसहस्सं । इक्कं चिअ वानराण सव्वाणं ॥ भामंडलेण सहिअं । भणिअं चतुरंगसिन्नस्स ॥ १ ॥ स्वनायकान् प्रशंसंतो । निंदंतः परनायकान् ॥ परस्परं चाक्षिपंतः । कथयंतो मिथोऽभिधां ॥ २ ॥ अस्त्राण्यस्त्रैर्वादयंतः । करास्फोटपुरस्सरं ॥ रामरावणयोः सैन्या । मिमिलुः कांस्यतालवत् ॥ ३ ॥ युग्मं ॥ गच्छ गच्छ? तिष्ट तिष्ट? इति ब्रुवाणाः सुभटा भृशं शुशुभुः. अहो वासुदेवप्रतिवासुदेवयोः सहजं वैरं, यथा नकुलसर्पयोः, जलवैश्वानरयोः स्वजनदुर्जनयोः, देवदैत्ययोः. सारमेयमार्जारयोः. सिंहगजयोः, व्याघ्रगावोः, काकघूकयोः, पंडितमूर्खयोः, पतिव्रतास्वैरिण्योश्च तथा लक्ष्मणरावणयोः सहजं वैरमिति, अतश्च तौ युयुधाते, यथा—खिन्नैर्मिथो घातभयै—र्वेगात्कृत्तैश्च मौलिभिः ॥ जज्वलद्भिरनूनाना—केतुराहेव खं तदा ॥ १ ॥ सुभटा मौक्तैर्घातै—र्लोठ·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यंनो द्विपान् मुहुः ॥ चंडकंदुकिनीं क्रीडां । तन्वाना इव रेजिरे ॥ २ ॥ कुठारघातैराच्छिन्ना । भ-
टानामपरैर्भटैः ॥ पंचशाखाः पतंतिस्म । द्रुमशाखा इवाग्नितः ॥ ३ ॥ वीराः शिरांसि वीराणां । छि-
त्वा भूमौ प्रचिक्षिपुः ॥ बुभुक्षिताय कीनाशा—योचितान् कवलानिव ॥ ४ ॥ रक्षसां वानराणां च
। युद्धे तस्मिन् महौजसा ॥ दायादानां धनमिव । जयः साध्योऽभवच्चिरं ॥ ५ ॥ चिरं प्रवर्तमाने च
। समरे तत्र वानरैः ॥ बभंजि राक्षसबलं । गजेंद्रैरिव काननं ॥ ६ ॥ एवं तयोः संग्रामे राक्षसब-
ले भग्ने रावणसुभटौ हस्तप्रहस्तनामानौ रावणजयकांक्षिणौ वानरैः सह योद्धुं समुद्यतौ. अथ वा-
नरसैन्याद्रामजयकांक्षिणौ नलनीलौ महाकपी संमुखीनावुदस्थातां, हस्तो राक्षसो नलवानरेण स-
ह योद्धुमुपतस्थे. प्रहस्तश्च नीलवानरेण सह योद्धुमुपतस्थे. तौ द्वावपि रथिनौ, द्वावपि शस्त्रव्या-
पृतकरौ. द्वावपि धन्विनावभूतां. क्षणं नले क्षणं हस्ते—ऽभूतां जयपराजयौ ॥ तद्वृत्तांतरमज्ञायि ।
न तत्र निपुणैरपि ॥ १ ॥ एवंविधं युद्धं कुर्वाणौ नलहस्तौ परस्परं युद्धावसरं लब्ध्वा नलोऽविह-
स्तो हस्तशिरः क्रुद्धा क्षुरप्रेणाच्छिदत्, तथा प्रहस्तशिरो नीलोऽप्यच्छिदत्. तदा नलनीलयोरुपरि दे-
वैः कृता पुष्पवृष्टिरभूत्, वानरसैन्ये च जयजयारवो जातः, रावणसैन्ये च हस्तप्रहस्तयोर्निधनं गत-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योः कलकलो जातः, अन्येऽपि रावणसैनिका जीवितनिरपेक्षा मारीचिसिंहजघनस्वयंभूसारणशुक· चंद्रार्कोद्दामविभत्सगंभीरसिंहमदनांकुरसंतापप्रीतिकरादयो राक्षससैनिका रावणपुत्राश्चान्ये राक्षसैः प· रिवृता रामसैन्यं दुढौकिरे, रामसैनिकाः कपयोऽपि मरणनिरपेक्षा रावणसैनिकै राक्षसैः सह युयु· धिरे. यतो लोकोक्तिः—

जिते च लभ्यते लक्ष्मी—र्मृते चापि सुरांगना ॥ क्षणविध्वंसिनी काया । का चिंता मरणे रणे ॥ १ ॥ एवं तौ रावणरामसैनिकौ परस्परममर्षवंतौ युयुधाते. सिंहजघननामा राक्षसः प्रथितं वानरसैन्यं जघान, तावद्दिवाकरस्तयोः सैन्ययोर्युद्धं द्रष्टुमशक्तोऽस्तं ययौ. उभयोः सैनिकाः स्वान् स्वान् हतान् रणभूम्यां शोधयामासुः. विभातायां विभावर्यां । प्रत्यर्कं दानवा इव ॥ इति रामबलं रक्षो—योधा योद्धुं दुढौकिरे ॥ १ ॥ मध्ये सैन्ये दशास्योऽभू—न्मध्ये मेरुरिवाचलः ॥ गजरथो रथारूढ—श्चचाल रथकर्मणि ॥ २ ॥ बिभ्राणो विविधान्यस्त्रा—ण्यंतकादपि भीषणः ॥ तत्कालारु· णया शत्रून् । दृशापि हि हनन्निव ॥ ३ ॥ एवंविधो रावणः स्वां सेनामपश्यत, अरींश्च तृणवन्म· न्यमानो रणावनिमगात, राघवसेना सज्जिता सती दिवि देवैर्वीक्ष्यमाणा समरायोपतस्थे. तयो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रामरावणयोः संग्रामे लग्ने समरांगणमेवंविधमभूद्यथा—सनदीकमिव क्कापि । रक्तवारिभिरुद्भूतैः ॥ उत्पर्वतमिव क्कापि । पतितैः करिकुंजरैः ॥ १ ॥ क्कचिच्चोन्मकरमिव । मकरास्यैरथच्युतैः ॥ उद्दंतमिव च क्कापि । भटभग्नैर्महारथैः ॥ २ ॥ उत्तांभवं कबंधैश्च । नृत्यस्थानमिव क्कचित ॥ अजायत क्षणेनापि । समराजिरभूतलं ॥ ३ ॥ त्रिभिर्विशेषकं ॥ एवंविधे तयोः संग्रामे जायमाने स्वसैन्यं भग्नं वीक्ष्य स्वयं रावणो हुंकारप्रेरितै राक्षसैः परिवृतः संग्रामाय सज्जो बभूव, सज्जीभूय च स्वयं युयुधे, रावणे युध्यमाने वानरसैन्यं तत्क्षणादेव नष्टं सूर्येंधकारमिव.

अथ सुग्रीवः क्रोधाद्दुद्ग्रीवः क्रोधारुणलोचनः पुनर्वानरसैन्यं सज्जीकृत्य हनूमता सहितो राक्षसैः सह युयुधे, तस्मिन् समये हनूमान् सुग्रीवंप्रत्यूचे, हे सुग्रीवराजेंद्र! त्वमिहैव तिष्ट? मम पराक्रमं च पश्येति सुग्रीवं निषिध्य हनूमान् रावणसैन्यैः सह स्वयं युयुधे. हनूमान् राक्षसानीक—मनेकानीकदुर्दमं ॥ दुर्गाहमप्यगाहिष्ट । महाब्धिमिव मंदरः ॥ १ ॥ हनूमानमेवंविधं वीक्ष्य माली राक्षस उभयपक्षतूणीरो गरुत्मानिव खे उत्पतन् हनूमंतं हननाय दधावे, हनूमन्मालिनौ वीरौ । धनुष्टंकारकारिणौ ॥ पुच्छाच्छोटकरौ सिंहा—विवोद्दामौ विरेजतुः ॥ १ ॥ मालिहनूमंतौ परस्परमस्त्रैः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रजघ्नाते, क्षिप्तानि शस्त्राणि च भिनत्तः. एवं चिरं युध्ध्वा वीर्यशालिनं मालिनं निरस्त्रीकृत्य हनूमानूचे हे जरद्वृद्ध! अथ त्वया हतेन किमिति ब्रुवाणं हनूमंतं वज्रोदरनामा राक्षसोऽवोचत, रेरे पाप हनूमन्नद्य त्वं म्रियसे, नष्टोऽसि, एहि मया सह युध्यस्व? मारुतिस्तद्वचसा क्रुद्धो वज्रोदरं हक्कयन् बाणासारैराच्छादयामास, केचिद्वदंति अहो वज्रोदरो बलवान् यो हनूमंतं युध्यति, केचिद्वदंत्यहो हनूमान् वीरो यो वज्रोदरंप्रति युध्यति. एवंविधां वज्रोदरप्रशंसामसहिष्णुर्हनूमान् मानपर्वतश्चिलाण्यस्त्राणि वर्षन्नुत्पातमेघवद्वज्रोदरमवधीत्. हतं वज्रोदरं वीक्ष्य जंबूमालिनामा रावणपुत्रो हनुमंतमाह्वास्त. उभावपि महामल्ला—वन्योन्यवधकांक्षिणौ ॥ युयुधाते चिरं बाणैः । पन्नगैर्मांत्रिकाविव ॥ १ ॥ अथ क्रुद्धो हनूमांश्छलज्ञश्छलं लब्ध्वा गरीयसा मुद्गरेण जंबूमालिनं रावणपुत्रं शिरसि ताडयामास, तेन मुद्गरेण हतो जंबूमाली भूमौ निपपात. तत्कालं पतितमात्र एव च मृतः. जंबूमालिनं मृतं वीक्ष्य रावणपुत्रास्तथा सुभटाश्च हनूमंतं वेष्टयामासुरंतर्वणं दव इव, वडवानलं समुद्र इव, मृगा मृगारिमिव. हनूमांश्च तैः सह युध्यमानो रक्षांसि क्षणेनाभांक्षीत्, यथा—दोष्णोः केऽपि मुखे केऽपि । केऽप्यंह्रौ हृदि केऽपि च ॥ कुक्षौ केऽपि शरैस्तीक्ष्णै—र्जघ्निरे ते हनूमता ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तावता कुंभकर्णः स्वबलं भग्नं दृष्ट्वेशानेंद्र इव शूलपाणिः स्वयं योध्धुमधावत, यथा—कानप्यंह्रिप्रहारेण । मुष्टिघातेन कानपि ॥ कांश्चित्कर्परघातेन । तलघातेन कांश्चन ॥ १ ॥ कांश्चिन्मुद्गरघातेन । शूलघातेन कानपि ॥ कानप्यन्योन्यघातेन । कुंभकर्णोऽवधीत्कपीन् ॥ २ ॥ एवं कपिहननतत्परं तमालोक्य कपीश्वरः सुग्रीवः कुंभकर्णं हंतुं दधावे. ततः सुग्रीवो भामंडलो दधिमुखो माहेंद्रः कुमुदोंगदश्चेत्यादयो वानराधिपा दशाननानुजं कुंभकर्णं पंचाननं व्याधा इवारुधन्, ते वानरोत्तमाश्च चित्राण्यस्त्राण्यवर्षंत. तद् दृष्ट्वा कुंभकर्णस्तेषु वानरेष्वमोघं स्वापनास्त्र मुमोच. समकालं निद्रायमाणं स्वसैन्यं विलोक्य वानरपतिः प्रबोधिनीं महाविद्यां सस्मार. तया च सर्वेऽपि वानरभटा जागरिता इवोत्थिता एवमवोचन्—

अरे क्व कुंभकर्णोऽस्ती—त्युच्चैस्तुमुलकारिणः ॥ उत्तस्थुर्वानरभटाः । खगा इव निशात्यये ॥ ॥ १ ॥ ते वानरभटाः कुंभकर्णमाकृष्टकार्मुकमुपाद्रवन्, तथा सुग्रीवः कुंभकर्णसारथिं रथं च गदया दलयामास. अथ भूमिस्थः कुंभकर्णो वामेतरबाहुना धृतमुद्गर एकशृंगो गिरिरिव सुग्रीवायाभ्यधावत. एवं कुंभकर्णस्य युद्धार्थं धावितस्य मार्गे भूयांसः कपयः पेतुर्यथा करिस्पर्शेन वृक्षाः. स कुंभ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्णः प्लवंगमैरस्खलितो नदीवेग इव गच्छन् सुग्रीवरथं मुद्गरेणाहत्याचूर्णयत्. सुग्रीवोऽप्येकां महीयसीं शिलां खे समुत्पाट्य कुंभकर्णाय मुमोच, कुंभकर्णोऽपि मुद्गरेण तां शिलां कणशोऽकरोत्. पुनः सुग्रीवः कुंभकर्णाय तत्तडितिकुर्वाणमुत्कटं तडिद्दंडास्त्रममुंचत. तस्मै चंडाय तडिद्दंडाय कुंभकर्णोऽनेकशस्त्राणि प्रचिक्षेप, परं तानि शस्त्राणि तडिद्दंडे मोघीभूतान्यभव्ये गुरुवचनानीव. तेन घातेन च कल्पांते पर्वत इवोच्चैः कुंभकर्णः पपात. कुंभकर्णे च मूर्छिते दशाननः स्वयमचालीत्, तावतेंद्रजिन्नत्वा रावणंप्रत्येवमुवाच, हे स्वामिंस्तव पुरतो रणे यमोऽपि न समर्थः, नापि वरुणो नापि कुबेरो न वा हरिः समर्थः, तर्हि केऽमी वराकाः काका इव वानराः? हे देव ततस्त्वं तिष्ट? अहं गत्वा वानरान् शिक्षयामि, अथवा सर्वान् हनिष्यामीति तं निषिध्येंद्रजित्स्वयं कपिसेनायां प्रविवेश, कपींश्च हक्कयामास यथा रेरे वानराः! युध्यंतां? अहं रावणपुत्र इंद्रजिन्नामाऽयुध्यमानान्नो हन्मि, क्व स मारुतिः? क्व च स सुग्रीवः? अथवा ताभ्यां सृतं, क्व स्तस्तौ रामसौमित्री? इत्युक्त्वंतमिंद्रजितं वीक्ष्य सुग्रीवो दशग्रीवनंदनंप्रति दधावे. भामंडलोऽपींद्रजितं । सुग्रीवो मेघवाहनं ॥ आयोधयितुमारेभे । शरभं शरभो यथा ॥ १ ॥ दिग्गजा इव चत्वार—श्चत्वारः सागरा इव ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आस्फालयंतः शुशुभिरे । ते त्रिलोकीभयंकराः ॥ २ ॥ आयसैर्दैवतैश्चास्त्रै—रयुध्यंत चिराय ते ॥ परं न कोऽपि केनापि । तेषां मध्यादजीयत ॥ ३ ॥

अथेंद्रजिन्मेघवाहनौ रावणपुत्रौ सुग्रीवभामंडलयोर्नागपाशास्त्रं मुमोचतुः, तेन नागपाशेन तौ द्वौ भामंडलकपीश्वरावनीश्वराविव बद्धौ. इतश्च लब्धसंज्ञेन । कुंभकर्णेन रोषनः ॥ गदया ताडितः पृथ्व्यां । मारुतिर्मूर्छितोऽपतत् ॥ १ ॥ ऊचे बिभीषणो रामं । स्वामिन्नेतौ हि ते बले ॥ बलीयांसौ सारभूता—वानने नयने इव ॥ २ ॥ पुनर्बिभीषणो रामंप्रत्यूचे हे स्वामिन् यावदेतौ भामंडलसुग्रीवौ बद्धाविंद्रजिन्मेघवाहनौ लंकां न नयतस्तावत्तौ मोचयामः, कुंभकर्णबद्धो हनूमानपि मोच्यः, यतो भामंडलसुग्रीवहनूमद्विरहितं सैन्यमवीरमेव जानीहि? यथा तावदावां तान्मोचयावः, एवं तयोर्ब्रुवतोरंगदः सुग्रीवपुत्रो गत्वा कुंभकर्णमाक्षिप्य युद्धकोविदो युयुधे. इतः कुंभकर्णेन क्रोधारुणलोचनेन गदया पूर्वं ताडितो हनूमान् क्षणेन लब्धसंज्ञः पंजराद्विहंगम इवोत्पत्य ययौ. तदा बिभीषणो भामंडलसुग्रीवमोचनायेंद्रजिन्मेघवाहनाभ्यां स्वयं योध्धुमधावत. पितृव्यं बिभीषणं संग्रामसज्जं दृष्ट्वेंद्रजिच्चिंतयति हाहानेन तातकल्पेन सह कथं योधव्यं? इतोऽपसरणं युक्तमिति वि·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चिंत्य तौ पाशबद्धौ भामंडलसुग्रीवौ मुक्त्वा तत्रैव तौ रावणपुत्रौ तस्थतुः, बिभीषणेन भामंडलसुग्रीवौ पन्नगपाशबद्धौ म्लानाननौ दृष्टौ, रामेणापि तौ तथा दृष्ट्वेति चिंतितमहो रावणपुत्रौ बलवंतौ, याभ्यां भामंडलसुग्रीवौ बद्धौ, ततो रावणः सपुत्रो जेतुं केनापि न शक्यते. ततो देवं स्मरामीति विचिंत्य रामः पूर्वप्रतिपन्नवरं महालोचननामानं येन पूर्वं रामपुरी निर्मिता तं सुपर्णामरपुंगवं स्मरतिस्म. सोऽपि स्मरणमात्रतस्तत्क्षणं समागतः, तेनागत्य किं कृतं? तदाह—श्रीरामचंद्राय सिंहनादाख्यां विद्यां तथा हलं मुशलं स्यंदनं च देवनिर्मितं ददौ, तथा लक्ष्मणाय गारुडीविद्यां गरुडध्वजं स्यंदनं, विद्युद्वदनां गदां रिपुनाशिनिं वारुणास्त्रविद्यां वायव्यास्त्रविद्यामन्यामपि च शस्त्रविद्यां ददौ. तथा छत्रचामरादुभयोरपि दत्वा पुनः स सुपर्णामरो लक्ष्मणवाहनीभूय गरुडरूपं च विधाय तत्पुरः स्थितः, तं गरुडं दृष्ट्वा भामंडलसुग्रीवयोः पन्नगपाशाः प्रणेशुः.

अथ गरुडवर्णनं यथा—आजानुतः कनकगौरमहोऽथ नाभेः । शंखांकुरैकधवलं च मनोज्ञरूपं ॥ आकंठतो नवदिवाकरकांतितुल्य—मामूर्धमंजननिभं गरुडस्वरूपं ॥ १ ॥ एवंविधं गरुडदेवं लक्ष्मणवाहनीभूतं दृष्ट्वा सर्वेऽपि सैनिका जहर्षुः, सकलेऽपि च रामसैन्ये जयजयारवो जज्ञे, र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षोबले च कलकलो जज्ञे, तस्मिन् समयेऽब्जिनीपतिरस्तं ययौ, प्रातर्द्वयोऽपि रामरावणयोः सैन्यानि सर्वाभिसारेण रणांगणमुपासरन् तेषां रामरावणसुभटानामिंद्रोपेंद्राणामिव महारणः प्रावर्तत, क्रुद्धै रक्षोभिर्वानराणां वरूथिनी मथ्यतेस्म, तस्मिन् समये भग्नप्रायां निजां चमूं प्रेक्ष्य सुग्रीवाद्या वानरेश्वरा राक्षससैन्ये विविशुर्मतंगजा सरसीव, तैः सुग्रीवाद्यै रावणसैन्यं विद्रुद्रुवे, तदा राक्षसबलं भग्नं वीक्ष्य रावणः क्रुद्धः स्वयं योध्धुं दधावे, रथचीत्कारैर्दिशो बधिरयन् रथप्रचारेण च मेदिनीं दारयन्निव वानरसैन्ये प्रससार, तस्य रावणस्य प्रसरतो वानरसैन्येषु सुग्रीवाद्याः कपीश्वरास्तत्पुरतः स्थातुं नेश्वराः, एवंविधं रावणं वीक्ष्य श्रीरामो युध्धसज्जो बभूव, अथ युद्धाय चलितं रामं निरीक्ष्य बिभीषणो बभाषे हे श्रीराम! पूर्वं तावद्रावणेन सहाहं योत्स्ये, इति रामं निवार्य स्वयं च गत्वा बिभीषणो रावणं रुरोध.

ततो रावणो बिभीषणं बभाषे रे बिभीषण! त्वं मम सहोदरो भूत्वा रामं किमाश्रितः? अन्यं जनं च किं सेवसे? एहि मम सेवां विधेहि? यथा ते राज्यं ददामि. किंच पश्यानेन रामेण त्वां हंतुकामेन मम मुखे आदौ त्वमेव क्षिप्तः, क्षुधितस्य मुखे कवलवत्. रामेणात्मरक्षणायेदं साधु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मंत्रितं, अतस्त्वं हृदये विचार्यैहि? अद्यापि किंचिद्गतं नास्ति, भ्रातृत्वात्त्वं मम वत्सलोऽसि. अतः पुनः पुनः कथ्यते. एह्येह्यावाभ्यामेकीभूयैतौ रामलक्ष्मणौ हन्येते, बिभीषण उवाच, हे रावण! रामस्त्वांप्रति क्रुद्धो यमराज इव स्वयमागच्छन् मया निषिद्धः, अहं च त्वां बोधयितुं युद्धव्याजादिहागमं, हे सहोदर रावणराजेंद्र! अद्यापि त्वं सीतां मुंच? प्रसन्नीभूय च मम वाक्यं कुरु? अद्यापि किंचिद्विनष्टं नास्ति, सकलेऽपि च संसारे तव यशो भविष्यति. हे बांधव! अहं मृत्युभयाद्रामसमीपं न गतोऽस्मि, तथैव राज्यलोभेनापि न गतोऽस्मि, किंत्वपवादभयाद्रामं सेवितुं गतोऽस्मि, अतः सीतार्पणेन विवादं प्रणाशय? यथाहं रामं विहाय पुनरेव त्वां श्रयामि. क्रुद्धोऽथ रावणः प्रोचे । किमद्यापि बिभीषिकां ॥ रे बिभीषण दुर्बुद्धे । प्रदर्शयसि कातर ॥ १ ॥ भ्रातृहत्याभयाडुक्तो—ऽस्येवं नान्येन हेतुना ॥ इत्युक्त्वास्फालयामास । कार्मुकं दशकंधरः ॥ २ ॥ रावणं संग्रामसज्जं ज्ञात्वा बिभीषणो बभाषे भो रावण! मयापि त्वं भ्रातृहत्याभयादुक्तोऽसि, न पुनर्भीत्येति कथयन् बिभीषणोऽपि धनुरास्फालयामास. ततस्तयोर्युद्धं प्रवर्तितं शक्रेशानयोरिव, चित्राण्यस्त्राणि वर्षतौ जगदेकवीरौ जगद्भयंकरौ च तौ युध्यमानौ विराजेते.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ रावणपक्षे इंद्रजिन्मेघवाहनकुंनकर्णाद्या अपरेऽपि राक्षसाः स्वामिनक्त्या बिन्नीषणं हंतुं दधाविरे, बिन्नीषणपक्षे च श्रीरामलक्ष्मणसुग्रीवहनूमदाद्या अन्येऽपि समुत्थिताः, रामः कुंनकर्णमरौत्सीत्, लक्ष्मण इंद्रजितमरौत्सीत्, तथा नीलः सिंहजघनं, दुर्मुखो घटोदरं, स्वयंनूर्दुर्मतिं, शंनुनलो गदोमयं, स्कंदश्चंद्रनखं, चंद्रोदरो विघ्नं, नामंमलः केतुं, श्रीदत्तो जंबूमालिनं, पवनंजयपुत्रः कुंनकर्णपुत्रं कुंनं, अंगदः सुमालाख्यं, कुंदो धूमराक्षसं, एवं चान्येऽपि राक्षसाः कपयश्च परस्परमयुध्यंत मत्स्यैर्मत्स्या इवार्णवे. एवं युद्धे वर्तमाने । नीषणोन्योऽपि नीषणं ॥ लक्ष्मणायामुचत्क्रोधा—दस्त्रं तामसमिंद्रजित ॥ १ ॥ तदस्त्रं तपनास्त्रेण । सौमित्रिः शत्रुनाशनः ॥ सद्यो विद्रावयामासा—भिना मदनपिंमवत् ॥ २ ॥ ततो लक्ष्मण इंद्रजितं नागपाशैर्बध्ध्वा स्वसैन्येऽनैषीत. तथा रामचंद्रः कुंनकर्णं नागपाशैर्बध्ध्वा स्वसैन्येऽनैषीत. अन्यैरपि रामसैनिकैर्मेघवाहनप्रमुखा राक्षससैनिका बध्ध्वा रामसैन्ये निन्यिरे. ततो राक्षससैन्यं हतं नग्नं बंदीकृतं च दृष्ट्वा राक्षसेंद्रो रावणः क्रुद्धो बिन्नीषणाय जयश्रियो मूलं शूलं चिक्षेप. अंतराले लक्ष्मणस्तं शूलं कदलीकांमलीलया निशितैर्बाणैः कणशः करोतिस्म. ततो भृशं क्रुद्धो रावणो विजयार्थी अमोघविजयां शक्तिं वामेतरपाणिना बिन्नीषणं हंतुं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समुद्दभ्रे, कथंभूतां शक्तिं? धगद्धगिति कुर्वाणां । तडत्तडिति नादिनीं ॥ सिंहनादां तडिल्लेखी— मिव खेऽभ्रमयत्स तां ॥ १ ॥ तां शक्तिं दृष्ट्वा सर्वेऽपि रामसैनिका भयाकुला बभूवुः, तदा रामो लक्ष्मणं बभाषे हे लक्ष्मण! एष आगंतुको बिभीषणो यद्धन्यते तद्वरं न. तर्हि बिभीषणरक्षा क्रियते, एवं रामवचः श्रुत्वा लक्ष्मणो दशकंधरमाक्षिपद्बिभीषणाग्रे चास्थात. गरुडस्थं लक्ष्मणं विलोक्य रावण उवाच भो पुरुषोत्तम! मया तुभ्यं शक्तिर्नोत्क्षिप्ता, ततश्च त्वं परमृत्युना मा मृथाः. एवमुक्तोऽपि लक्ष्मणो बिभीषणाग्रतो नापसरत्, पुनर्लक्ष्मणो बभाषे भो रावण! मुंच शक्तिं यथा शक्तिः? तद्वचः श्रुत्वा कुपितो रावणोऽमोघविजयां शक्तिं भ्रामयित्वा रामानुजन्मने मुमोच, तां शक्तिं चापतंतीं दृष्ट्वा सौमित्रिसुग्रीवहनूमदंगदभामंडलाद्या अन्येऽपि वानरेश्वराः स्वैः स्वैः प्रहरणैः खड्गतीरतोमरगदाप्रमुखैरताडयन्, परं तच्छक्तिप्रहरणं नापसरदभव्यो गुरुवाक्यैः पापादिव, सा च शक्तिरमोघविजयागत्य लक्ष्मणोरःस्थलेऽपतत्. तया भिन्नो महीपृष्टे । निपपात च लक्ष्मणः ॥ उत्पपात च तत्सैन्ये । विष्वग्हाहारवो महान् ॥ १ ॥

पतितं लक्ष्मणं वीक्ष्य कुपितो रामो रावणंप्रति मुद्गरमुत्पाट्य हंतुं दधावे, रामो मुद्गरघातेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रावणरथं कणशो व्यधात्, पुना रावणोऽन्यं रथमारुरोह, भंक्त्वा भंक्त्वा रथानेवं । पंचवारान् दशाननं ॥ काकुत्स्थो विरथीचक्रे । जगदद्वैतपौरुषः ॥ २ ॥ दशास्योऽचिंतयच्चैवं । भ्रातृस्नेहादयं स्वयं ॥ मरिष्यत्येव तत्किं मे । योधितेनामुनाधुना ॥ ३ ॥ दशग्रीवो विमृश्यैवं । ययौ लंकापुरीं द्रुतं ॥ अस्तं जगाम च रवी । रामशोकादिवातुरः ॥ ४ ॥ गतेऽथ रावणे रामो । निवृत्त्येयाय लक्ष्मणं ॥ तं च दृष्ट्वा निपतितं । पपात भुवि मूर्छितः ॥ ५ ॥ सुग्रीवबिभीषणादिभिश्चंदनादिनाभिषिक्तः पल्लवैर्वीजितश्च लब्धसंज्ञो रामो रुदन्नेवं जगाद, हे वत्स ! तव किं बाधते ? ब्रूहि ? किं तूष्णींस्थितोऽसि ? यदि वक्तुं न शक्तस्तर्हि संज्ञया समाख्याहि ? तवाग्रजं च प्रीणय वाक्यदानेन ? हे बांधव ! तवाग्रे जीवन् रावणोऽगादिति लज्जावशात्किं त्वं न भाषसे ? यत्तवेप्सितं तद्भाषयस्व ? इति कथयन् भ्रातृस्नेहवशंगतो रामो रावणं तर्जयन् धनुरास्फाल्य तस्थौ, तदा कपीश्वरो विनयपूर्वकमुवाच हे स्वामिन् ! स निशाचरो लक्ष्मणं गाढप्रहारं कृत्वा लंकां गतस्तावत्, अतस्त्वं धैर्यमाधेहि ? किंचित्सौमित्रिजागरणोपायं च चिंतय ? तन्निशम्य राम एवं जगाद, यथा—

भूयो रामो जगादैवं । हता भार्या हतोऽनुजः ॥ तिष्ठत्यद्यापि रामोऽयं । शतधा न विदीर्यते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ १ ॥ रे रे सुग्रीवहनूम—द्भामंडलनलांगदाः ॥ विराधाद्याश्च सर्वेऽपि । यात स्वौकसि संप्रति ॥ ॥ २ ॥ अथ संग्रामेण किं? संग्रामं विना सैन्येन किं? लक्ष्मणेन विना च जीवितेन किं? आः किं जातं? दैवेन किं कृतं? एवं कथयन् स भृशं रोदितिस्म, यथा—स्थाने स्थाने कलत्राणि । मित्राणि च पदे पदे ॥ तं देशं नैव पश्यामि । यत्र भ्राता सहोदरः ॥ १ ॥ न मे दुःखं हृता सीता । न दुःखं लक्ष्मणो मृतः ॥ एतदेव महद्दुःखं । यन्न राज्ये बिभीषणः ॥ २ ॥ एवं श्रीरामं विलपंतं वीक्ष्य बिभीषणो बभाषे हे राजेंद्र! त्वं कातरवत्किं रोदिषि? धैर्यं निधेहि? लक्ष्मणस्य प्रतीकाराय च सर्वथा प्रयत्न? यतः शक्त्या हतः पुमान् यामिनीं यावज्जीवति, विभावर्यां च मरणं प्राप्नोति, अतो यावद्विभावरी न विभाति तावद्यत्नो विधीयते. आमेति राघवेणोक्ते । सुग्रीवाद्यास्तु विद्यया ॥ सप्तवप्रांश्चतुर्द्वारान् । राघवपरितो व्यधुः ॥ १ ॥ पूर्वद्वारे सुग्रीवो हनूमांस्तारकुंदो दधिमुखो गवाक्षो गवयश्चैते लक्ष्मणरक्षार्थं स्थिताः संति. दक्षिणद्वारे भामंडलो विराधो गजो भुवनजिन्नलो मंदो बिभीषणश्चैते लक्ष्मणरक्षार्थं स्थिताः. पश्चिमद्वारे नीलसमरशीलदुर्धरमन्मथजयविजयसंभवाश्चैते सौमित्रिरक्षार्थं स्थिताः संति. उत्तरद्वारे अंगदकूर्मांगविहंगमसुषेणचंद्ररश्मयश्चैते

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सौमित्रिरक्षार्थं स्थिताः संति.

एते सर्वेऽपि काकुत्स्थं मध्ये कृत्वा स्थिताः संति, एवं ते सर्वेऽपि युद्धसज्जाः संनद्धबद्धाः सपरिकराः ससैन्याश्च रामलक्ष्मणौ परिवेष्ट्य स्थिताः संति. तस्मिन् समये केनचिद्राक्षसा गत्वा सीताग्रे प्रोक्तं भो सीते! रावणेन शक्तिप्रहारेण लक्ष्मणो हतः, तद्विरहपीडितो रामोऽपि मरिष्यति. तत् श्रुत्वा सीता मूर्छया पृथ्व्यां पपात लतेव पवनाहता. त्रिजटाप्रभृतिविद्याधरीभिः शीतलांभोभिः संसिक्ता लब्धचेतना सीतोत्थाय करुणस्वरमेवं विललाप. हा वत्सल हा लक्ष्मण हा देवर! त्वमात्मसहोदरमेकाकिनं मुक्त्वा कथं गतोऽसि? तव विरहेण तवाग्रजो मुहूर्तमपि स्थातुं न क्षमः, अहं च मंदभाग्यास्मि, धिग्मां दुर्दैवदूषितां, यतो मदर्थं स्वामिदेवरयोरीदृक्कष्टं समागतं. हे वसुंधरे! त्वं द्विधा भव? यथा तवोदरेऽहं प्रवेशं करोमि. हे हृदय! त्वमपि द्विधा भव? यथेदृशं वाक्यं न शृणोमि, एवं करुणं रुदंतीं सीतांप्रति काचिद्राक्षसी कृपावत्यवलोकिन्या विद्ययावलोक्यैवं कथयति. हे सुंदरि सीते! तव देवरः प्रभातेऽक्षतांगो भविष्यति, तथा रामलक्ष्मणावत्रागत्य त्वामेवानंदयिष्यतः. तत् श्रुत्वा सीता स्वस्थचित्ता जाता.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ रावणो लंकायां समागतो मया सौमित्रिर्मारित इति क्षणं जहर्ष. पुनः क्षणानंतरं भ्रातृपुत्रमित्रबंधनं श्रुत्वा भृशमुच्चै रुरोद—हा वत्स कुंभकर्ण त्वं । ममात्मैवापरः परः ॥ द्वावेव मम बाहू हि । इंद्रजिन्मेघवाहनौ ॥ १ ॥ हा वत्सा जंबूमाल्याद्या । मम रूपांतरोपमाः ॥ अप्राप्तपूर्वं प्राप्ताः स्थ । कथं बंधं गजा इव ॥ २ ॥ स्मारं स्मारं स्वबंधूना—मिदं बंधादि नूतनं ॥ भूयो भूयो दशग्रीवो । मुमूर्छ च रुरोद च ॥ ३ ॥ इतश्च रामसैन्ये पूर्वद्वाररक्षकभामंडलमुपेत्य प्रतिचंद्रो विद्याधरोऽवदत्, भो भामंडल! मम रामपादान् दर्शय? यथाहं लक्ष्मणजीवनोपायमाख्यामि, यतोऽहं युष्माकं हितोऽस्मि. भामंडलस्तं प्रतिचंद्रं बाहुना धृत्वा रामपादांतेऽनयत्, सोऽपि रामं प्रणम्यैवं विज्ञपयतिस्म, स्वामिन्! संगीतपुरं नाम नगरं, तत्र शशिमंडलो नाम राजा. तस्य सुप्रभाभिधा राज्ञी, तयोः पुत्रश्च प्रतिचंद्रनामाहं. अथैकस्मिन् दिनेऽहं सकलत्रः क्रीडार्थमंबरे गच्छन् सहस्रविजयनाम्ना विद्याधरेण दृष्टः, तेन मत्प्रियारूपमोहितेन कामवशं गतेन मया सह संग्रामो विहितः, तस्मिन् संग्रामे तेन विद्याधरेणाहं चंडरवया शक्त्याहत्य भूतले पातितोऽयोध्यानगर्यासन्ने महेंद्रोद्यानमहीतले लुठंस्त्वद्भ्रात्रातिकृपालुना भरतेनाहं दृष्टः, तेन च सद्यस्तत्कालं सुगंधांबुभिः सिक्तोऽहं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निःशल्यो जातः, सा च चंडरवा शक्तिनिरगाद्दस्युः परगृहादिव. तत्कालं च रूढव्रणोऽहं जातः, मया विस्मितचेतसा तव भ्राता भरतः पृष्टो यथेदं गंधांबु भवता कुतो लब्धं? येनाहं निःशल्यो जातः, इति मया पृष्टो भरतोऽवोचत्. भो विद्याधरेंद्र! गंधांबुमाहात्म्यं शृणु?—

एकस्मिन् दिने गजपुरनगराद्विंध्यनामा सार्थवाह इहान्यागात्, तस्य सार्थवाहस्यैको महिषोऽतिभारात् त्रुटितो मार्गेऽपतत्, तन्नगरवासिनः केचिल्लोकाः पतितमहिषमूर्ध्नि पादं विन्यस्य नगरमध्ये संचेरुः, स महिषः शुभध्यानेनाकामनिर्जरया च मृत्वा पवनपुत्रो नाम्ना वायुकुमारो देवो जातः, तेन च तत्रावधिज्ञानं प्रयुक्तं. स्वपूर्वभवं दृष्ट्वा स नगरलोकोपरि कुपितः, कुपितेन च तेन तत्र पुरे जनपदे ग्रामे च सर्वत्र नानाविधो व्याधिर्विकुर्वितः, स व्याधिश्च सर्वत्र प्रसरितः, परं मम मातुलनगरे कौतुकमंगलाभिधे पुरे द्रोणमेघनरेंद्रराज्ये स व्याधिर्न प्रसरितः, तदा मया पृष्टं भो मातुल! तव राज्येऽयं व्याधिर्यन्न प्रसरितस्तस्य किं कारणं? एवं मया पृष्टः स द्रोणमेघनरेंद्रोऽवदत्, मम भार्या प्रियंकराभिधा, सा च कर्मवशात् प्राग्व्याधिबाधिताभूत्. परं गर्भप्रभावात्सा राज्ञी व्याधिना मुक्ता नीरोगा च जाता, क्रमेण तया राज्ञ्या पुत्री प्रसूता, तस्याश्च विशल्येति नाम द-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्तं, यथा च तव देशे व्याध्युपद्रवोऽभूत्तथा मम देशेऽप्यभूत्. परं विशल्यास्नाननीरसिक्तो लोको नीरोगो जातः. इति पुत्रीप्रभावं वीक्ष्य हे भरतनरेंद्र! मया सत्यभूतिनामा मुनिः पृष्टो भो महामुने! केन पुण्येन विशल्यास्नानवारिणा व्रणसंरोहशल्यापहारव्याधिसंक्षयश्च जायते? मुनिनोक्तमेतत्प्राग्जन्मतपसः फलं ज्ञेयं. कानि कानि तपांस्यनया तप्तानीति मया पृष्टे मुनिर्विशल्यापूर्वभवाचरितानि तपांसि वर्णयन्नाह—

षष्ठाष्टमदशमद्वादशमैकावलीकनकावलीमुक्तावलीरत्नावल्याचाम्लवर्धमानलघुसिंहनिष्क्रीडितवर्गतपोघनतपोमूलतपःप्रतरतपोमासक्षपणार्धमासक्षपणयावत्षण्मासक्षपणाद्यनेकतपांसि तया तप्तानि, तत्तपसः प्रभावादेतस्याः स्नाननीरेण व्याधयः शल्यानि च यांति. तथेयं कन्या लक्ष्मणं परिणेष्यति, अस्य भर्ता च भरतार्धभोक्ता लक्ष्मणो भावी. तया मुनिगिरा च समुत्पन्नप्रत्ययेन मया तत् स्नानपयःप्रभावो निश्चितः, इति कथयित्वा द्रोणमेघो विशल्यास्नाननीरं ममापि दिनद्वयांते दिनत्रयांते चार्पयति, तेन च नीरेण ममापि भूर्नीरोगा जाता, तेन नीरेण च मया त्वमभिषिक्तो नीरुक् शल्यरहितश्च जातः, एषा गंधांबूत्पत्तिस्त्वया पृष्टा मया च कथिता. ततस्तेन विद्याधरेण पुनः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रोक्तं जो श्रीरामचंड! तद्विशल्यास्नानवारि सूर्योदयादर्वागानयत? यथा तेन वारिणा सिक्तो लक्ष्मणस्तत्क्षणादेव निःशल्यो जविष्यति. तद्विद्याधरोक्तं श्रुत्वा श्रीरामः सर्वेषां विद्याधरनरेंद्राणां कथयति जो विद्याधरनरेंद्रास्त्वर्यतां? जो जामंडलहनूमदंगदप्रभृतयः! स्वस्वामिजक्ता जवंतोऽयोध्यां गत्वा जरतं च विबोध्य जरतेन सह द्रोणपुरं च गत्वा विशल्यास्नाननीरं सूर्योदयादर्वाक् समानयत? तदा सर्वैर्विद्याधरैः संजूय विमृष्टं किं करिष्यते? किं चात्र जविष्यति? प्रजाते सूर्योदये विशल्यास्नाननीरानागते च लक्ष्मणो निश्चयेन निधनं यास्यति. अथ को विशल्यास्नाननीरं समानयिष्यति? तावद्धनूमानाह यथा—

पश्चात्तापहते बिजीषणबले खिन्ने प्लवंगेश्वरे। मूढे जांबवति प्लवंगमगणे संजूय जूयः स्थिते ॥ शक्तिप्रौढदृढप्रहारविधुरे मूर्छां गते लक्ष्मणे। श्रीरामो विलपत्यहो हनुमता प्रोक्तं स्थिरैः स्थीयतां ॥ १ ॥ पुना रामंप्रति हनूमानाह—देवाज्ञापय किं करोमि किमहं लंकामिहैवानये। जंबूद्वीपमितो नये किमथवा वारां निधिं शोषये ॥ हेलोत्पाटितविंध्यमंदरहिमस्वर्णत्रिकूटाचल—क्षेपक्षोजविवर्धमानसलिलं बध्नामि वारांनिधिं ॥ २ ॥ पातालतः किमु सुधारसमानयामि। निष्पीड्य चंद्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मम्रतं किमु वानयामि ॥ उष्णं तमुष्णकिरणं किमु दारयामि । कीनाशमाशु कणशः किमु चूर्ण- यामि ॥ ३ ॥ हनूमंतंप्रति राम उवाच—चतूर्णामपि भ्रातॄणां । पंचमो भव मारुते ॥ गच्छ शीघ्रं महावीर । भ्रातृभिक्षां च देहि मे ॥ ४ ॥ रामेणेत्यायुक्तो हनूमान् भामंडलोंगदश्चैते त्रयोऽपि विशल्यास्नानवार्यानयनार्थं विमानारूढा निशायां गगनाध्वनायोध्यांप्रति प्रययुः, निशायामेवायो- ध्यां च प्रापुः. तत्रोपरितनभूम्यां सुप्तं निद्रावशगतं च भरतं वीक्ष्य ते त्रयोऽपि हनूमदाद्या भरतस्य प्रबोधायांबरे स्थिता एवं गानं कुर्वंतिस्म. राजकार्ये उपायतो राजोत्थाप्यते, अतश्च नृपाभ्रागेण गीयते. यथा—माता नास्ति पिता नास्ति । नास्ति भ्राता सहोदरः ॥ अर्थो नैव धनं नैव । त- स्माज्जाग्रत जाग्रत ॥ १ ॥ जन्मदुःखं जरादुःखं । मृत्युदुःखं पुनः पुनः ॥ संसारसागरे दुःखं । त स्माज्जाग्रत जाग्रत ॥ २ ॥ आशया बध्यते जंतुः । कर्मणा बहुचिंतया ॥ आयुःक्षयं न जानंति । तस्माज्जाग्रत जाग्रत ॥ ३ ॥ कामः क्रोधश्च लोभश्च । देहे तिष्टंति तस्कराः ॥ हरंति ज्ञानरत्ना नि । तस्माज्जाग्रत जाग्रत ॥ ४ ॥ उत्तायोत्थाय बोधव्यं । किमद्य सुकृतं कृतं ॥ आयुषः खंडमादा- य । रविरस्तमयं गतः ॥ ५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति गीतं श्रुत्वा जागरितो भरतः, ते त्रयोऽप्यंबरादवतीर्य भरतं च नत्वा भरतसमीपे उपरितनभूम्यां सुखासने समुपविष्टाः, ततस्ते त्रयोऽपि पृष्टा भरतेन किमागमनकारणं? यूयं च के? कुतश्च समागताः? किं प्रयोजनं? तावता हनूमता प्रोक्तं वयं रामसेवका विद्याधरा इति निवेद्य सीतापहारादिः सर्वोऽपि वृत्तांतः कथितः, लक्ष्मणश्च शक्तिप्रहारभिन्नदेहो वर्तते, तत्स्नेहमोहितो रामोऽपि महाशोकसागरे पतितोऽस्ति, ततो यदि विशल्यास्नाननीरं लभ्यते तदा लक्ष्मणो जीवति. रामोऽपि च जीवति, अन्यथा तयोर्मरणं भविष्यति. सा विशल्या च तव साध्या. रामलक्ष्मणावपि तव बांधवौ भवतः, ततोऽथ तथा कुरु यथा तौ जीवतः. तेन स्वामिन्नुद्धीयतां? विलंबावसरो नास्ति, त्वर्यतां चैतत्कार्यं तव साध्यं वर्तते. भरतेनोक्तमेवं भवतु. हनूमता विमानं धृतं. तत्र ते त्रयश्चतुर्थश्च भरत एवं विमानारूढास्ते कौतुकमंगलं नाम नगरं संप्रापुः. तत्र भरतेन द्रोणघनो राजा बहुमानपूर्वं विशल्यां कन्यां लक्ष्मणार्थं ययाचे, सोऽपि हर्षनिर्भरः कन्यासहस्रयुतां विशल्यां लक्ष्मणाय ददौ. भरतोऽपि तां कन्यासहस्रसहितां विमानारूढां कृत्वा तेषां समर्पयामास. ततस्ते सर्वेऽपि विमानारूढा अयोध्यायामागताः, तत्र च भरतं स्वगृहे मुक्त्वा भरतानुज्ञाता हनूमद्भामंड-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लांगदाः कन्यासहस्रयुतविशल्यां विमाने समारोप्य रामसैन्ये समागताः. प्रत्यागतं हनूमंतं वीक्ष्य हर्षिताः सर्वेऽपि सैनिकास्तान् प्रशंसंतिस्म, धन्या एते त्रयोऽपि ये स्वामिकार्यं कृत्वा त्वरितमेव समायाताः, इति प्रशंसां कर्णाभ्यां शृण्वंस्तत्सहितो हनूमान् श्रीरामं बभाषे, हे स्वामिन्नेषा विशल्या, रामो विशल्यांप्रत्यवोचत हे विशल्ये! त्वं स्नानं कुरु? यथा तव स्नाननीरेण लक्ष्मणो सज्ञो भवति, तया कन्यकया विशल्यया चिंतितमहोऽहं यस्य पाणिग्रहणं करिष्यामि तस्य शरीरे मम स्नाननीरं कथमभिषिंचामीति विचिंत्य तया पाणिना स्पृष्टो लक्ष्मणस्तत्क्षणादेव विशल्यो जातः, निर्गता चामोघविजया शक्तिः, सा शक्तिश्च विशल्याप्राग्भवतपस्तेजः सोढुमशक्ता लक्ष्मणशरीरान्निर्गता, ततो निर्गतमात्रा गगने समुत्पतंती स्वेच्छया यांती सा समुत्पत्य हनूमता श्येनेन चिटिकेव धृता, अमोघविजयोचे भो हनूमन्! न मे कश्चिद्दोषः, अहं प्रज्ञप्तिभगिनी धरणेंद्रेण रावणाय दत्ता, रावणेन लक्ष्मणंप्रति मुक्ता, अहं च किं करोमि? मम को दोषः? देवतारूपाहं यत्कश्चित्कारापयति तत्करोमि, मां मुंच? यथा स्वस्थानं यामीत्युक्ते सा हनूमता मुक्ता स्वस्थानं गता लज्जितेव, सा विशल्यापि भूयोभूयः पाणिना लक्ष्मणं पस्पर्श, गोशीर्षचंदनेन शनैश्च विलि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लेप, तत्क्षणं सौमित्री रूढव्रणः शीघ्रं प्रसुप्त इवोत्थितः श्रीरामं ननाम. रामोऽपि साश्रुनयनः सर्वं विशल्यावृत्तांतं लक्ष्मणाय शशंस. तत्स्नानपयसा चान्येऽपि सुभटा घातजर्जराः सज्जाः संजाताः. अथ सौमित्री रामशासनात्तदानीमेव कन्यासहस्रसहितां तां विशल्यामुपयेमे, रामेण सौमित्रेज न्ममहोत्सववन्महामहश्चक्रे. एष वृत्तांतः केनचिन्नक्तंचरेण रावणाग्रे विज्ञप्तः, हे राक्षसेंद्र! लक्ष्मणो विशल्याकरस्पर्शाज्जीवित इति श्रुत्वा रावणो मंत्रिभिः सह मंत्रयांचक्रे. भो मंत्रिन्! मया शक्तिताडितो लक्ष्मणः प्रातर्मरिष्यतीति चिंतितमभूत, तद्विरहपीडितो रामोऽपि मरिष्यति. ततः कपयश्च स्वयमेव नंष्ठा यास्यंति, कुंभकर्णेंद्रजिन्मेघवाहनाश्च स्वयमेव समेष्यंतीति चिंतितं वृथा जातं. यतोऽधुना दैवयोगात्स लक्ष्मणोऽपि जीवितः, तेन ते कुंभकर्णादयश्च कथं मोचयितव्या इति चिंतां करोमि, एतद्रावणवचः श्रुत्वा मंत्रिणः प्रोचुः स्वामिन्! सीतामोक्षणं विना रामस्तव पुत्रादीन्न मोचयिष्यति.

इयत्यपि काले गते स्वामिन्नद्यापि किंचिद्विनष्टं नास्ति, निजं कुलं रक्ष? सीतां च देहि? यतः—मानुष्यौ न मनुष्यौ तौ। वानरास्ते न वानराः ॥ व्याजेन किमपि ब्रूमं। देव दुर्दैवमस्ति ते

For Private And Personal Use Only

॥ १ ॥ एवं मंत्रिभिः पुनः पुनः प्रोच्यमानोऽपि स सीतां नामुंचत, अन्योपायांश्चाचिंतयत. एकं
मंत्रिणं शिक्षयित्वा स रामंप्रत्यप्रेषयत. सोऽपि रामसमीपं गत्वा विनयपूर्वं विज्ञपयति. यथा मत्स्वा·
मी रावणो मन्मुखेनेदमाह त्वं मम जानकीं समर्पय? तथा मद्बंधुपुत्रांश्च मोचय? अहं तव रा·
ज्यार्धं ददामि, तथा त्रीणि कन्यासहस्राण्यपि ददामि, यदि च ममोक्तं न करिष्यसि तदा ते जी·
वितमपि नास्ति, यदि च जीविताद्उद्विग्नोऽसि तर्हि संग्रामसज्जो भूत्वा मम प्राघूर्णको भव? तत श्रु·
त्वा श्रीरामो बभाषे, भो मंत्रिन्! राज्यार्धेन मम कार्यं नास्ति, तथान्यप्रमदावर्गेणापि कार्यं नास्ति,
यदि च रावणः सीतां प्रेषयति तदा रावणभ्रातृपुत्रान् मोचयामि, नान्यथा. किंच भो मंत्रिंस्त्वया
रावणस्य वाच्यं यदि जीवितेन राज्येन च ते कार्यं भवति तर्हि सीतां प्रेषय? यदि सीतां न मुं·
चसि तर्हि संग्रामसज्जो भूत्वा मम प्राघूर्णको भव? पुना रावणमंत्रिणा प्रोक्तं भो श्रीरामचंद्र!
स्त्रीमात्रकृते स्वात्मानं प्राणसंशये क्षेप्तुं तवोचितं नास्ति. यदसौ सौमित्रिरेकवारं रावणप्रहाराज्जी·
वितः, पुनस्तत्प्रहारतः कथं जीविष्यति? तथा रावणाग्रतोऽमी वराकाः प्लवंगमा नष्टा क यास्यंति,
एकोऽपि रावणः सकलमपि विश्वं जेतुं समर्थोऽस्ति, तेन तस्य पुरतः केऽमी वराका वानराः? अ·

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तो हे रामचंद्र हृदये विचार्य रावणभ्रातृपुत्रौ समर्पय? एतद्वचनं श्रुत्वा क्रुद्धो लक्ष्मणोऽप्यधात्, रे दूत! पाशेन हतबहुपरिवारोऽपि रावणो ननु किं पौरुषं नाटयति? अहो तव स्वामिनो धृष्टता! त्वं गछ? रावणाग्रे च कथय? यत्सज्जो भूत्वेहागछ? यदि च जीवितेन कार्यं भवति तर्हि सीतां प्रेषयेत्युक्त्वा तं मंत्रिणं च कंठे धृत्वा सभामध्यान्निर्वासयामास, तेन च तल्लक्ष्मणवाचिकं सर्वमपि रावणाय गत्वाख्यातं.

तत श्रुत्वा रावणः सचिवानूचे यूयं ब्रूत? संप्रति किं कर्तव्यं? मंत्रिणोऽप्यूचुः स्वामिन् सीतार्पणमुचितं वर्तते, सीतार्पणं च विनानर्थो भावी. तेषां सीतार्पणगिरा । मर्मणि बाधितोऽधिकं ॥ अंतर्दूनो दशमुख—श्चिरं स्वयमचिंतयत् ॥ १ ॥ विद्याया बहुरूपाया । हृदि निर्णीय साधनं ॥ शांतिचैत्यं ययौ शांत—कषायीभूय रावणः ॥ २ ॥ तत्र श्रीशांतिनाथचैत्ये मंदोदर्या सहितो गत्वा स्नात्रं च कृत्वा जिनपूजां विधायैवंविधां श्रीशांतिनाथजिनस्तुतिं विनिर्ममे, यथा—देवाधिदेवाय जग—त्तायिने परमात्मने ॥ श्रीमते शांतिनाथाय । षोडशायार्हते नमः ॥ १ ॥ श्रीशांतिनाथ भगवन् । भवांभोनिधितारण ॥ सर्वार्थसिद्धमंत्राय । त्वन्नाम्नेऽस्तु नमोनमः ॥ २ ॥ ये तवाष्टविधां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूजां । कुर्वंति परमेश्वर ॥ अष्टापि सिद्धयस्तेषां । करस्था अणिमादयः ॥ ३ ॥ देव त्वत्पादसंस्पर्शा—दपि स्यान्निर्मलो जनः ॥ अयो हि हेमीभवति । स्पर्शवेधरसान्न किं ॥ ४ ॥ त्वत्पादाब्जप्रणामेन । नित्यं भूयात्तनैः प्रभो ॥ शृंगारतिलकीभूया—न्मम भाले रजोभरः ॥ ५ ॥ स्तुत्वेति शांतिं लंकेशः । पुरो रत्नशिलास्थितः ॥ तां साधयितुमारेभे । विद्यामक्षस्त्रजं दधन् ॥ ६ ॥ एवं श्रीशांतिजिनं नत्वा स्तुत्वा तस्य पूजां च कृत्वा तत्प्रतिमापुरतो रत्नशिलासंस्थितः पद्मासने समुपविश्य नासाग्रन्यस्तदृग्द्वंद्वोऽक्षमालाव्यापृतकरो योगींद्र इव स्तिमितनयनो बहुरूपिणीं विद्यां साधयामास. रावणपट्टराज्ञी मंदोदरी चोत्तरसाधकीभूय परितो भ्रमतिस्म.

ततः सा मंदोदरी यमदंडनामानं द्वारपालमवदद्भो यमदंड सकलेऽपि नगरे एवंविधां घोषणां कारापय? यथा भो लोकाः सकलेऽपि पुरेऽष्टाह्निकामहोत्सवं कुरुत? यमदंडेनापि नगरमध्ये गत्वा सर्वत्रेत्युद्घोषणा कृता यथा भो भो लोका नगरमध्ये जिनचैत्यालयेऽष्टाह्निकामहोत्सवं कुरुत? ये च जिनपूजां न करिष्यंति तस्य वधात्मको दंडः करिष्यते, इत्युद्घोषणां कृत्वा मंदोदरीसमीपे पुनरागतो यमदंडो यथातथं तत्सकलं निवेदयामास. अथैतत्स्वरूपं वानरैरागत्य सुग्रीवाय निवेदितं,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा हे स्वामिन्! रावणनरेंद्रो बहुरूपिणीं विद्यां साधयति. सुग्रीवेण चागत्य रामचंद्राय निवेदितं, हे स्वामिन् श्रीरामचंद्र! रावणः श्रीशांतिनाथचैत्ये गत्वा बहुरूपिणीं विद्यां साधयति, ततो यावत्सा विद्या साधिता न भवति तावदसौ साध्यो वर्तते, साधनानंतरं चासाध्यो भविष्यति, ततो ध्यानस्थ एव रावणो यदि गृह्यते तदा वरं, श्रीरामचंद्रेणोक्तं भो सुग्रीव! ध्यानस्थः शांतः शस्त्रादिरहितश्च श्रीशांतिनाथप्रासादे स्थितश्छलेन यद्गृह्यते तन्न पुरुषधर्मोचितं, न चास्मत्कुलोचितं, यद्भाव्यं तद्भविष्यति. इति रामवचः श्रुत्वा । छन्ना एवांगदादयः ॥ विद्याभ्रंशाय लंकेशं । शांतिचैत्यस्थितं ययुः ॥ १ ॥ विदधुर्विविधांस्तत्रो—पसर्गास्ते निरर्गलाः ॥ मनागपि न तु ध्याना—दचालीद्दशकंधरः ॥ २ ॥ अथांगदो जगावेवं । रामभीतेन किं त्वया ॥ इदं पाखंडमारब्ध—मप्राप्तशरणेन भोः ॥ ॥ ३ ॥ त्वया परोक्षे मद्भर्तु—र्हृता भार्या महासती ॥ मंदोदरीं तु ते पत्नीं । पश्यतोऽपि हराम्यहं ॥ ४ ॥ इत्युक्त्वा महाक्रोधारुणलोचनोंगदोऽनाथामिव रुदंतीं करुणस्वरं विलपंतीं च तां मंदोदरीं केशे धृत्वाचकर्ष, परं रावणो ध्यानसंलीनस्तां न प्रेक्षांचक्रे.

तस्मिन् समये सा बहुरूपिणी विद्या नभःस्थलं द्योतयंत्यंबरादवततार. रावणाग्रे चागत्यैवमव-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दत, हे रावण! अहं बहुरूपिणी विद्या तव सिद्धास्मि, यत्किंचिद्रोचते तद्याचस्व? त्वया ध्यानेनाहं वशीकृतास्मि, ब्रूहि किं करोमि? विश्वमपि ते वशवर्तिनं करोमि, तर्हि कियन्मात्रावेतौ राघवौ? रावणः प्रत्युवाचैवं । सर्वं निष्पद्यते त्वया ॥ स्मृतागछेर्मया काले । स्वस्थाने गछ संप्रति ॥ १ ॥ तद्विसृष्टा तिरोऽधत्त । सा विद्या तेऽपि वानराः ॥ स्कंधावारं निजं जग्मु—रुत्प्लुत्य पवमानवत ॥ ॥ २ ॥ मंदोदर्यंगदोदंतं । शुश्राव च दशाननः ॥ चक्रे च सद्योऽहंकार—गर्भं हुंकारमुच्चकैः ॥३॥ ततो रावणः स्नानं कृत्वा पुनर्जिनपूजां विधाय दानं दत्वा पश्चाच्च भुक्त्वा देवरमणोद्याने समागात्. तत्र च सीतांप्रत्युवाच हे सीते! मया बहुरूपिणी विद्या साधिता. सा च प्रत्यक्षीभूतास्ति, अथाहं त्वत्पतिदेवरौ हत्वा त्वां बलात्कारेणापि सेविष्ये. अतस्त्वं प्रसन्ना भव? यथा मम नियमभंगो न भवति, तद्वचनं श्रुत्वा जनकात्मजा मूर्छिता निःपपात, राक्षसीभिः परिचारिता कथंचिल्लब्धचेतना भृशं विलप्याभिग्रहं जग्राह, यथा—मृत्युश्चेद्रामसौमित्र्यो—स्तदा त्वनशनं मम ॥ यथा यांति मम प्राणा । धर्मध्यानसमाकुलाः ॥ १ ॥ तत् श्रुत्वा रावणो दध्यौ । रामस्नेहो निसर्गजः ॥ अस्यास्त-दस्यां मे रागः । स्थले कमलरोपणं ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततः पश्चात्तापहतो रावणश्चिंतयत्यहो मयाऽयुक्तं कृतं, यदस्या अर्थे बिभीषणोऽवज्ञातः, बुद्धिसागरप्रमुखा अपि न मानिताः, तथा मया कुलमपि कलंकितं, यदि सीतां मुंचामि तर्हि सर्वोऽपि लोको मां कथयिष्यति यद्रामाद्भीतेन रावणेन सीता मुक्ता. तेन च लोकेऽपयशः स्यादतः सीतां न ददामीति निश्चित्य तद्दिनं तां निशां चातिक्रम्य प्रातःसमये युद्धसज्जो भूत्वैवं कथयन् स निर्ययौ यथा—अरावणमरामं वा ; जगदद्य करोम्यहं ॥ निर्ययावथ पौलस्त्यः । पुनर्युद्धाय मंदिरात ॥ १ ॥ निर्गमनसमये च तस्येमान्यपशकुनानि जातानि, यथा—अंगारभस्मेंधनरज्जुपंक—पिनाककर्पासतुषास्थिकेशाः ॥ कृष्टा यवास्तस्करकृष्णधान्य—पाषाणविष्टाभुजगौषधानि ॥ १ ॥ तैलं गुडं चर्म वसाविभिन्नं । तिक्तं च भार्म लवणं तृणं च ॥ तक्रार्गलाशृंखलवृष्टिघाताः । कार्ये कचित् त्रिंशदियं न शस्ताः ॥ २ ॥ स्वपादयानस्खलनं दशानां । भंगः कचिद्यानपलायनं च ॥ द्वाराभिघातो ध्वजवस्त्रपातः । प्रस्थानविघ्नं कथयंति यातुः ॥ ३ ॥ मार्जारयुद्धारवदर्शनानि । कलिः कुटुंबस्य परस्परस्य ॥ विभास्यकालुष्यकरं च सर्वं । गंतुः प्रयाणप्रतिषेधनाय ॥ ४ ॥ भूरयः खगमृगाः समाकुला—स्तुल्यकालविहितारवाश्च ये ॥ ते भवंति परदेशयायिनां । देहिनां मरणकारिणो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ध्रुवं ॥ ५ ॥ इत्याद्यपशकुनैर्वार्यमाणोऽपि स दुर्मदः संग्रामान्न विरराम, ततः प्रववृते युद्धं रामराव-
णयोस्तयोरतिभयंकरं महाघोरमत्युद्भटसुभटकोटिभुजास्फोटत्रासिताशेषदिग्गजं. पुनः किंविशिष्टं त-
द्युद्धं? यथा—

शरजालतिरस्कृतदृष्टिपथं । पथरोधसमाकुलतीव्रभटं ॥ भटकोटिविपाटितकुंभितटं । तटविभ्रम-
हस्तिशरीरचितं ॥ १ ॥ चितप्रचितोरुसुहस्तिघटं । घटनागतभीरुकृतार्तरवं ॥ रवपूरितभूधरदिग्विवरं ।
वरहेतिनिवारणखिन्ननृपं ॥ २ ॥ नृपभिन्नमदोध्धुरवैरिगणं । गणसिद्धनभश्चरघुष्टजयं ॥ जयलंपट-
योधशतैश्चटुलं । चटुलाश्वसहस्रविमर्दकरं ॥ ३ ॥ करस्पृष्टशरौघविवर्णरथं । रथभंगविवर्धितयोधब-
लं ॥ बलशालिभटेरितसिंहनदं । नदभीषणरक्तनदीप्रवहं ॥ ४ ॥ एवंविधं संग्रामं कुर्वाणो रावणो
रामलक्ष्मणाभ्यां भृशं युयुधे, तावल्लक्ष्मणोऽशेषरक्षांसि विधूय तीक्ष्णैर्बाणै रावणं ताडयामास, तदा
रावणः सौमित्रेर्विक्रमं दृष्ट्वा तं च दुर्जयं ज्ञात्वा बहुरूपिणीं विद्यां विश्वभयंकरां सस्मार, यया विद्य-
या स्मृतमात्रयापि रावणस्यैकस्याप्यनेकरूपाणि चक्रिरे. भूमौ नभसि पृष्ठेऽग्रे । पार्श्वयोरपि लक्ष्म-
णः ॥ अपश्यद्रावणानेव । विविधायुधवर्षिणः ॥ १ ॥ तावद्भूप इवैकोऽपि । तार्क्ष्यस्थो लक्ष्मणोऽपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तान् ॥ जघान रावणान् बाणै—श्चिंतितोपनतैः शितैः ॥ २ ॥ नारायणस्य तैर्बाणै—र्विधुरो दशकंधरः ॥ सस्मार जाज्वलच्चक्र—मर्धचक्रित्वलक्षणं ॥ ३ ॥ रोषारुणाक्षस्तच्चक्रं । भ्रामयित्वा नभःस्थले ॥ मुमोच रावणः शस्त्र—मंत्यं रामानुजन्मने ॥ ४ ॥ तच्चक्रं रामानुजन्मनः प्रदक्षिणां कृत्वा दक्षिणे करेऽवतस्थे रविरिव, तच्चक्रं लक्ष्मणदक्षिणकरे स्थितं वीक्ष्य रावणोऽचिंतयन्मुनेर्वचः सत्यं जातं, तथा बिभीषणादिभिरालोचयित्वा मम कथितं, परं मया न मानितं, अथ किं भविष्यति? एवं खिन्नं विषण्णं रावणं दृष्ट्वा बिभीषणो बभाषे, हे भ्रातर्यदि जीवितेच्छा वर्तते तर्हि सीतां मुंच? श्रीरामं च नमस्कुरु? यथा ते लक्ष्मणो राज्यं दत्वा विसृजति. बिभीषणस्यैतद्वचः श्रुत्वा कुपितो रावणो बिभीषणं तर्जयति, रे कुलध्वंसकृत बिभीषण! किं त्वं मां चक्रबिभीषिकां दर्शयसि? अनेन लक्ष्मणेन यदि मच्चक्रं प्राप्तं तर्हि किं स मत्तोऽधिको जातः? यथा मया मुक्तं चक्रमस्मै निष्फलं जातं, तथानेनापि मुक्तं मयि निष्फलं भविष्यति. किं मम चक्रेणैषो विजेता भविष्यति? युद्धसज्जोऽहं मुष्टिप्रहारेणैव यदि लक्ष्मणं तथा लक्ष्मणचक्रं चूर्णयिष्यामि तर्ह्येवाहं रावण इत्यादिवचनैर्हुंकारं कुर्वाणो रावणो लक्ष्मणेनाभाषि, भो रावण! अद्यापि किंचिद्विनष्टं नास्ति, तव किंचि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दपि गतं नास्ति, सीतां देहि? सीतां च दत्वा स्वस्थचित्तो मां नत्वा स्वस्थानं गत्वा राज्यं कुरु? एवं सौमित्रिणोक्तो रावणो पुनर्बभाषे, मुंच चक्रं यथा मुष्टिना चूर्णयामि लेष्टुवत, तत श्रुत्वा कुपितेन लक्ष्मणेन चक्रमुद्भ्राम्य रावणाय मुक्तं, तेन चक्रेण रावणो वक्षसि ताडितः कुष्मांडवद् हृदयस्फोटतो भूमावपतत, तथा च ज्येष्ठकृष्णैकादश्यामह्नि पश्चिमे यामे मृतो दशग्रीवश्चतुर्थं नरकं ययौ. तदाकाशे जयजयारवो जातः, देवैश्च लक्ष्मणोपरि कुसुमवृष्टिः कृता, कपीनां च कपीश्वराणां महान् हर्षो जज्ञे, सकले राक्षसबले च कलकलो जज्ञे, यतः—

क्वचिद्वीणानादः क्वचिदपि च हाहेति रुदितं । क्वचिद्विद्वद्गोष्टिः क्वचिदपि सुरामत्तकलहः ॥ क्वचिद्रम्या रामा क्वचिदपि जराजर्जरवपु—र्न जाने संसारः किममृतमयः किमु विषमयः ॥ १ ॥ धिग्परस्त्रीलांपट्यं, यतः—आत्मा दुर्नरके धनं नरपतौ प्राणाश्रितायां कुलं । वाच्यत्वे हृदि दीनता त्रिभुवने तेनायशः स्थापितं ॥ येनेदं बहुदुःखदायि सुहृदां हास्यं खलानां कृतं । शौचं साधुजनस्य निंदितपरस्त्रीसंगसेवासुखं ॥ १ ॥ परिहरत परांगनानुषंगं । बत यदि जीवितमस्ति वल्लभं वः ॥ हरहर हरिणीदृशो निमित्तं । दशकंधरमौलयो लुठंति ॥ २ ॥ आवासं परिमार्ष्टि वायुतनयः पुष्पो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्करं तन्वते । कीनाशो महिषेण वारि वहते ब्रह्मा पुरोधाः पुरः ॥ खट्वायां च नियंत्रिता ग्रहगणा निर्णेजकः पावक—श्चामुंडा तलरक्षका गणपतिर्यस्य प्रतीहारकः ॥ १ ॥ एतत्सर्वमिंद्रविद्याधरसत्कं ज्ञेयं, न पुनः साक्षादिदं, तथा च—स्थानं त्रिकूटः परिखा समुद्रो । रक्षांसि योधा धनदाच्च वित्तं ॥ संजीविनी यस्य मुखे च विद्या । स रावणो दैववशाद्विपन्नः ॥ २ ॥ हर्षितं वानरबलं, त्रस्तं च राक्षसबलं, यतः—कुमुदवनमपश्रि श्रीमदंभोजखंडं । त्यजति मुखमुलूकः प्रीतिमांश्चक्रवाकः ॥ उदयमहिमरोचिर्याति शीतांशुरस्तं । हतविधिललितानां ही विचित्रो विपाकः ॥ १ ॥ सज्जनानां परस्त्रीसंगो न सुखायते, यथा चंद्रः स्वैरिणीनां, उद्योतश्चौराणां, दीपः पतंगानां, सूर्यः कौशिकानां, दिवसो नक्तंचराणां, चंद्रोदयश्चौराणां, सुभिक्षं धान्यसंग्रहिणां, गर्जितं शरभानां, चंदनं विरहिणां, वर्षाकालः प्रावहणिकानां, मृदंगशब्दः शोकाकुलानां, गुरुवचः कुशिष्याणां, शृंगारकथा महात्मनां, मयूरनादो वियोगिनीनां, दुर्जनगोष्टी सज्जनानां, तीव्रातपः सुकुमाराणां, दानवार्ता कृपणानां, शौर्यवृत्तिः कापुरुषाणां, परस्तुतिश्च खलानां यथा सुखाय न भवति, तथा परस्त्रीसंगोऽपि महापुरुषाणां सुखाय न भवति. ॥ इति श्रीमत्तपागच्छे भट्टारकश्रीहीरविजयसूरिराज्ये पंडितश्रीदेव-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विजयगणिविरचिते गद्यबंधे श्रीरामचरित्रे रावणवधो नाम सप्तमः सर्गः समाप्तः ॥ श्रीरस्तु ॥

॥ अथाष्टमः सर्गः प्रारभ्यते ॥

अथ बिभीषणो रावणबांधवो भयत्रस्तान्निशाचरान् दृष्ट्वा तानाश्वासयामास ज्ञातिस्नेहवशात्, बिभीषणो निशाचरानेवं बभाषे, भो भो राक्षसाः! एतौ रामलक्ष्मणावष्टमबलशार्ङ्गिणौ शरणार्हौ यूयमाश्रयध्वं? इति बिभीषणोक्तं श्रुत्वा सर्वेऽपि निशाचरा निःशंकिताः श्रीरामं शिश्रियुः, श्रीरामोऽपि तेषां राक्षसानामुपरि प्रसादं चकार, यतः संतो हि नतवत्सलाः. अथ तथा हतं पतितं च रावणं वीक्ष्य शोकाकुलमानसो बिभीषणो मर्तुकामो निजकटीतटात्क्षुरिकामाचकर्ष, तया क्षुरिकया च स निजोदरमाघ्नन् रामेण करे धृतो भ्रातृदुःखेन रोदितिस्म. मंदोदर्यादिभिः सार्धं । रुदंतमुपरावणं ॥ इति तं बोधयामास । पद्मनाभः सलक्ष्मणः ॥ १ ॥ ईदृक्पराक्रमः सोऽयं । न हि शोच्यो दशाननः ॥ यत्त्रासाज्जग्मिरे दूरं । समरेष्वमरा अपि ॥ २ ॥ वीरवृत्तया तया मृत्युं । गतोऽसौ कीर्तिभाजनं ॥ तदस्योत्तरकार्याणि । कुरुध्वं रुदितैरलं ॥ ३ ॥ इति कथयित्वा श्रीरामः पूर्व-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बध्नान् कुंभकर्णेंद्रजिन्मेघवाहनादीन् बंधनान्मोचयामास. ते सर्वेऽपि बिभीषणाद्या राक्षसाः, सुग्रीवाद्याश्च वानरा मंदोदरीप्रभृतयोंतःपुर्यश्च संभूय दशग्रीवांगसंस्कारं चक्रुः सद्यस्कगोशीर्षचंदनैः कर्पूरागुरुप्रभृतिसुगंधधूपसन्मिश्रैर्ज्वलितानलैः, पद्मोऽपि रावणांगसंस्कारं चक्रे. ततस्ते सर्वेऽपि पद्मसरसि गत्वा स्नानं कृत्वा कुंभकर्णबिभीषणाद्या भ्रातृपुत्राश्च साश्रुनयना दशमौलये जलांजलिं प्रददुः. यतः—तिब्रयरगणहारी । सुरवइणो चक्किकेसवा रामा ॥ अवहरिया हयविहिणा । अवरजीवाण का वत्ता ॥ १ ॥ रामः कुंभकर्णादीन् प्रतिबोध्य सुधामधुरया गिरैवमुवाच. भो कुंभकर्णेंद्रजिन्मेघवाहनाद्याः सर्वेऽपि शृण्वंतु, युष्मल्लक्ष्म्या अस्माकं कृत्यं नास्ति, पूर्ववत् स्वस्वराज्यानि कुरुध्वं? युष्माकं च क्षेममस्तु. काचिदपि भीतिर्न कार्या. तदा ते कुंभकर्णाद्या युगपच्छोकविस्मयौ बिभ्राणा गद्गदाक्षरमेवं जगदुर्यथा—नार्थो राज्येन नः कश्चि—त्प्राज्येनापि महाभुज ॥ ग्रहीष्यामः परिव्रज्यां । मोक्षसाम्राज्यसाधनीं ॥ १ ॥

अस्मिन् समये कुसुमायुधोद्यानेऽप्रमेयबलनामा महामुनिश्चतुर्ज्ञानी समाययौ. तत्र वने च तस्यामेव रात्रौ तस्य महामुनेरुज्ज्वलं केवलज्ञानमुत्पेदे, समागता देवाश्च तस्य केवलमहिमानं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चक्रुः. प्रभातसमये च रामसौमित्रिबिभीषणकुंभकर्णसुग्रीवेंद्रजिन्मेघवाहनमंदोदरीप्रमुखा देशनां शृण्वंति. स्वर्णपंकजासीनः स महामुनिरप्यप्रमेयबलः केवली धर्मदेशनां चकार, यथा—धर्मो जगतः सारः । सर्वसुखानां प्रधानहेतुत्वात् ॥ तस्योत्पत्तिर्मनुजाः । सारं तेनैव मानुष्यं ॥ १ ॥ संसारे नत्थि सुहं । जम्मजरामरणरोगसोगेहिं ॥ तहवि हु इहं जीवा । न कुणंति जिणंदवरधम्मं ॥ ॥ २ ॥ माइंदजालसरिसं । विज्जुचमक्कारसन्निहं सव्वं ॥ सामंतं खणदिहं । खणनहं कोत्थ पडिबंधो ॥ ३ ॥ को कस्स इत्थ सयणो । को व परो भवसमुद्दभमणंमि ॥ मच्छुव्व भमंति जीआ । मिलंति पुण जंति अइदूरं ॥ ४ ॥ जम्मे जम्मे सयणा—वलिउ मुक्काउ जाउ जीवेण ॥ ताउ सवागासे । संगहियाउ न मायंति ॥ ५ ॥ जीवेण भवे भवे मे—लियाइं देहाइं जाइं संसारे ॥ ताणं न सागरेहिं । कीरइ संखा अणंतेहिं ॥ ६ ॥ छायामिसेण कालो । सयलजिआणं छलं गवेसंतो ॥ पासं कहवि न मुंचइ । ता धम्मे उज्जमं कुणह ॥ ७ ॥ इत्यादिदेशनां श्रुत्वा । इंद्रजिन्मेघवाहनौ ॥ परं वैराग्यमापन्नौ । पप्रच्छतुर्भवान्निजान् ॥ ८ ॥ तदा सोऽप्रमेयबलनामा केवली तयोः पूर्वभवानाह यथा—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इह भारते क्षेत्रे कौशांबी नाम नगर्यस्ति, तस्यां नगर्यां निःस्वौ द्वौ बांधवौ प्रथमपश्चिमनामानावभूतां. तावन्यदा गुर्वंतिके गतौ, तत्र गुर्वंतिके धर्मं श्रुत्वा व्रतं जगृहतुः. ततः शांतकषायौ जितेंद्रियौ तौ पृथिव्यां कर्मक्षयार्थं विजह्रतुः. अन्येद्युस्तौ भ्रातरौ महीं विचरंतौ कौशांब्यां गतौ. तत्र पत्न्या सह क्रीडंतं रतिवर्धननृपं दृष्ट्वा पश्चिमसाधुर्निदानमकरोद्यदि ममास्य तपसः फलं भवति तदानयो राजराज्ञ्योः पुत्रो भूयासं, साधुना निवार्यमाणोऽपि स निदानमकरोत. ततो मृत्वा स तयो राजराज्ञ्योर्गतिवर्धननामा पुत्रो जातः, क्रमेण वर्धमानः पित्रा परिणायितो राज्ये स्थापितश्च स्त्रिया समं वैषयिकं सुखमनुबभूव. मृत्वा प्रथमसाधुस्तु । निर्निदानतपोवशात् ॥ बभूव पंचमे कल्पे । त्रिदशः परमर्द्धिकः ॥ १ ॥ सोऽवधेर्भ्रातरं ज्ञात्वा । तत्रोत्पन्नं महीपतिं ॥ तं बोधयितुमभ्यागा—न्मुनिरूपधरः सुरः ॥ २ ॥ एवं साधुरूपेण स पूर्वभवभ्राता सुर आगत्य तं गतिवर्धनं राजानं पूर्वभवभ्रातरंप्रत्यवदत. भो राजन्नावां पूर्वभवे भ्रातरावभूतां प्रथमपश्चिमनामानौ, द्वाभ्यां च दीक्षा गृहीता, त्वया च निदानं कृतं तेन त्वं राजा जातः, मया निदानरहितः संयमो पालितस्तेनाहं ब्रह्मदेवलोके तपसः प्रभावात्सुरो जातः, तत्र मया ज्ञानं प्रयुक्तं, तेन ज्ञानेन च त्वं भ्राता दृष्टोऽ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सि, मुनिरूपेण च त्वां प्रतिबोधयितुमिहागतः. एतद्वचनं श्रुत्वा गतिवर्धनराज्ञो जातिस्मरणज्ञानमुत्पन्नं, तेन ज्ञानेन पूर्वभवो दृष्टः, वैराग्याद्दीक्षां लात्वा कतिचिद्वर्षाणि संयमं प्रपाल्यांते समाधिना मृत्वा सोऽपि ब्रह्मदेवलोके गतः, तयोर्देवयोस्तत्र परस्परं नेत्रयोरिव प्रीतिर्जाता, यथा सुवचनेन मैत्री वर्धते, इंदुदर्शनेन समुद्रः, शृंगारेण रागः, विनयेन गुणः, दानेन कीर्तिः. उद्यमेन श्रीः, सत्येन धर्मः, पालकेनोद्यानं, न्यायेन राज्यं, औचित्येन महत्त्वं, औदार्यगुणेन प्रभुत्वं, क्षमया तपः, पूर्ववायुना जलदः, वृष्टिभिर्धान्यानि, घृताहुत्या वह्निः, भोजनेन शरीरं, वर्षाकालेन नदी, लाभेन लोभः, पुत्रदर्शनेन हर्षस्तथा मित्रदर्शनेन तयोराह्लादः समुत्पन्नः. ततोऽपि पंचमदेवलोकाच्च्युत्वा महाविदेहे विबुधनगरे युवां प्रौढकुले भ्रातरौ जातौ, तत्रापि सद्गुरुसमीपे धर्मं श्रुत्वा प्रव्रज्यां च गृहीत्वाऽच्युते द्वादशे कल्पे सुरौ जातौ, ततोऽपि च्युत्वा संप्रति रावणपुत्राविंद्रजिन्मेघवाहननामानौ चंद्रसूर्याविवापरौ जातौ. गतिवर्धनभवे या युवयोर्मातेंदुमुखीनाम्न्यभूत्सा भवं भ्रांत्वा तपांसि तप्त्वा क्रमेणेह भवे एषा मंदोदरी युवयोर्माता जाता. इति साधूक्तपूर्वभवचरित्रं श्रुत्वा वैराग्यमापन्नाः कुंभकर्णेंद्रजिन्मेघवाहनाद्या अन्येऽपि च रावणपुत्रा मंदोदर्यादयो राज्ञ्यश्च तदैव स-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धुसमीपे व्रतं जगृहिरे. इतींद्रजिन्मेघवाहनमंदोदरीपूर्वभवकथानकं समाप्तं ॥ तनो रामो लक्ष्मणसुग्रीवनामंडलप्रभृतिविद्याधरैः परिवृतो द्वारपालेनेव बिभीषणेन दर्शितमार्गो विमानारूढो विद्याधरीभिः कृतमंगलो महत्या ऋद्ध्या ऐरावणारूढ इंद्रोऽमरावतीमिव शुभशकुनैः प्रेरितो लंकानगरीं प्राविशत्. तत्र पुष्पगिरिमूर्ध्नि देवरमणोद्याने रामो गत्वा हनूमतोक्तं ददर्श, तत्क्षणादेव श्रीरामः सीतामुत्थाप्य निजोत्संगे धारयामास, इयं महासती सीतेति चाकाशे देववाण्यभवत्, सुमित्रापुत्रो लक्ष्मणश्च सीतापादौ प्रणनाम, सीतापि लक्ष्मणाय चिरं नंद चिरं जीवेत्याद्याशिषं ददौ. भामंडलोऽपि सीतां नत्वा पुरो निषण्णः, सुग्रीवाद्या अपि रामसेवकाः सीतां नत्वा सीतया दत्ताशिषः पुरो निषण्णाः. एवं बिभीषणहनूमदंगदादयोऽपि सीतां नत्वा दत्ताशिषः पुरो निषण्णाः. अथ रामः सीतासहितो भुवनालंकारं गजेंद्रं समारूढो लक्ष्मणसुग्रीवाद्यैः परिवृतो बिभीषणदर्शितमार्गो रावणागारमाजगाम. तदनंतरं गजादुत्तीर्य रावणभवने गतः, तदंतःस्थमणिस्तंभ—सहस्रांकं जिनेशितुः ॥ चैत्यं श्रीशांतिनाथस्य । प्रविवेश विवंदिषुः ॥ १ ॥ बिभीषणार्पितैस्तत्र । कुसुमाद्यैरुपस्करैः ॥ जिनमानर्च काकुत्स्थः । सीतासौमित्रिसंयुतः ॥ २ ॥ ततो रामो बिभीषणाभ्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्थितो लक्ष्मणसीतासुग्रीवाद्यैः परिवृतो बिजीषणगृहं ययौ, तत्रापि देवार्चनं कृत्वा सपरिवारः स्नान-जोजनं विधाय देवदूष्यवासांसि च परिधाय स सिंहासनोपरि स्थितः, तदा बिजीषणः कृतांजलि-र्बजाषे, हे श्रीरामचंद्र! रावणगृहं विलोकय? रामेणोक्तं रावणगृहविलोकनेनास्माकं किं प्रयोजनं? पुनर्बिजीषणो बजाषे स्वामिन्नेष स्वर्णरत्नादिकोषः, एषा गजशाला, एतच्चांतःपुरमेवं सर्वं दर्शितं, तथा हे स्वामिन्नेष राक्षसद्वीपोऽनेकद्वीपैः परिवृतः. अथास्मिन् रावणसिंहासने उपविश? यथा ते राज्याजिषेकं कुर्महे जवदाज्ञया, राज्यग्रहणेन च त्वं लंकां पुरीं पवित्रय? मां चानुगृहाण? अहं तव सेवकोऽस्मि, तव सेवां च करिष्ये. राम उवाच जो बिजीषण! मया तव पुरैव लंकाया राज्यं दत्तं, तच्च त्वं किं व्यस्मार्षीः? हे महात्मन्! जक्तिमोहितस्य ते सर्वं विस्मृतं, मया तुज्यमेव राज्यं दत्तमस्ति, अथ किं पुनः पुनः कथितेन? लंकाराज्यं निश्चितं मया तुज्यं दत्तमिति कथयित्वा त-दैव हि प्रतिज्ञातार्थपालको रामो बिजीषणं लंकाराज्येऽज्यषिंचत्.

अथ रामो लक्ष्मणादिजिः परिवृतो रावणगृहे ययौ, सुधर्मासजायामिंद्र इव तत्र स्थितः, अथ लक्ष्मणो रामाज्ञया पूर्वदत्ताः श्रीविद्याधरराक्षसवानरकन्यका उपयेमे गीतमंगलपूर्वकं. जो-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गांस्तत्रोपभुंजानौ । निर्विघ्नं रामलक्ष्मणौ ॥ सुग्रीवाद्यैः सेव्यमानौ । षष्मब्दीमिति निन्यतुः ॥ १ ॥
अत्रांतरे विंध्यस्थल्यामिंद्रजिन्मेघवाहनौ साधू सिद्धिं प्रापतुः, तन्नाम्ना च तत्तीर्थं प्रवृत्तं, नर्मदानद्यां च कुंभकर्णो मुनिः सिद्धिमियाय, तद्दिनाच्चारभ्य सापि तीर्थरूपा जाता.

इतश्च गगनमार्गेणायोध्यायामागतो नारदोऽपराजितासुमित्राभ्यामभ्युत्थानादिना मानितो नतः पूजितः स्तुतश्च. तुष्टेन नारदेन पृष्टं युवां कुतो विमनस्के? किं बाधते युवयोः किं दुःखं वर्तते? तावता राममातापराजितोवाच, पुत्रौ मम रामलक्ष्मणौ पित्राज्ञया स्नुषया सीतया सहितौ वनं यातौ, सीतापहारादिना च लंकायां जग्मतुः. रावणेन लक्ष्मणोऽमोघविजयाशक्त्या भिन्नः, तच्छल्यकर्षणाय विशल्याग्रहणार्थं हनूमानत्रागतः, स च सहस्रकन्यासहितां विशल्यां गृहीत्वा गतः, पश्चान्न ज्ञायते किं जातं? इति चिंताविमनस्ककारणं, न ज्ञायते स मे वत्सो जीवति न वा. इत्यभिधायापराजिता पुत्रगुणान् स्मृत्वा हा वत्स वत्सेति करुणस्वरं रुरोद, सुमित्रापि तथैव रुरोद. ततो नारदोऽवोचत हे अपराजिते! हे सुमित्रे! युवां स्वस्थे भवतं? अहं रामलक्ष्मणौ स्तोकदिनमध्ये इहानेष्यामि, युवाभ्यां कापि चिंता न विधेया. एवं प्रतिश्रुत्य नारदो गगनगामिन्या विद्यया गच्छन्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लंकां प्राप्तः, तत्र रामलक्ष्मणाभ्यामभ्युत्थानादिना सत्कृतो नारदः, रामेण पृष्टं हे मुने! त्वं किमर्थ मत्रागाः? नारदोऽवोचत भो रामलक्ष्मणौ! युवयोर्मातरौ दुःखसागरे निमग्ने वर्तेते, एकस्मिन् दिने मया तत्र गतेन सर्वं दृष्टं. अतो युवामाकारणाय देशाद्देशं भ्रमन् जनश्रुत्या च युवामत्र स्थितौ श्रुत्वागमं. अतो यूयं चलध्वं मातृमिलनाय, विलंबो न विधेयः. रामेण बिभीषणंप्रत्युक्तं भो बिभीषण! त्वद्भक्त्या मोहितानामस्माकमत्र स्थितानां षभ्द्दी षड्दिनानीव गता परं न ज्ञाता, त्वद्भक्त्या च मातृसंबंधि दुःखमपि विस्मृतं. अतो वयमयोध्यायां गमिष्यामः. लक्ष्मणेनोक्तं भो बांधव! तत्र गत्वा किं करिष्यते? अत्रैव स्थीयते. रामेणोक्तं—

यदि स्वर्णमयी लंका। न मे लक्ष्मण रोचते॥ पितृपर्यागतायोध्या। निर्धनापि सुखावहा॥ १॥ अतस्तत्र गम्यते, तत्र चावयोर्गमनेनास्मन्मात्रोरपि सुखं भविष्यति, अन्यथास्मद्दुःखान्नूनमावयोर्मातरौ विपत्स्येते. लक्ष्मणेनोक्तमेवं भवतु? पुना रामेण बिभीषणंप्रत्युक्तं भो बिभीषण! अथ त्वं पुष्पकं विमानं सज्जीकुरु? यथा तदारुह्य स्वनगर्यामयोध्यायां गम्यते. बिभीषणेनोक्तं हे स्वामिन् षोडषदिनानि यावत्त्वमत्र तिष्ट? यथा स्वैः शिल्पिभी रम्यामयोध्यां कारयामि. रामेणोक्त

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मेवमस्तु. ततो बिभीषणोऽयोध्यां गत्वा विद्याधरशिल्पिभिः षोडशदिनैरयोध्यां स्वर्गपुरीसन्निभां व्य-
धात्. अथ रामेण सत्कृत्य विसृष्टो नारदोऽयोध्यामागत्य पुत्रागमनादि सर्वं वृत्तांतं रामलक्ष्मणमा-
त्रोर्निवेद्य स्वस्थानं गतः. नारदाख्यातं तं वृत्तांतं श्रुत्वापराजितासुमित्रे च हर्षिते. अथ षोडशेऽह्नि
बिभीषणेन सज्जिते पुष्पकविमाने समारूढौ सांतःपुरपरिवृतौ रामलक्ष्मणौ पालकारूढौ शक्रेशाने-
शाविव शुशुभाते. एवं बिभीषणो राक्षसैः परिवृतः. सुग्रीवोऽपि वानरैः परिवृतो, भामंडलोऽपि च
विद्याधरैः परिवृतो हनूमानपि चैवं सर्वेऽपि विद्याधराः स्वस्ववाहनोपविष्टाः श्रीराममनुययुः. एवं देवैः
परिवृताविंद्राविव द्वादशतूर्यनिर्घोषनिःस्वाननिनादघंटानादैश्च दिशो बधिरयंतौ तावयोध्याभिमुखं
चेलतुः. अथ राममायांतं श्रुत्वा दूरादपि च निरीक्ष्य भरतशत्रुघ्नौ गजारूढौ स्वसैन्यपरिवृतौ च श्री-
रामसन्मुखमभ्यागातां. श्रीरामोऽपि शत्रुघ्नसहितं भरतं सन्मुखमागच्छंतं वीक्ष्य पुष्पकं विमानं भूमा-
ववततार, विमानाच्च रामलक्ष्मणावुत्तेरतुः, तथा भरतशत्रुघ्नावपि गजादवातरतां. सोत्कंठौ रामलक्ष्म-
णौ सोत्कंठावपि च भरतशत्रुघ्नौ परस्परं मिलितौ. भरतः साश्रुलोचनो रामपादयोरपतत, रामोऽपि
भरतं बाहुभ्यां धृत्वा कंठाश्लेषमालिंग्य मूर्ध्नि चुचुंब, वारंवारं कुशलं चापृछत्. शत्रुघ्नमपि पादांते लु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तं श्रीराम उत्थाप्य प्रमार्ज्य च तथैवालिलिंग. ततो नमंतौ भरतशत्रुघ्नौ लक्ष्मणोऽपि प्रसारितभुजः ससंभ्रमस्तथैवालिलिंग. ततो रामस्त्रिभिरनुजैर्भ्रातृभिः सार्धं पुनः पुष्पकं विमानमारुह्यायोध्यायां प्राविशत, यथा—

तूर्येषु व्योम्नि भूमौ च । वाद्यमानेष्वथोन्मुदौ ॥ अयोध्यां रामसौमित्री । निजां प्राविशतां पुरीं ॥ १ ॥ सोत्कंठैरुन्मुखैः पौरै—र्मयूरैरिव वारिदौ ॥ निर्निमेषं प्रेक्ष्यमाणौ । स्तूयमानौ च निर्भरं ॥ २ ॥ अर्थिभ्यो दीयमानेऽर्थे । स्थाने स्थाने पुरीजनैः ॥ स्वप्रासादं प्रसन्नास्यौ । जग्मतू रामलक्ष्मणौ ॥ ३ ॥ ततः श्रीरामोऽनया ऋद्ध्या लक्ष्मणसीतासहितः पुष्पकविमानादुत्तीर्य श्रीऋषभस्वामिप्रासादे गत्वा श्रीजिनान् विधिना नत्वा मातृसदनं जगाम. तत्र ससौमित्री रामः पूर्वं स्वमातरमपराजितां नत्वा पश्चादपरमातृवर्गं नमश्चक्रे. सीताविशल्याद्या वध्वोऽप्यपराजितां प्रणेमुः. ततोऽन्याः श्वश्रूः प्रणेमुः. प्रणमंतीर्वधूर्दृष्ट्वा ताश्चेमामाशिषं ददुः, हे वध्वो यूयमस्मद्वद्वीरप्रसविन्योऽस्मदाशिषा भवत? अथापराजिता राममाता लक्ष्मणं भूयोभूयः पाणिना स्पृशंती मूर्ध्नि च चुंबंत्येवमब्रवीत्, हे वत्स! अद्य त्वं दिष्ट्या दृष्टोऽसि, अथवा हे वत्साधुना त्वं पुनर्जात इवासि, त्वं च श-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्योऽसि, यद्विदेशगमनं कृत्वा विजयीभूय चागतोऽसि. हे वत्स! त्वया तानि तानि बहूनि कष्टानि सोढानि, यान्यस्माभिर्वक्तुमपि नो शक्यंते, तथा हे वत्स! तवैव परिचर्यया सीतासहितो रामः सुखी जातः. अथ लक्ष्मणोऽप्युवाच, हे मातः! श्रीरामेणाहं तातेनेव लालितः, तवेव सीतादेव्या वचनैरहं सुखं स्थितः, युष्मदाशिर्भिश्च वैरिसागरं लंघित्वा सपरीवारः पूज्यार्यमहितोऽहमिहागमं. इत्यादिवार्ता मातृभिः सार्धं कुर्वाणौ रामलक्ष्मणौ सुखेनास्तां, तथा भरतोऽपि श्रीरामलक्ष्मणपादानां भक्तिमकरोत्.

अथैकस्मिन् दिने सुखासीनं श्रीरामचंद्रंप्रति भरतोऽवदत्, हे बांधव! त्वया न्यासीकृतं राज्यं त्वं गृहाण? एतावंति च दिनानि मया तवोपानहौ सिंहासने निधाय तव पादवन्मया सेवा कृता, त्वया न्यासीकृतं च राज्यं रक्षितं, अथ त्वं स्वं राज्यं गृहाण? अहं तवाज्ञया प्रव्रजिष्यामि, अहं तदैव तातपादैः सहाप्राव्रजिष्यं, परं बलात्कारेण राज्यं दत्वा रक्षितोऽहमधुना त्वदाज्ञया प्रव्रज्यां गृहीष्ये, तावता समीपस्थापराजिता राममातोचे, यथा—रामवन्न पितुः पुत्रा । न भृत्या हनूमत्समाः ॥ जायंते भ्रातरः सर्वे । न भ्राता भरतोपमः ॥ १ ॥ तावत श्रीरामो भरतं बभाषे हे बांधव!

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वं किं भाषसे? राज्यं कुरु? त्वयानाहूता वयमत्रागताः, पुनस्त्वं राज्यं त्यजन् भूयोऽस्माकं विरह व्यथां किं दत्से, वत्स! तत्तिष्ट पूर्ववत्? ममाज्ञां च कुरु? इत्याग्रहपरं रामं ज्ञात्वा नत्वा च यावत् सोऽचलत्तावत्सौमित्रिणोत्थाय पाणिनाधारि, इतश्च भरतं व्रताय यांतं कृतनिश्चयं ज्ञात्वा सीताविश ल्याद्या रामलक्ष्मणपत्न्यो वैराग्यं विस्मारयितुकामा भरतस्य जलक्रीडाविनोदार्थमर्थयांचक्रिरे, तासामाग्रहेण भरतः सांतःपुरो विरक्तोऽपि मुहूर्तमेकं क्रीडासरसि चिक्रीड, जलक्रीडां कृत्वा जलाच्च निर्गत्य भरतः क्रीडासरस्तीरे यावदस्थाद्राजहंसवत्तावत्स्तंभमुन्मूल्य भुवनालंकारो हस्ती तत्राययौ, मदांधोऽपि स हस्ती भरतं दृष्ट्वाऽमदोऽभूत्, भरतोऽपि भुवनालंकारं गजेंद्रं दृष्ट्वा परमां मुदमवाप, तदा रामसौमित्री उपद्रवकारिणं गजेंद्रं ज्ञात्वा तं सामंतैर्बंधयामासतुः, रामाज्ञया हस्तिपकैः सामंतैश्च संभूय स भुवनालंकारो गजेंद्र आलानस्तंभे बद्धः. इतश्चायोध्यायां देशभूषणकुलभूषणनामानौ मुनी आगतौ. तौ चोद्याने समवसृतौ श्रुत्वा रामलक्ष्मणाद्या भ्रातरोऽपराजितासुमित्राद्या मातरश्च सपरिच्छदा वंदितुं प्रययुः. तौ साधू वंदित्वा देशनां च श्रुत्वा श्रीरामो मुनिं पप्रच्छ, भो मुने! भुवनालंकारो नाम मम करी भरतेक्षणात्कथममदोऽजनि, एवं देशभूषणो नाम केवलिमुनी रामे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ए पृष्टो भरतभुवनालंकारगजयोः पूर्वभवानाह, भो रामचंद्र! श्रूयतां? पूर्वं ऋषभदेवेन सार्धं चत्वारः सहस्रा राजानः प्राव्रजन्, ते तु स्वामिनि ऋषभदेवेऽनाहारे कृतमौने विहारिणि निर्विण्णा जज्ञिरे. आहारमलभमानास्ते सर्वेऽपि वनमध्ये तापसा जाताः. तेषु चतुःसहस्रतापसेषु प्रह्लादसुप्रभतापसयोर्द्वौ पुत्रौ चंद्रोदयसूरोदयनामानौ, तयोर्मध्ये चंद्रोदयो भवं भ्रांत्वा गजपुरे नगरे हरिमितराज्ञश्चंद्रलेखायां भार्यायां कुलंकरनामा पुत्रो जातः. सूरोदयोऽपि तत्रैव नगरे विप्रकुले विश्वभूतेर्द्विजन्मनोऽग्निकुंडायां भार्यायां श्रुतिरतिर्नामा पुत्रो जातः.

क्रमेण स कुलंकरो राजा जातः, स चैकस्मिन् दिने तापसाश्रमं गतः. तत्र तापसाश्रमेऽवधिज्ञानी अभिनंदननामा मुनिः समागतः, तेन मुनिना च काष्टमध्ये दह्यमानः पन्नगोऽवधिज्ञानेन दृष्टः, तदा तेन ज्ञानिना तापसाय प्रोक्तं भो तापस! तव पंचाग्निसाधनं जीवदयां विना वृथैव. तद्वचो राज्ञा श्रुतं. काष्टं विदार्य च पन्नगो निष्काशितः, मुनिज्ञानेन राजा विस्मितः, वैराग्याच्च कुलंकरो राजा दीक्षासज्जोऽभूत्, तावता पूर्वभवमित्रेण विप्रेण श्रुतिरतिनाम्ना पुरोहितेन स निषिद्धः, स्वामिन् वृद्धावस्थायां दीक्षा गृह्यते, इत्याद्युक्त्वा स निवारितः, राजापि तद्गिरा भग्नदीक्षोत्सा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ह्रोऽजवत्, क्रमेण च राज्यं करोति, एवं च राज्यं कुर्वाणस्य तस्य राज्ञः कालो याति. क्रमेण तस्य कुलंकरराज्ञो राज्ञी श्रीदामा श्रुतिरतिपुरोधसा सह जोगासक्तासीत्, तत्स्वरूपं किंचिद्राज्ञा ज्ञातं, पुरोधसापि चिंतितमहमन्यायं कुर्वन् राज्ञा ज्ञातः, तर्हि न ज्ञायते राजा मां किं करिष्यति? अतो राजानं मारयामि, इति विचिंत्य तेन सा श्रीदामा राज्ञी जाषिता यदावयोः स्वरूपं राज्ञा ज्ञातं, अतो यावद्राजावां न हंति तावत्त्वं राज्ञो विषं देहि? तत्पुरोहितवचनं निशम्य तयापि पापिन्या श्रीदामाराज्ञ्या राज्ञे विषं दत्तं, तेन विषेण कुलंकरो राजा मृतः, धिक्स्त्रीणां निर्दयत्वं. अहो तासामसमीक्षितकारित्वं! यतः—विश्वसेन्न हि सर्पस्य । खड्गपाणेर्न विश्वसेत ॥ स्त्रियश्च चलचित्ताया । नृपस्यापि न विश्वसेत् ॥ १ ॥ कवयः किं न पश्यंति । किं न जानंति योगिनः ॥ मद्यपाः किं न जल्पंति । किं न कुर्वंति योषितः ॥ २ ॥

इतश्च स श्रुतिरतिपुरोहितोऽपि तस्मिन्नेव दिने विद्युत्पातेन मृतः, एवं तावुजावप्येकस्मिन् दिने मृत्वा नरकं गतौ. आयुःपर्यंते जजावपि नरकादुध्धृत्य चिरं जवं ज्रेमतुः. एवं तिर्यग्योनिषु नरकेषु नानायोनिषु च ज्रांत्वाऽकामनिर्जरया कर्माणि क्षिप्त्वा यत्र तावुत्पन्नौ तदाह—राजगृहे न·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गरे कपिलनाम्नो विप्रस्य सावित्र्यां पत्न्यां विनोदरमणनामानौ द्वौ युग्मिनौ पुत्रौ जातौ, एकस्मिन् समये रमणो वेदमध्येतुं देशांतरं गतः, स वेदशास्त्रं पठित्वा प्रभाते स्वगृहंप्रति यास्यामीति ध्यात्वा राजगृहनगराद्बहिरेकस्मिन् यक्षमंदिरे सुखेन सुप्तः, तदा विनोदभार्या शाखानाम्नी तन्नगरवासिदत्तेन ब्राह्मणेन समं कृतसंकेतैकाकिनी निशायां तस्मिन्नेव यक्षमंदिरे समागात्, तदनु विनोदोऽपि तत्रागात्, दृष्ट्वा च तत्र स्वभार्यां तेन चिंतितं पश्यामि यदेषा किं करोतीति. तावत्तया दत्तबुद्ध्या स रमण उत्थापितः, रमणोऽपि तूष्णितस्तया सह रेमे. तत्पतिना विनोदेन खड्गेन रमणो हतः, शाखयापि रमणबुद्ध्या विनोदो निजपतिर्मारितः, एवं तौ द्वावपि मृत्वा नरके गतौ, चिरकालं च संसारं भ्रांत्वा यत्रोत्पन्नौ तदाह—

विनोदो राजगृहे नगरे व्यवहारिसुतो धननामा जातः, रमणोऽपि बहून् भवान् भ्रांत्वा धनपत्न्या लक्ष्मीनाम्न्याः पुत्रो जातो भूषणनामा, एवं तावुभावपि पितृपुत्रत्वेनोत्पन्नौ. क्रमेण वर्धमानः स भूषणो धनेन पित्रा द्वात्रिंशद्दिव्यकन्यका एकस्मिन् दिने परिणायितः. स च ताभिः पत्नीभिः समं क्रीडन् स्वगृहमूर्ध्नि सुखमनुभवन्नास्ते. तत्र निशायास्तूर्ये यामे श्रीधरस्य महामुनेः केवलज्ञा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नमुत्पेदे, सुरैश्च केवलमहिमा विदधे. तदा स नृपणाभिधो धनपुत्रो जातधर्मपरिणामः स्वगृहादु त्तीर्य तं केवलिनं मुनिं वंदितुमचालीत्. मार्गे गच्छन् सर्पेण दष्टो मृत्वा देवलोके देवो जातः. त तश्च्युत्वात्र जंबूद्वीपे पूर्वमहाविदेहे रत्नपुरे नगरेऽचलनामा चक्री, हरिणीनाम्नी तस्य राज्ञी, तस्याः कुक्षौ सुतत्वेनोदपद्यत. क्रमेण जातस्य तस्य प्रियदर्शन इति नाम दत्तं. ततो वृद्धिं प्राप्तोऽसौ ध र्मतत्परः प्रव्रजितुकाम आसीत्, परं पित्राचलचक्रिणा स त्रीणि कन्यासहस्राणि परिणायितः, ता भिः सह स वैषयिकं सुखं भेजे, परं गृहवासेऽपि स तपसि लीनोऽनेकानि तपांसि विदधाति, य थैकावलिकनकावलिश्रेणिप्रतरघनमुक्तावल्यांबिलवर्धमानेत्याद्यनेकतपांसि तप्यमानस्य तस्य चतुःष ष्टिसहस्राणि वर्षाणि जातानि. एवं श्रावकव्रतस्थोऽपि स धर्मं समाराध्य मृत्वा च ब्रह्मदेवलोके सु रोऽभवत. धनोऽपि मृत्वा संसारं भ्रांत्वा पोतनगरे शकुनिनाम्नो विप्रस्याभिमुखा स्त्री, तयोः पुत्रो मृदुमतिनामा जातः. स च दुर्विनीतत्वात्पित्रा गृहान्निर्वासितः क्रमेण धूर्तो जातः, द्यूतक्रीडायां च क्रीडन् स केनापि न जीयते, द्यूतेन रममाणश्च स द्रविणं धनमुपार्जयत. वसंतसेनया वेश्यया सार्धं भोगान् भुंजानोऽसौ मायां करोति. अंते स श्रामण्यं गृहीत्वा ब्रह्मलोके सुरोऽभवत. ततश्च्यु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वा पूर्वभवकृतमायादोषतो वैताढ्यपर्वते भुवनालंकारनामायं श्वेतभद्रजातिकः कुंजरो जातः. प्रियदर्शनजीवोऽपि । ब्रह्मलोकात्परिच्युतः ॥ बभूव भवतो भ्राता । भरतोऽयं महाभुजः ॥ १ ॥ भरतालोकनादस्य गजस्य जातिस्मृतिरुत्पन्ना, तेन स गतमदो जज्ञे. इति पूर्वभवान् श्रुत्वा ततोऽप्यधिकं विरक्तो जातो भरतो गजसहस्रेण सहितो व्रतं गृहीत्वा संयमं च प्रपाल्योत्पन्नकेवलो मोक्षमियाय. ते सहस्रराजानोऽपि चिरं व्रतं पालयित्वा नानालब्धिमंतश्च भूत्वा केवलज्ञानं लब्ध्वा शिवपदमासदन्. भुवनालंकारगजोऽपि संस्मृतजातिस्मरणो वैराग्याद्विविधतपो विधाय प्रपन्नानशनो मृत्वा पुनर्ब्रह्मलोके सुरोऽभवत. व्रतं भरतमातापि । कैकेयी समुपाददे ॥ पालयित्वा निःकलंकं । प्रपेदे पदमव्ययं ॥ १ ॥ इति भरतभुवनालंकारयोः पूर्वभवकथानकं ॥

अथ भरतेऽपि प्रव्रजिते भूचरखेचरराजानो भक्तितोऽभिषेकाय राममभ्यर्थयांचक्रिरे, रामेणोक्तमयं मद्बांधवो लक्ष्मणो वासुदेवो राज्याभिषेकेऽभिषिच्यतां. ततस्ते राजानो लक्ष्मणं वासुदेवं राज्येऽभ्यषिंचंत, तथा बलदेवाभिषेकं रामस्याभ्यषिंचंत. एवं तौ द्वावपि राज्यं कुर्वाणौ सुखेनास्तां. राज्यप्रदानसमये चाकाशे देवैराघोषणा चक्रे, यथा जयेतामम् अष्टमौ बलदेववासुदेवौ बलवंतौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रामलक्ष्मणौ. श्रीरामो राक्षसद्वीपं क्रमागतं बिभीषणाय तथा कपिद्वीपं सुग्रीवायादात्, श्रीपुरं हनूमतेऽदात, पातालंलंकां विराधायादात, ऋक्षपुरं नीलाय, हनूपुरं प्रतिसूर्याय, संगीतपुरं रत्नजटिविद्याधरायादात, भामंडलाय च वैताढ्ये रथनूपुरचक्रवालनगरमदात. एवं सर्वेषां राज्ञां यथायोग्यं राज्यानि दत्वा शत्रुघ्नबांधवंप्रत्यूचे, भो शत्रुघ्न! यस्तुभ्यं रोचते तं देशं त्वमुररीकुरु? शत्रुघ्नेन मथुरा याचिता. रामो जगाद हे वत्स! सा मथुरा दुःसाध्या वर्तते, तत्र मधुराज्ञः शूलं चमरेंद्रेण पुरार्पितं, तच्छूलं योजनसहस्रं गत्वा दूरात्परबलं सर्वं निहत्य पुनर्मधुराज्ञः करेऽभ्येति, अतः सा मथुरा दुःसाध्या वर्तते, शत्रुघ्नो रामं जगाद हे श्रीराम! स मधुर्मयाऽपशूलं योधनीयः, श्रीरामेणोक्तं भो बांधव! स मधुस्त्वयाऽप्रमत्तमपशूलश्च योधव्यः. एवं शिक्षां दत्वा मथुरां चापि दत्वा शत्रुघ्नो विसृष्टः. रामेण कृतांतवदनसेनानी शत्रुघ्नेन सह प्रेषितः, लक्ष्मणोऽप्यग्निमुखप्रमुखान् बाणान् दत्वार्णावावर्तधनुः समारोप्य शत्रुघ्नं दत्वैवमवादीत, अस्य धनुषो नादेन ते विजयो भविष्यति, अतस्त्वं गच्छ? ते पंथानः कुशलिनः संतु.

इति कथयित्वा लक्ष्मणेनापि विसृष्टः शत्रुघ्नो मथुरांप्रति यातिस्माविच्छिन्नप्रयाणैः, मार्गे गच्छन्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मथुरासमीपे यमुनानदीतटे स स्वबलं न्यस्थात्. तदा गर्वान्वितेन मधुनृपेणैवं न ज्ञातं यदयं म- मोपर्यागतः, किंतु स्वेछया कुत्रचिद्याति, इति विचार्य मधुराजा स्वेछया मथुरापूर्वस्थिते कुबेरोद्या- ने जयंत्या पट्टराज्ञ्या सार्धं क्रीडापरो वर्तते. शत्रुघ्नेन पूर्वं वानराः प्रेषिताः. तैश्च तत्स्वरूपं शत्रुघ्ना- योक्तं यथा मधुनरेंद्रो वनमध्ये जयंत्या पट्टदेव्या समं क्रीडतीति. तथा शूलं च तस्यास्त्रागारे व- र्तते. तत् श्रुत्वा छलज्ञः शत्रुघ्नो रात्रौ मथुरायां प्राविशत्. स्वकीयबलैश्च मधुं तत्रैव रुरोध. ततः शत्रुघ्नो मधुपुत्रं लवणरणं संग्रामे जघान. पुत्रवधोदंतं श्रुत्वा वृद्धोऽपि स मधुराट् क्रुद्धो धावितः, धनुरास्फाल्य च तेन दशरथपुत्रेण सह स युयुधे. यथा—अन्योन्यमस्त्रैरस्त्राणि । छिंदानौ तावुभा- वपि ॥ शस्त्राशस्त्रि प्रचक्राते । चिरं देवासुराविव ॥ १ ॥ धनुः समुद्रावर्तं चा—ग्निमुख्यांश्च शि- लीमुखान् ॥ सौमित्रिदत्तानस्मार्षी—च्चुर्यो दशरथात्मजः ॥ २ ॥ ततश्चोपवने गत्वा—र्चिजयं कृत्वा- ग्निपत्रिभिः ॥ स जघान मधुं वीरं । शार्दूलमिव लुब्धकः ॥ ३ ॥ तद्बाणघातविधुरो । मधुरेवमचिं- तयत ॥ शूलं पाणौ न मेऽभ्यागा—त्तदतो लक्ष्मणानुजः ॥ ४ ॥ इति चिंतयित्वा भावचारित्रं प्र- तिपद्यानशनं विधाय नमस्कारपरायणो मधुराट् मृत्वा सनत्कुमारे देवलोके महर्द्धिको देवोऽभूत्,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मधुदेहस्योपरिष्टात्तद्विमानवासिसुराः पुष्पवृष्टिं व्यधुः, मधुदेवो जयत्वित्याघोषणां सुराश्चक्रुः, देवता-रूपं तच्छूलं च पुनश्चमरेंद्रांतिके गतं, गत्वा च शूलाधिष्ठायिकेन देवेनोक्तं मधुराजा शत्रुघ्नेन बलं कृत्वा मारितः, ततः स्वमित्रमधुवधामर्षाच्चमरेंद्रः स्वयं शत्रुघ्नमारणाय प्रचचाल, तदा वेणुदारिणा तार्क्ष्यस्वामिना पृष्टं भो चमरेंद्रासुर! त्वं क्व यास्यसि? चमरेंद्रेणोक्तं मधुमित्रहंतारं शत्रुघ्नं मथुरा-स्थितंप्रति यास्यामि, वेणुदार्यवदद्भो चमरेंद्र! धरणेंद्राद्रावणेन प्राप्तामोघविजयानाम्नी शक्तिः पुण्य-प्रकृष्टेन सौमित्रिणा निर्जिता, रावणोऽपि च हतः, तदग्रे पत्तिमात्रः स मधुः कियान्? लक्ष्मणादे-शाच्च शत्रुघ्नः समरे मधुमवधीत्, चमर उवाच स्वामिन्! सौमित्रिणा या शक्तिर्जिता तत्कन्यावि-शल्याप्रभावेण, सा तु सांप्रतं परिणीता, तस्याः प्रभावश्चाधुना गतः, अतः शत्रुघ्नं हंतुं यास्यामि, मम मित्रघातकं च घातयिष्यामीत्युक्त्वा चमरेंद्रो रोषारुणलोचनः शत्रुघ्नविषयं ययौ, तत्र सर्वलो-कान् सर्वं राज्यं च सुस्थितं वीक्ष्य तेन चिंतितं, अहो मम मित्रं मधुं हत्वा सर्वेऽपि सुखमनुभवंति, अतः पूर्वमस्य शत्रुघ्नस्य प्रजां पीडयामि, पश्चाच्च शत्रुघ्नं पीडयिष्ये इति बुद्ध्या तेन पापिना चमरें-द्रेण देवेन शत्रुघ्नराज्ये प्रजासु विविधा व्याधयः कृताः, तदा शत्रुघ्नस्य राज्ञः कुलदेवतया प्रोक्तं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वमितोऽयोध्यां याहि रामलक्ष्मणसंनिधौ, यत एष चमरदेवस्तव देशं व्याधिना पीडयिष्यति. तत कुलदेवतावचनं श्रुत्वा शत्रुघ्नोऽयोध्यायां रामलक्ष्मणसमीपे समागात. तत्र च रामसमीपे सुखेनास्थात्, तत्र च रामलक्ष्मणपुण्यप्रभावाच्चमरस्य किमपि न चलति. पुण्यं सर्वत्र सुखाय प्रवर्तते. यतः—वने रणे शत्रुजलाग्निमध्ये । महार्णवे पर्वतमस्तके वा ॥ सुप्तं प्रमत्तं विषमं स्थितं वा । रक्षंति पुण्यानि पुरा कृतानि ॥ १ ॥

तस्मिन् समये विहरंतौ देशभूषणकुलभूषणनामानौ केवलिमुनी अयोध्यायां समागतौ, रामलक्ष्मणशत्रुघ्नास्तौ मुनी ववंदिरे, ततो रामेण स मुनिः पृष्टो स्वामिन्! केन हेतुना शत्रुघ्नेनान्यां राजधानीं दीयमानामप्यनिच्छता मथुरा मार्गिता. पुनर्मथुरां गत्वा मधुराजं हत्वा महता कष्टेन मथुरा गृहीता, एवं मथुराया उपरि कोऽस्य प्रतिबंधः? तदा देशभूषणमुनिनोक्तं शत्रुघ्नपूर्वभवकथानकं यथा, भो रामचंद्र श्रूयतां— अयं तव भ्राता शत्रुघ्नजीवो मथुरायामनेकशो मृत्वा मृत्वोत्पन्नः, एकस्मिन भवे स श्रीधरनामा रूपवान् साधुसेवको विप्रोऽभूत्, सोऽन्यदा राजमार्गे गच्छन् राजमहिष्या ललिताख्यया दृष्टः, तद्रूपेण मोहितया तया राज्ञ्या रंतुकामया निजदासीं प्रेष्य स आ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नायितः, तेन सह च यावता सा किंचिज्जल्पति तावदतर्कितो राजा तत्र समागात. राजानमागतं ज्ञात्वा स्त्रीचरित्रचतुरया राज्ञ्या पूत्कृतं भो भो सेवकाश्चौरोऽयं धनं गृहीत्वा याति, तत् श्रुत्वा राज्ञा स चौरो ग्राहितः, राजादेशाच्च सेवकैः स चौरः शूलिकां नीतः, तावत्कल्याणमुनिना प्रतिज्ञातव्रतोऽसौ मोचितः, सोऽपि संयमं लात्वा तीव्रं तपस्तप्त्वानशनेन च मृत्वा सौधर्मे देवलोके गतः. ततोऽपि च्युत्वा स मथुरापुर्यां चंद्रप्रभराज्ञः कांचनप्रभाराज्ञ्याः कुक्षावचलनामा पुत्रो जातः, चंद्रप्रभराज्ञश्च सोऽत्यंतवल्लभ आसीत्. अष्टपुत्राणामुपरि जातः सर्वेषां भ्रातॄणां कनिष्ठः परं सकलगुणैर्ज्येष्ठत्वाद्राजा तस्मै राज्यं दातुमना वर्तते. तत्स्वरूपमन्यैः पुत्रैर्ज्ञातं, ततस्तेऽष्टावपि भ्रातरस्तमचलं व्यापादयितुमुपायानकुर्वन्.

एवं तैश्चिंतितं तत्स्वरूपं केनचिन्मंत्रिणाऽचलाग्रे निवेदितं. तदाचलो मरणभीत्या गृहं मुक्त्वा राज्यं च त्यक्त्वान्यत्र गतो ग्रामांतरं भ्रमन् मार्गे गच्छन्नेकस्मिन् दिने गरीयसा कंटकेन वामपादे विद्धो भूमौ पतितो महता स्वरेण क्रंदति, अहो विधिविलसितं! यतः—जं चिय विहिणा लिहियं । तं चिय परिणमइ किं विगप्पेण ॥ इइ जाणिऊण धीरा । विहुरेवि न कायरा हुंति ॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं विचार्याचलश्चिंतयति, रे आत्मंस्त्वं कातरो मा भव? धीरश्च भव? यावत्स एवं वक्ति तावत् श्रावस्तिवासिना एनांकनाम्ना पुरुषेण काष्टभारं त्यक्त्वाचलस्य कंटको निष्कासितः, हृष्टोऽचल एनांकायैवमवोचद्यदि मथुरापुर्यामचलनृपं शृणोसि तदा तत्र समागछेः. तव चेप्सितं दास्ये. यतस्त्वं मम परमोपकार्यसि, इत्युक्त्वा विसृष्ट एनांकः स्वस्थानं गतः, राजपुत्रोऽचलोऽपि ततश्चलितः क्रमेण कौशांब्यां नगर्यां समागतः, तत्र सिंहगुरोः पुर इंद्रदत्तनृपं धनुरभ्यासं कुर्वंतमैक्षत. अचलोऽपि सिंहेंद्रदत्तयोः स्वां धनुर्विद्यामदर्शयत्. तत्कलया च स इंद्रदत्तो राज्ञ रंजितः. यतः—विद्या नाम नरस्य रूपमधिकं प्रछन्नगुप्तं धनं । विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ॥ विद्या बंधुजनो विदेशगमने विद्या परं दैवतं । विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः ॥ १ ॥ तुष्टेन नृपेण निजपुत्री त्रिभुवनसुंदरी तस्याचलस्य परिणायिता. सोऽचलस्तया राजपुत्र्या सह सुखमनुभवन्नास्ते. ततः श्वशुरराज्ञा तेनेंद्रदत्तेन देशसाधनकृते प्रेषितः सोऽचलः पुण्यवाननेकदेशान् साधयामास यथा—पूर्वस्यां दिशि गौडकन्यकुब्जकलिंगांगवंगकुरंगेत्यादीन्, पश्चिमदिशि कोंकणालंभसौराष्ट्रलाटार्बुदादीन्, दक्षिणस्यां दिशि गूर्जरसिंधुसपादलक्षकेकाणादीन्, उत्तरस्यां च

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मलयसिंहलेत्यादीन् साधयन् प्रकृष्टबलान्वितो मथुरामागात. तत्र च सोऽष्टभिरग्रजैः सह भृशं युयुधे, भानुप्रभादीनष्टावपि बध्ध्वा स स्वबलेऽनैषीत, पुण्येन जयः, पुण्यं च सर्वत्र प्रधानं, यतः—पुण्यैः संभाव्यते पुंसा—मसंभाव्यमपि क्षितौ ॥ तेरुर्मेरुसमाः शैलाः । किं न रामस्य वारिधौ ॥१॥

ततश्चंद्रप्रभो राजाष्टावपि स्वान् पुत्रान् मोचयितुमचलांतिके स्वमंत्रिणः प्रैषीत्. ते मंत्रिणोऽप्यचलांतिके गत्वा यावद्विज्ञपयंति तावत्तेनाचलेन ते मंत्रिण उपलक्षिताः, मंत्रिभिरप्यचल उपलक्षितः, अचलेनापि स्ववृत्तांतस्तेभ्यः कथितो यथा गृहान्निर्गमनानंतरं यथा राज्ञेंद्रदत्तेन पाणिग्रहणं कारितं, यथा देशादिकं दत्तं, यथा देशसाधनकार्ये स निर्गतः, यथा च संग्रामे भानुप्रभादयोऽष्टावपि स्वभ्रातरो बद्धाः, एवं सर्वोऽपि वृत्तांतस्तेन मंत्रिणामग्रे निवेदितः. ततस्ते मंत्रिणः सर्वमपि तं वृत्तांतं स्वराज्ञे चंद्रप्रभायाचख्युः. अथ स चंद्रप्रभो राजा स्वयं तत्र गत्वा पुत्रं च सन्मानितवान्, पुत्रोऽपि पितुः पादौ प्रणम्य स्वापराधं क्षमयामास. ततो हृष्टश्चंद्रप्रभो गजे समारुह्य निजोत्संगे च तं लघुपुत्रमचलं निधायान्यैरष्टभिः पुत्रैः परिवृतो मथुरापुर्यां प्राविशत. क्रमेण स चंद्रप्रभो राजा तं निजं लघीयांसं पुत्रमचलं निजे मथुराराज्ये संस्थाप्य स्वयं दीक्षामंगीचक्रे. अचलो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजा स्वभ्रातॄणां पृथक्पृथक् राज्यानि दत्वा निजादृष्टसेवकांश्चक्रे. सुजनो विकृतिं न याति. यतः—सुजनो न याति विकृतिं । परहितनिरतो विनाशकालेऽपि ॥ छेदेऽपि चंदनतरुः । सुरभयति मुखं कुठारस्य ॥ १ ॥

अथैकस्मिन् दिने स कंटकोद्धारकारक एनांकोऽचलेन राज्ञा दृष्टः स्वांतिके च समानायितः, राज्ञा प्रोक्तं भो एनांक मार्गय तुभ्यं यद्रोचते तद्ददामि, तेन श्रावस्ती मार्गिता. यतस्तस्यां तद्गृहमासीत्. राज्ञा तस्य श्रावस्ती दत्ता, तस्यां नगर्यां च स एनांकश्छत्रचामरौ दत्वा तेन राज्ये स्थापितः, एवं स एनांकश्च राजा जातः, अहो सुजनत्वमहो गुणित्वं च! यतः—विरला जाणंति गुणा । विरला पालंति निद्धणे नेहं ॥ विरला परकज्जकरा । परदुक्के दुक्खिया विरला ॥ १ ॥ एवं तौ द्वावेनांकाचलावद्वैतसौहृदौ चिरं राज्यं प्रपाल्य प्रांते समुद्राचार्यसन्निधौ प्राव्रजतां. द्वावपि संयमं प्रपाल्य मृत्वा कालेन ब्रह्मदेवलोके सुरोत्तमावभूतां. ततश्च्युत्वाचलजीवोऽयं तवानुजः शत्रुघ्नोऽभूत्. एवं शत्रुघ्नेन प्राग्जन्ममोहितेन मथुरा मार्गिता, मधुराजानं च हत्वा शत्रुघ्नेन सा मथुरा गृहीता. एनांकजीवोऽपि ब्रह्मदेवलोकाच्च्युत्वायं तव सेनानी कृतांतवदननामाभूत्. इति शत्रुघ्नकृतांतवदन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सेनान्योः कथानकं ॥
इतश्च प्रजापुरनगरे श्रीनंदनस्य राज्ञो धारिण्यभिधायां पत्न्यां क्रमादष्टौ सुता अभवन्, तेषां नामान्यमूनि—सुरनंद, श्रीनंद, श्रीतिलक, सर्वसुंदर, जयवंत, चमर, अश्वत्र, जयमित्राश्चेति. एकस्मिन् दिने श्रीनंदनो राजा वैराग्यमापन्नो मासजातमष्टमं सुतं राज्ये न्यस्य मंत्रिणः शिक्षां दत्वा तैः सप्तपुत्रैः सह प्रीतिकरस्य गुरोः पार्श्वे दीक्षां जगृहे, दुस्तपांसि तप्त्वा च स राजर्षिर्मोक्षं ययौ. सुरनंदादयः सप्त पुत्रास्तपःशक्त्या समुत्पन्नलब्धयो जंघाचारणविद्याचारणाद्यनेकलब्धिमंतः पृथिव्यां विहरंतो मथुरासमीपपर्वतगह्वरेषु चतुर्मासं तस्थुः. ते सप्तर्षयः षष्ठाष्टमादीनि तपांसि तप्यमानाः पुनर्गगनाध्वना गत्वा दूरदेशेषु ग्रामनगरादिषु विहृत्य पारणकं कुर्वंति, पुनस्तत्र गुहाद्वारे च समायांति, तन्मुनितपःप्रभावाच्चमरकृतोपद्रवादिव्याधिः क्षयं ययौ. पारणाय चान्यदा चतुर्मासीमध्येऽयोध्यायां ते साधवो ययुः, अर्हद्दत्तश्रेष्ठिनो गृहे भिक्षार्थं च प्राविशन्, तदार्हद्दत्तेन तेऽवज्ञाता यथा के यूयं? कुतः समागताः? चतुर्मासमध्ये कथं समागताः? यूयं पाखंडिनो मुनिवेषधारकाः, इत्यवज्ञातास्ते मुनयो गगनाध्वना पुनर्मथुरायां समागताः. एष वृत्तांतस्तत्रस्थमुनीनामग्रेऽर्हद्दत्तेनोक्तो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथेदृशा मुनयो गगनाध्वनात्रागता आसन्, परमस्माभिर्न मानिताः, तदा तत्रस्थमुनिभिरुक्तं भवद्भिरेतद्भव्यं न कृतं, यत्ते मुनयो न वंदिता न स्तुता न प्रतिलाभिताश्च. एतन्मुनिवचः श्रुत्वार्हद्दत्तः पश्चात्तापं व्यधात्.

ततः सोऽर्हद्दत्तः कार्तिकश्वेतसप्तम्यां तेषां मुनीनां वंदनार्थं मथुरां ययौ, तत्र चैत्यान्यर्चयित्वा तान् सप्तर्षीनवंदत. पूर्वकृतावज्ञां च क्षमयामास. तेषां सप्तर्षीणां तपःप्रभावात्स मथुरादेशः शांतरोगो जातः. शांतरोगं स्वमंडलं ज्ञात्वा शत्रुघ्नोऽपि स्वां मथुरां पुरीं समाययौ. प्रत्यहं च तान् साधून् वंदते, साधवोऽपि धर्मोपदेशं ददाति. अथैकस्मिन् दिने शत्रुघ्नेनोक्तं भो मुनयो यूयमप्युपकारिणो जाताः, युष्मत्तपःप्रसादास्मद्देशे शांतिर्जाता, अतो यूयं पुनर्लोकानुग्रहबुद्ध्या कतिचिद्दिनान्यत्र तिष्टत? मुनयोऽप्यूचुर्हे राजेंद्र! गतः प्रावृट्कालः, अतो मुनीनामेकत्रावस्थाने स्थातुं न कल्पते, यतः—स्त्री पिहरी नर सासरे । संयमिया सहवास ॥ ए तीने असुहामणा । जइ मंडे थिरवास ॥ ॥ १ ॥ अतो वयं विहरिष्यामः, किंच हे राजन्! त्वं स्वगृहे आर्हतं बिंबं स्थापय? तद्बिंबमाहात्म्यतोऽस्यां पुर्यां शांतिर्भविष्यति, यतः—दालिद्दं दोहग्गं । कुजाइकुसरीरकुगइकुमइओ ॥ अव-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माणरोगसोगा । न हुंति जिणबिंबकारिणं ॥ १ ॥ इत्युक्त्वा ते सप्तर्षयो गगनाध्वना समुत्पत्यान्यत्र ययुः. शत्रुघ्नोऽपि यथा मुनिभिरुक्तं तथा चक्रे तत्क्षणादेव लोकाश्च निरामया जाताः. अहो जिनबिंबानां महामुनिवचनस्य च माहात्म्यं, येन सर्वोऽपि लोकः सुखी जातः, ततस्तन्निवासिलोकेन तेषां सप्तर्षीणां चतसृषु दिक्षु रत्ननिर्मिता मुनिप्रतिमाः कारापिताः. इति सप्तर्षिकथा. ॥

इतश्च वैताढ्यगिरौ दक्षिणश्रेणिभूषणे रत्नपुरे रत्नरथो राजाभवत्, तस्य राज्ञश्चंद्रमुखीनाम्नी पट्टराज्ञी, तयोः पुत्री मनोरमानाम्न्युद्यौवना रूपेणापि च मनोरमासीत्. एकस्मिन् दिने यौवनमुखीं तां दृष्ट्वा राज्ञश्चिंतोत्पन्ना. यथैषा कन्यका मया कस्मै देया? कोऽस्या अनुरूपो वरो भावीति स चिंतापरो जातः, यतः—कुलं च शीलं च सनाथता च । विद्या च वित्तं च वपुर्वयश्च ॥ वरे गुणाः सप्त विलोकनीया—स्ततः परं भाग्यवशा हि कन्यका ॥ १ ॥ यावता नृप एवं चिंतयति तावत्तत्र नारदः समागात्, तेन नारदेनोक्तं तव पुत्र्या मनोरमाया योग्यो वरो लक्ष्मणो वर्तते, तत श्रुत्वा रत्नरथो राजा पूर्ववैरतः कुपितः, यतोऽनेन लक्ष्मणेनास्य रत्नरथस्यानेके विद्याधराः पूर्वं हताः, तेन वैरेण नारदोपरि कुपितो रत्नरथो भ्रूसंज्ञया स्वान् पत्तीन् समादिशद्यथा—विटोऽयं नार

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दः कुप्यतां? कुट्टनायोचितान् तान् सेवकान् दृष्ट्वा धीमान्नारद आकाशे पक्षिवत्समुत्पत्य लक्ष्मणांतिके गतः, लक्ष्मणेनाभ्युत्थानादिना सन्मानितः पृष्टश्चागमनकारणं. नारदोऽप्युवाच भो लक्ष्मणाहं वैताढ्यपर्वते रत्नपुरे नगरे गतः, तत्र मया रत्नरथराज्ञः पुत्री दृष्टा, परं नेदृशी काचिदन्या देवकन्या सुंदरी वा विद्याधरी वा, एवं वर्णयित्वा तस्याः कन्याया रूपं पट्टे लिखित्वा लक्ष्मणाय दर्शयामास, स्वकुट्टनादिवृत्तांतमपि च कथयामास, लक्ष्मणोऽपि पट्टलिखितरूपदर्शनान्मनोरमांप्रति जातानुरागो रामेण सहानेकैर्विद्याधरसैन्यैः परिवृतः पुष्पकविमानारूढः क्षणेन रत्नपुरे नगरे समागात्. रत्नरथो विद्याधरराजा तेन संग्रामे जितः. पश्चात् श्रीरामलक्ष्मणपादयोः पतित्वा स्वापराधं च क्षामयित्वा रत्नरथो राजा श्रीरामचंद्राय श्रीदामां कन्यां लक्ष्मणाय च मनोरमां कन्यां ददौ. तां कन्यां परिणीयान्या अपि विद्याधरकन्याः परिणीय वैताढ्यदक्षिणश्रेणिं जित्वा त्वयोऽप्ययोध्यामागत्य तौ रामलक्ष्मणौ सुखेन क्ष्मां पालयंतौ तस्थतुः.

षोडशांतःपुरवधू—सहस्रं लक्ष्मणस्य तु ॥ महिष्योऽष्टाभवंस्तत्र । विशल्या रूपवत्यपि ॥
॥ १ ॥ वनमाला च कल्याण—मालिका रतिमालिका ॥ जितपद्माभयवती । चाष्टमी तु मनोरमा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ २ ॥ तासामष्टानां सार्धे द्वे शते पुत्रा बभूवुः, तेषां नामानि च श्रीधरपृथ्वीतिलकश्रीकेशीत्यादी- नि. रामस्यापि चतस्रो महादेव्योऽभवन्, तासां नामानि यथा श्रीसीताप्रभावतीरतिनिभाश्रीदामा- श्चेति चतस्रो रामपत्न्यः, तासां पुत्रा अप्यनेकशोऽभवन्. सीतैकदा ऋतुस्नाता । निशांते स्वप्नमैक्ष- त ॥ च्युतौ विमानाच्छरभौ । प्रविशंतौ निजानने ॥ १ ॥ तदैव सीतया श्रीरामचंद्राग्रे गत्वा निवे- दितं स्वामिन्मया स्वप्ने मुखे प्रविशंतौ विमानाच्च्युतौ शरभौ दृष्टौ, तयोः किं फलं भावि? श्रीरामे- णोक्तं हे प्रिये! तव वीरौ सुतौ भाविनौ. तत श्रुत्वा सीता परमानंदिता गर्भं दधार. रामस्य पूर्व- मेव सीतात्यंतं वल्लभासीत्, आसन्नगर्भा च विशेषतो वल्लभा बभूव, किं बहु कथ्यते? सीना तल्लोच- नानंदचंद्रिका जाता. इतश्च मायाविन्य ईर्ष्यालवः सपत्न्यः सीतामित्यब्रुवन्, हे सखि सीते! की- दृग्रूपः स रावणोऽभूत? तं लिखित्वा प्रदर्शय? सीताप्यूचे मया स रावणः सर्वांगं न हि दृष्टः, किंतु मया तच्चरणौ दृष्टौ, तर्हि रावणरूपं कथं लिखामि? ततः सपत्न्या प्रोक्तं हे सीते! तर्हि त्वं तस्य पादावप्यालिख? अस्माकं तत्पादयोरीक्षणे महत्कौतुकं वर्तते, इति सपत्न्या प्रोक्ता सीता स- रलस्वभावा रावणस्यांह्री लिलेख, तदा सीतासपत्न्या गत्वा रामचंद्राग्रे निवेदितं, स्वामिन्नेषा सीता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रावणमोहिता रावणांह्री भूमौ लिखित्वा पुष्पादिभिः पूजयति, सुचिरं च निरीक्षते. तस्या एतद्वचनं श्रुत्वा श्रीरामो महामना गंभीरत्वात्सीतादेव्या अनुपलक्षितस्तथैव स्थितः, सर्वा राज्यो निजेर्दासीजनैः सीतादोषं जने प्रकाशयामासुः, प्रायः सपत्नीजना असंतमपि दोषं प्रकाशयंति, तथा प्रायः प्रवादोऽपि लोकनिर्मितो भवति.

अथैकस्मिन् दिने रामेणोक्तं हे सीते त्वां गर्भखेदितां विनोदयितुकामो वसंतः समागात्, तदेहि महेंद्रोद्यानं? सीताप्यूचे हे नाथ! मम दोहद उत्पन्नो वर्तते यदहं देवानुद्यानभवैः सुगंधिभिर्नानापुष्पैः पूजयामि. एवं सीतावचनं श्रुत्वा रामोऽपि महेंद्रोद्यानभवैर्नवीनपुष्पैर्देवानां पूजामकारयत. ततोऽसौ सीतया सह मधूत्सवं पश्यन्नास्ते, अत्रांतरे सीताया दक्षिणं चक्षुरस्फुरत. तदा सीता सशंका रामचंद्राय तत्सर्वमाचचक्षे. रामोऽप्याह हे प्रिये! तव दक्षिणचक्षुःस्फुरणतः किंचिन्नवीनं भविष्यति. ततः सीता रामं प्रोवाच हे स्वामिन्! रावणगृहे दुःखं दत्वा विधिरद्यापि किं संतुष्टो नास्ति? अथ न ज्ञायते स किं करिष्यति? रामोऽपि सीतामुवाच हे देवि त्वं खेदं मोद्वह? अवश्यमेव भोक्तव्ये कर्माधीने सुखासुखे. तद्गच्छ मंदिरे स्वार्थं । देवानामर्चनं कुरु ॥ प्रयच्छ दानं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पात्रेभ्यो। धर्मः शरणमापदि ॥ १ ॥ सीतापि गत्वा सदनं। महेनाथ महीयसा ॥ अर्हतोऽपूजयद्दानं। प्रददौ भावसंयुता ॥ २ ॥ राघवोऽपि वने सकलं दिनं क्रीडां कृत्वा सायमयोध्यां नगरीं समागात्, तावन्महाजनेनागत्यैवं कथितं हे स्वामिन्! वयमभयं प्रार्थयामः, रामेणोक्तं युष्माकमभयं भवतु. प्रोच्यतां यद्भवति तत्तथैव. ततस्तेषां मध्याद् वृद्धमंत्रिणा जयदेवेनोक्तं स्वामिन्! रावणेन सीता हृता, एकाकिनी च षण्मासान् यावत्सा तस्य वेश्मनि स्थिता, तदा स्त्रीलंपटाद्रावणात्स्वशीलं सीतया कथं रक्षितं भविष्यति? परं काममोहितेन रामेण सीता पुनः संगृहीता. राजानं को निवारयतीति लोके सीताया अपयशो जातमस्ति, ततो हे स्वामिन् रामचंद्र! भवता तथा विधेयं यथा शशिसोदरे कुले कलंको नायाति, रामेणोक्तं भो महत्तराः! अहं तथा विधास्ये यथा कुले कलंको न भविष्यतीत्युक्त्वा ते प्रकृतिमहत्तराः श्रीरामचंद्रेण विसृष्टाः.

अथ निशायां रामो निजांश्चरानादिदेश भो सेवका यूयं शृणुत यल्लोका किं वदंतीत्युक्त्वा ते प्रेषिताः, रामोऽपि स्वयं नष्टचर्यां निर्गतः, स्थाने स्थाने वार्तां शृण्वन्नगरमध्ये च बभ्राम, प्रभाते चरैरागत्य मंत्रिवत्तथैव विज्ञप्तं, रामेणापि स्वयं कर्णाभ्यां श्रुतं, यथैकस्य मालाकारस्य गृहपृष्ठे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थितो रामः शृणोति, मालाकारो मालाकारीं वक्ति, हे प्रिये त्वं कुत्र गतासि? तयोक्तमहं सखीगृहे गतासं. मालिकेनोक्तं प्रमदाजनस्य निशायां गमनं न युक्तं, अतस्त्वमेकाकिनी निशायां यदि कस्यचिद्गृहे यास्यसि तदा त्वां गृहान्निष्कासयिष्यामि. तत् श्रुत्वा मालाकार्याह भो प्राणप्रिय! रामपत्नी सीता रावणगृहे षण्मासान् यावत् स्थिता, तथापि रामेण किमपि नोक्तं, तर्हि त्वं किं मम पुनः पुनः कथयसि यन्निशायां न गंतव्यं. किं त्वं रामादप्यधिकः? मालाकारेणोक्तं हे प्रिये रामगृहे एवं भ्राजते. परं मम गृहे त्वेवं न भ्राजते, अतोऽतःपरं यदि निशायां कस्यापि गृहे यास्यसि तदा तव जीवितं नास्तीति तयोर्वार्ता श्रुत्वा श्रीरामचंद्रश्चिंतयति किं करोमि? अहं तु जानामि यत्सीता निष्कलंका, पुरा देवतयोक्तं मुनिनिश्चाप्युक्तं यदेषा सीता महासती, परं लोकापवादादेनां त्यजामीति विचिंत्य रामेण लक्ष्मणाग्रे उक्तं, लक्ष्मणेनोक्तं नगरे पटहं वादयामि यद्यः कोऽपि सीतां सकलंकां कथयिष्यति तं जीवितरहितं करिष्यामि. रामेणोक्तं भो बांधव! एवं कृते जनापवादो भृशं भवेत. पुनर्लक्ष्मणेनोक्तं भो बांधव जनापवादात्सीतां मा त्यज? यतो देवेन मुनिना चाप्युक्तं यदेषा महासती, हे रामचंद्र! अतस्त्वमेनां मा त्यज? एवं लक्ष्मणेनोक्तोऽपि रामः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृतांतवदनं सेनानीमाकार्यावदत्, भो कृतांतवदन! एनां गर्भवतीमपि सीतां रथे समारोप्यारण्ये मुंच? अत्रार्थे त्वया पुनः किंचिदपि न वाच्यं, तदा लक्ष्मणः प्राह यथा—पतित्वा रामपादेषु । बभाषे लक्ष्मणो रुदन् ॥ सीतादेव्या महासत्या—स्त्यागोऽयमुचितो न हि ॥ १ ॥ नातःपरं त्वया वाच्य—मिति रामेण भाषिते ॥ नीरंगच्छन्नवक्त्रोऽगा—त्सौमित्रिः स्वगृहं रुदन् ॥ २ ॥ रामः कृतांतवदनमूचे हे कृतांतवदन! सम्मेतयात्रामिषेण सीतां रथे समारोप्य महाकांतारे मुंच? अथैतदर्थे पुनस्त्वया न पृष्टव्यं.

कृतांतवदनस्तथेत्युक्त्वा सीतासमीपे गत्वोवाच, हे मातः सीते! श्रीरामः संमेतशिखरयात्रायै चलितः, तत्रापि पूर्वं यात्रामनोरथोऽभवत्, अथ तन्मनोरथं त्वं शीघ्रं पूरय? स्यंदने च समारोह? हर्षिता सीता स्नानमज्जनादिकं कृत्वा रथे समारूढा मृदुहृदया तेन कृतांतवदनेन नीयमाना पथि चचाल. मार्गे गच्छन् दुर्निमित्तैर्वार्यमाणोऽपि कृतांतवदनः सीतासहित एकां भीमाटवीं प्राप, सा चाटव्यनेकोत्कटवृक्षविविधव्यालशार्दूलकंकालवेतालक्षेत्रपालशाकिनीभाकिनीयोगिनीराक्षसगांधर्वविद्याधरखेचरभूतप्रेतपिशाचभिल्लशबरतस्करशंबरशरभकासरव्याघ्रशृगालवृकशूकरसर्पमृगशशघूकादि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याकुलासीत. तदा तं रथस्थं कृतांतवदनं साश्रुनयनं म्लानमुखं च वीक्ष्य सीतावदत, रे कृतांतवदन! त्वं सशोकः कथं दृश्यसे? कृतांतवदनोऽप्यूचे हे मातरहं दुर्वचनं कथं वच्मि? सीतयोक्तं किं तद्दुर्वचनं? पुनः स प्रोवाच हे देवि! त्वं दैवेन दूषिता, तवोपरि दैवं रुष्टमस्ति, तव दुर्दशा च समायाता. यतो राक्षसावाससंत्रासापवादाल्लोकभीत्या च रामेण त्वं मुक्तात्र भीषणे वने. लक्ष्मणेन निषिद्धोऽपि रामो न मन्यतेस्म. तत्कार्यार्थं चाहं समादिष्टोऽस्मि, हे देवि! किमहं करोमि कथयामि वा? हे देवि! त्वमथ रथादवतर? तद्वचनं निशम्य सीता मूर्छिता भूमौ पतिता, मृतेव च सा कृतांतवदनेन दृष्टा.

ततो भूमौ पतितां तां सीतां मृतां मत्वा धिग्मां सेवाजीविनं स्वामिकार्यकरं, स्वामिनापि ममेदृशं कार्यं समादिष्टं, अथ किं भविष्यति, एषा च कथं जीविष्यतीति भयात्सोऽपि भृशं रुरोद. सीतापि शीतलवातोपचारैर्लब्धसंज्ञा विलापानकरोत्, पुनर्मूर्छिता पुनश्च लब्धचेतनैवंविधा सा सीता कृतांतवदनेन दृष्टा. क्षणेन स्वस्थीभूय सा कृतांतवदनंप्रत्युवाच भो कृतांतवदन! अयोध्येतः कियद्दूरेऽस्ति? सोऽप्यधात हे मातरनया पृच्छया किं? अथ रामस्त्वां सर्वथा नांगीकरिष्यति, हे सी-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ते! अथ रामवार्तया पर्याप्तं, इति श्रुत्वापि सीता रामभक्त्या भूयोऽभाषत भद्र! मद्वचनमिदं रामस्याग्रे शंसेः, यदि त्वमपवादाद्भीतस्तर्हि मे परीक्षा त्वया कथं न कृता? सर्वोऽपि जनः शंकास्थाने दिव्यं कारयति, ततस्त्वया मह्यं दिव्यं काराप्य मां सत्यामसत्यां वा कृत्वा कथमहं न त्यक्ता, यतः—

अनुभोक्तुं स्वकर्माणि । मंदभाग्या वनेऽप्यहं ॥ नानुरूपमकार्षीस्त्वं । विवेकस्य कुलस्य च ॥ १ ॥ यथा खलगिरात्याक्षीः । स्वामिन्नेकपदेऽपि मां ॥ तथा मिथ्यादृशां वाचा । न धर्मं जिनभाषितं ॥ ॥ २ ॥ जिम जनवयणे हुं तजी । तिम जो धर्म तजेसि ॥ सीता प्रणमी वीनवे । तो संसार रुलेसि ॥ ३ ॥

इत्याद्युक्त्वा मूर्छिता भूमौ पतिता पुनर्लब्धसंज्ञा सा कृतांतवदनं सेनान्यंप्रत्यभ्यधात, भो कृतांतवदन! मयाविना स रामः कथं जीविष्यति? अथ रामचंद्राय त्वया ममाशीर्वाच्या, यथा—स्वस्त्यस्तु ते कुशलमस्तु चिरायुरस्तु । गोवाजिहस्तिधनधान्यसमृद्धिरस्तु ॥ ऐश्वर्यमस्तु विजयोस्तु रिपुक्षयोऽस्तु । कल्याणमस्तु भवतां जिनभक्तिरस्तु ॥ १ ॥ रामाय स्वस्त्यथाशंसे—राशिषं लक्ष्मणस्य च ॥ शिवास्ते संतु पंथानो । वत्स गच्छोपराघवं ॥ २ ॥ एवंविधेऽपि दयिते सा सीतैवंविधामाशिषं ददौ. कृतांतवदनोऽपि सीताशिषं लब्ध्वा कथंचिच्चचाल. ॥ इति श्रीमत्तपागच्छे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भट्टारकश्रीहीरविजयसूरिराज्ये आचार्यश्रीविजयसेनसूरियौवराज्ये पंडितश्रीदेवविजयगणिविरचिते श्रीरामचरित्रे गद्यबंधे सीतापरित्यागो नामाष्टमः सर्गः समाप्तः ॥ श्रीरस्तु ॥

---

॥ अथ नवमः सर्गः प्रारभ्यते ॥

अथ सीता कृतांतवदनेन परित्यक्ता भयोद्भ्रांतेतस्ततो भ्रमंती निजात्मानं च निंदंती स्वपूर्वकृतकर्म गर्हतिस्म. यतः—यथा धेनुसहस्रेषु । वत्सो गच्छति मातरं ॥ एवं पूर्वकृतं कर्म । कर्तारमनुगच्छति ॥ १ ॥ भूयः भूयः पदे पदे स्खलंती भृशं रुदंती च सा वने बभ्राम. एवं रुदंत्या तयाग्रे गच्छंत्यैकं महत्सैन्यं दृष्टं, तत्सैन्यं दृष्ट्वा सैकस्य वटवृक्षस्याधस्तादुपविष्टा चिंतयामास यद्यावद्भयं नागच्छति तावद्भेतव्यं, आगते तु भये निःशंकैः सहर्षैश्च तत्सोढव्यं, यतः—तावद्भयाद्धि भेतव्यं । यावद्भयमनागतं ॥ आगतं तु भयं दृष्ट्वा । प्रवर्तव्यमशंकितं ॥ १ ॥ इति विचार्य निर्भीका सीता नमस्कारपरायणा चकितहरिणीव तरललोचना तत्सैन्यं विलोकयंती तस्थौ. तदा केचित्सैनिकाः सीतासमीपे समागतास्तां दिव्यरूपां दृष्ट्वा चिंतयंति कैषास्मिन् वने एकाकिनी दृश्यते? एवं यावत्ते

For Private And Personal Use Only

चिंतयंति तावत्तत्र राजा समागतः. तं च विलोक्य सीता स्ववस्त्रेण मुखमाछाद्य भृशं रुदितुं लग्ना. एवं तां रुदंतीं दृष्ट्वा राजोचे, हे जगिनि! त्वं कथं रोदिषि? किं ते दुःखं? एतानि च ते जूषणानि तवैवांगे तिष्टंतु, त्वं मा बिनेषि? त्वं कस्य प्रिया कस्य च पुत्री? अस्मिन् वने चैकाकिनी कथं तिष्ठसि? त्वं गर्जवत्यासन्नप्रसवा निर्घृणादपि निर्घृणेन केन दयितेन त्यक्ता? सर्वं सत्यमाख्याहि? मास्म शंकिष्ठाः, अहं त्वत्कष्टेन कष्टितोऽस्मि. तावत्तन्मंत्री सुमतिर्नामा सीतासमीपे समागत्यैवमब्रवीत, हे सुंदरि! एष गजवाहनराज्ञो बंधुदेवीराज्ञीकुक्ष्युद्भवो वज्रजंघनामा पुंडरीकपुरेश्वरो महाश्रावको महासत्वः परनारीसहोदरो गजान् गृहीतुं वने समागतोऽभूत.

अथ स कृतकृत्यो गजान् गृहीत्वात्र समागतोऽस्ति. अत्रागतश्च त्वां दृष्ट्वा तव डुःखेन दुःखितः पुनः पुनस्त्वां पृछति, अतस्त्वं निर्भीका सत्यमाख्याहि? इति मंत्रिणोक्ते सीता निर्भीका स्वं वृत्तांतं यथातथमाचख्यौ, यथाहं जनकराज्ञः पुत्री जामंडलजगिनी श्रीरामपत्नी लक्ष्मणभ्रातृजाया दशरथवधूटी सीतानाम्नी. एवं स्वं वृत्तांतमुक्त्वा सा तूष्णीकास्थात्. वज्रजंघोऽप्यूचे हे जगिनि सीते! यथा तव भ्राता जामंडलस्तथा त्वं मां विद्धि, अतस्त्वं ममौकस्यागछ? यतः स्त्रीणां पतिगृहा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दन्यत्र स्थानं भ्रातृनिकेतनं, त्वं च ममैकधर्मत्वात्साधर्मिकी भगिन्यसि. यतः—अनन्नदेसजाया। अन्नाहारेण वड्ढिअसरीरा ॥ जिणसासणं पवन्ना । सव्वे ते बांधवा भणिआ ॥ १ ॥ रामोऽपि त्वां लोकापवादेनात्याक्षीत्, न तु स्वयमत्याक्षीत्, अथ पश्चात्तापेन रामोऽपि स्वयमेव कष्टभाग्भविष्यति, धिग्धिगविचार्यकारित्वं, यतः—अपरीक्षितं न कर्तव्यं । कर्तव्यं सुपरीक्षितं ॥ पश्चाद्भवति संतापो । ब्राह्मणी नकुलं यथा ॥ १ ॥ इति कथयित्वा निर्विकारेण वज्रजंघेन शिबिका समानायिता, हे भगिनि अथ त्वं द्रुतमारुह्यतामिति कथयित्वा सीतां शिबिकायामारोप्य क्षेमेण पुंडरीकपुरे चागात. सीतापि तेन वितीर्णे गृहेऽहर्निशं दानशीलतपोभावनाभावितात्मा पितृवेश्मनीव सुखेनास्थात्. इतश्च कृतांतवदनो रामसेनानी रामसमीपं गत्वा सीतापरित्यागादि सर्वं स्वरूपं निवेद्यावदत, हे स्वामिन्! मया सीता सिंहनिनादाख्ये भीषणे वने परित्यक्ता मूर्छिता भूमौ पतिता पुनर्लब्धसंज्ञा च विलापं कुर्वाणा कथंचिद्धैर्यमालंब्य भवंतमेवमादिशद्यथा—सदा विमृश्यकर्तुस्ते—ऽप्यविमृश्य विधायिनः ॥ मन्ये मद्भाग्यदोषेण । निर्दोषत्वमवाप्यते ॥ १ ॥ खलोक्त्याहं यथा त्यक्ता । निर्दोषापि त्वया प्रभो ॥ तथा मिथ्यादृशां वाचा । मात्याक्षीर्धर्ममार्हतं ॥ २ ॥ जिम जनव-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यणे हुं तजी । तिम जो धर्म तजेसि ॥ सीता प्रणमी वीनवे । तो संसार रुलेसि ॥ ३ ॥ इत्याश्रुत्वा मूर्छिता भूमौ पतिता पुनर्लब्धसंज्ञा सा विलपतिस्म, हा मया विना कथं रामो जीविष्यति? हा हतास्मीत्यादिसीतावचनानि सेनानीमुखात् श्रुत्वा मूर्छया रामो भूमौ पपात, तावल्लक्ष्मणेनागत्य चंदनादिनाभिषिच्य व्यजनवातैश्च सज्जितो राम उत्थायैवं विललाप—

हा खलानां लोकानां वचसा मया सीता भीषणे वने उज्झिता, हा सीते पापभीते! मां विना त्वं कथं जीविष्यसि? अथ लक्ष्मण ऊचे स्वामिंस्तस्मिन् वने गम्यते, तत्र गत्वा च सीता विलोक्यते. एवं श्रुत्वा रामः कृतांतवदनं सेनान्यं सह नीत्वा तत्र वने गतो यत्र वने सीता मुक्ता, परं सीता न लब्धा. प्रतिस्थलं प्रतिसरः । प्रतिशैलं प्रतिद्रुमं ॥ रामो गवेषयामास । ददर्श न तु जानकीं ॥ १ ॥ सीताप्राप्तौ विमुक्ताशो । निवर्त्य स्वपुरीं ययौ ॥ पौरैः सीतागुणग्राहं । निंद्यमानो मुहुर्मुहुः ॥ २ ॥ एवं श्रीरामो लोकैर्निंद्यमानः स्वां पुरीमयोध्यामागत्य सीतायाः प्रेतकार्यमकार्षीत्. कतिचिद्दिनांते च रामो विगतशोको बभूव, सीतापि वज्रजंघराज्ञो गृहे तथा स्थिता यथा केनापि न ज्ञाता.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इतश्च तस्मिन्नगरे वज्रजंघवेश्मनि स्थिता सीता युग्मजातौ पुत्रौ सुषुवे, क्रमेण तयोर्लवणांकुशमदनांकुशेति नामनी चक्रे. अथ पशै चंद्रसूर्याविव धात्रीभिर्लाल्यमानौ क्रमेणाष्टवार्षिकौ कलाग्रहणयोग्यौ विंध्यद्रुमौ कलभाविव मातृमनोरथैर्वर्धितौ नेत्रानंददायिनौ नरेंद्रनयनोत्सवावपरौ रामलक्ष्मणाविति लोकोक्तिं शृण्वानौ वृद्धिं प्रापतुः. इतश्च तस्मिन् समये सिद्धार्थनामा श्रावकः सिद्धपुत्रोऽणुव्रधारी सिद्धविद्यो विद्याबलर्द्धिसंपन्नः सकलागमवित् सीतागृहे समागत्योवाच हे सीतेऽहं सिद्धार्थनामा श्रावको गगनगामिन्या विद्यया शत्रुंजयोज्जयंतसम्मेतशिखरनंदीश्वरादिषु यात्रां कृत्वा भिक्षार्थं त्वद्गृहे समागतोऽस्मि, सीतया प्रोक्तं हे धर्मबांधव! मम भाग्यं फलितं यत्त्वं कल्पतरुर्ममांगणे समागतः, फलितो मे धर्मतरुः, सुप्रसन्ना मे श्रीजिनपादाः, यत्त्वं जंगमकल्पपादपो मद्गृहे समागतः. एवं कथयित्वा तं गृहमध्ये नीत्वा स्नानं काराप्य गृहचैत्यानि पूजयित्वा भद्रासने निवेश्य वरभोज्यैः पक्वान्नशालिदालिव्यंजनादिभिः स भोजितः, भोजनानंतरं सिंहासने निवेश्यैलालवंगकर्पूरादिसन्मिश्रं तांबूलं दत्वा भृशं तोषितः. ततः सिद्धार्थः सीतांप्रत्यूचे हे धर्मभगिनि सीते! त्वं रामं त्यक्त्वात्र वज्रजंघगृहे एकाकिनी स्वजनादिरहिता परगृहे कथं तिष्ठसीति पृष्टा सी-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ता सर्वं निजवृत्तांतं कथयतिस्म, रामेण यथा त्यक्ता, यावद्वज्रजंघेनेहानीता चेति पुत्रजन्मावधिपर्यंतं सर्वं निवेदितं.

अथ सीतां चिंताकुलां ताम्यंतीं दुःखनराक्रांतां च दृष्ट्वा सिद्धार्थेनोक्तं हे सीते! तव चेतसि का चिंतास्ति? यस्य पुत्रौ लवांकुशौ बलशालिनौ प्रशस्तलक्षणोपेतौ साक्षाद्रामलक्ष्मणाविव स्तः, एतौ तव पुत्रौ चाचिरादेव तव मनोरथं पूरयिष्यतः. सीतया प्रोक्तं हे बांधव! अन्यः कोऽपि तादृशो मम पुत्रपाठको नास्ति, अतस्त्वं मम पुत्रौ पाठय? कलाः शिक्षापय? विद्यां च देहि? केवलमेवैष चिंता मम चेतसि वर्तते, अन्या काचिच्चिंता नास्ति. सिद्धार्थेनोक्तं तव पुत्रौ पाठयिष्यामि, एषा चिंता त्वया न विधेयेति कथयित्वा तेन सीताश्वासिता. पुत्राध्यापनहेतवे सीतया सिद्धार्थः स्वगृहे स्थापितः, सिद्धार्थेनापि तथा तौ सीतापुत्रावध्यापितौ यथा तौ शस्त्रशास्त्रकलापारीणौ जातौ, किं बहु वर्ण्यते? द्युसदामपि दुर्जयौ जातौ. ततः सिद्धार्थस्तौ पाठयित्वा सीताशिषं च लब्ध्वा स्वस्थानं गतः. तावधीताखिलकलौ । प्रपेदाते च यौवनं ॥ नूतनाविव कंदर्प—वसंतौ सहचारिणौ ॥ १ ॥ ततः स वज्रजंघाभिधो मातुलो लक्ष्मीवतीकुक्ष्युत्पन्नां शशिकलाभिधां स्वां पुत्रीं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लवणायोद्वाहयत्, एवमन्या अपि द्वात्रिंशत्कन्या लवणः पर्यणैषीत. ततो वज्रजंघो मातुलः पृथ्वीपुरनगरेशितुः पृथुराज्ञोऽमृतवतीराज्ञीकुक्ष्युद्भवां कनकमालिकाभिधां पुत्रीं कुशाय ययाचे. पृथुराजोचे भो वज्रजंघ! यस्य वंशो न ज्ञायते तस्मै स्वदुहिता कथं दीयते? तद्वचनं श्रुत्वा कुपितो वज्रजंघः क्रोधारुणलोचनः पृथुंप्रति संग्रामसज्जो बभूव, उभावपि परस्परं युयुधाते. पृथुराजा पोतनपुराधीशं स्वमित्रं जितशत्रुं सहायार्थमाह्वयत्, वज्रजंघोऽपि स्वान् पुत्रांस्तथा लवांकुशान् समाह्वयत. एवं तयोः संग्रामो बभूव, तस्मिन् संग्रामे वज्रजंघसेना पृथुराजेन भग्ना, मातुलसेनाभंगेनातीवकुपितौ लवांकुशौ निरंकुशगजाविव प्रणिघ्नंतावधावतां.

अभज्यत ससैन्योऽपि । पृथुर्याविन्नरेश्वरः ॥ ऊचतुस्तावदेवं तौ । हसंतौ रामनंदनौ ॥ १ ॥

हे राजंस्त्वं सुवंशजोऽज्ञातवंशयोरावयोरग्रे कथं पलायितः? इति तद्वचनं श्रुत्वा पृथुराजा वलित्वा लवांकुशपुरतो नमस्कारं विधायैवमवादीत, भो महापुरुषौ युवयोर्वंशोऽत्र मया विज्ञातोऽमुना विक्रमेण, यतो युवां सुकुलोत्पन्नाविति कथयित्वा पूर्वं वज्रजंघेन मार्गितां निजपुत्रीं कनकमालिकां कुशाय ददौ, तथा पृथुनृपो वज्रजंघेन सह सर्वभूभुजां समक्षं संधानं चक्रे. तस्मिन् समये तत्र ना-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रदमुनिः समागात्. तदा पृथुराट् नारदं महामुनिं पप्रच्छ जो नारदमुने त्वं ज्ञानवानसि, अतः स्वज्ञानेन लवांकुशयोर्वंशादिकं समाख्याहि? यतो जामातृवंशपरिज्ञानेन श्वशुरस्यातिसुखं जवति. तदा नारदमुनिः किंचिद्धास्यं विधायोचे जो पृथो! जो वज्रजंघ! अनयोर्वंशादिकं को न वेत्ति? यस्योत्पत्तिकंदो भगवान् वृषजध्वजः, यतः—चक्रिणो ह्यनयोर्वंशे । जरताद्याः कथाश्रुताः ॥ को न वेत्त्यनयोस्तातौ । प्रत्यक्षौ रामलक्ष्मणौ ॥ १ ॥ अथ लवणो नारदमुनिं पप्रच्छ जो मुने! सायोध्यानगरी कियद्दूरेऽस्ति? यस्यां सानुजः सपरिच्छदो मे तातो वसति. मुनिरूचे जो लवण! यस्यां नगर्यामयोध्यायां तव पिता वसति सायोध्येतः षष्ट्यधिकयोजनशतद्वयं. ततः पृथुराजा नारदमुनिं नमस्कृत्य विससर्ज. ततः शुजे लग्ने शुभे मुहूर्ते पृथुराट् कुशं पर्यणाययत्, बह्वीजी राजकन्याजिः सार्धं कनकमालां कुशः पर्यणैषीत्. ततस्तौ लवांकुशौ देशान् साधयंतावनेकसैन्यपरिवृतौ पृथ्वीं परिब्रमतुः. अनेकराजमंडलीसमुपजुज्यमानचरणारविंदौ देशाद्देशं परिब्रमंतौ मध्यखंमांतर्वर्तिकतिचिद्देशान् साधयित्वा गंगामुत्तीर्य च तौ कैलासस्योत्तरां दिशमीयतुः. तत्र नंदनवारुणदेशानां जयं कृत्वा ततश्चलितौ ऊषकुंतलकालांबुनंदिनंदनसिंहलशलजनतलशूलान् शबरवत्सरादिदेशान्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जित्वा तौ परकूलं गतौ, तत्राप्यार्यानार्यान् साधयित्वा तैर्नृपैः परिवृतौ तस्माद्देशान्निवृत्तौ तौ लवांकुशौ पुंडरीकपुरमुपेयतुः. लोकोक्तिर्यतः—

अहो धन्यो वज्रजंघो । यदीयजामिनंदनौ ॥ ईदृशाविति जल्पद्भि—र्वीक्ष्यमाणौ पुरीजनैः ॥ १ ॥ जग्मतुः स्वगृहं वीरौ । नृपवीरैः समावृतौ ॥ प्रणेमतुश्च जानक्या—श्चरणौ विश्वपावनौ ॥ २ ॥ चुचुंब मूर्ध्नि तौ सीता । स्नपयंती मुदश्रुभिः ॥ रामलक्ष्मणयोस्तुल्यौ । युयास्तमिति चावदत् ॥ ३ ॥ अथ तौ लवांकुशौ कतिचिद्दिनानि मातृसमीपे स्थितौ. अथैकस्मिन् दिने ताभ्यां निजमाता पृष्टा, हे मातस्तवाज्ञयावां रामलक्ष्मणौ पश्यावः, येन च त्वमेकाकिनी वने मुक्ता तस्य पराक्रमं पश्यावः. एतद्वचनं श्रुत्वा सीता रुदंती जगाद, हे पुत्रौ युवयोः केयमनर्थेच्छा? युवयोः पितृपितृव्यौ देवानामपि दुर्जयौ वर्तेते, याभ्यां त्रैलोक्यकंटको राक्षसपतिः संग्रामे निहतः, तयोरग्रे के युवां? केऽन्ये दैत्या वा दानवा वा मानवा वा? अतो यदि युवयोः पितरं द्रष्टुमुत्कंठा वर्तते तर्हि विनम्रीभूय पितृपितृव्ययोः पादौ युवां प्रणमतं, यतः पूज्ये हि विनयोऽर्हति. तावूचतुर्हे मातस्तयोः कथं विनयः क्रियते? तौ त्वावयोः शत्रू, येन त्वं निर्दोषापि दोषमुत्पाद्य वने त्याजिता, अतो ज-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नकस्यापि युद्धाह्वानमानंदकरं कुलद्वययशस्करं च युज्यते, अतोऽस्माकमाज्ञां देहि? यथावां तत्र यास्याव इति कथयित्वा सीतायां रुदत्यामपि तौ स्वयं चेलतुः.

एवं तौ लवांकुशौ महासैन्यौ महोत्साहौ च रामनगरींप्रति प्रतस्थाते. कुठारकुद्दालभृतां । सहस्राणि नृणां दश ॥ तयोः पथ्यछिदन् वृक्षा—दिकं इमां च समां व्यधुः ॥ १ ॥ क्रमेण मार्गे गच्छतोस्तयोर्लवांकुशयोः सेनानी रामलक्ष्मणयोर्देशानभंजत्, अयोध्यामार्गं च बध्ध्वा स्थितः, लवांकुशावपि योध्धुकामावयोध्यासमीपमागच्छतां. रामलक्ष्मणावपि त्वखिलोपेतं रिपुमागच्छंतं श्रुत्वा संग्रामायायोध्यानगरीतो निर्ययतुः. अथ सौमित्रिरूचे केऽमी मर्तुकामा मम क्रोधानले पतंगवद्धवितारः समायाताः? इत्युक्त्वा सह रामेण । सुग्रीवादिभिरावृतः ॥ युद्धे चचाल सौमित्रि—रमित्रध्वांतभास्करः ॥ १ ॥ इतश्च नारदाद्भामंडलभूपतिस्तद्वृत्तांतं श्रुत्वा ससंभ्रमः सीतासमीपं समागात्. ततस्तं समागतं दृष्ट्वा सीता साश्रुनयनोचे भो बांधव तव भागिनेयौ मम पुत्रौ लवांकुशौ मत्यागासहिष्णुत्वाद्रामलक्ष्मणोपरि युद्धाय गतौ वर्तेते. भामंडलेनोक्तं हे भगिनि सीते! रामेण तावदेकं त्वकार्यमविमृश्य कृतमेवास्ति यत्त्वं लोकगिरा वने त्यक्ता, अथ द्वितीयं तु रभसवशात्पुत्रयो·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वंधरूपमकार्यं स माकार्षीदिति मम मनसि चिंता वर्तते, अतस्त्वमुत्तिष्ट यथावां द्रुतं लवांतिके गच्छावः. इत्युक्त्वा जानकीमात्म—विमानमधिरोप्य च ॥ लवणांकुशयोः स्कंधा—वारे भामंडलो ययौ ॥ १ ॥ तौ नमश्चक्रतुः सीतां । कुमारौ लवणांकुशौ ॥ मातुलोऽयमिति सीता—ख्यातं नामंडलं तथा ॥ २ ॥ स तौ शिरसि चुंबित्वा । स्वोत्संगमधिरोप्य च ॥ हर्षरोमांचितवपु—रित्यूचे गद्गदाक्षरं ॥ ३ ॥ हे नागिनेयौ ! युवयोर्माता पूर्वं वीरपत्न्यासीत, सांप्रतं युवाभ्यां पुत्राभ्यां वीरसूर्जाता. किंच यामिनीपतिनिर्मलौ युवां यद्यपि वीरौ वीरपुत्रौ च वर्तेथे तथापि पितृपितृव्याभ्यां सह रणं मा कृषीथां, यतो ययोः पुरो विश्वकंटकोऽपि रावणः संग्रामे न स्थितस्तयोः पुरतः कौ युवां? केऽन्ये देवा दानवा वा? बहु किं कथ्यते? स कोऽपि नास्त्यस्मिन् नरते यो रामलक्ष्मणौप्रति योध्धुं समर्थो नवति.

एवं नामंमलेन स्नेहवशाद्वार्यमाणावपि तावूचतुर्यथा—तावूचतुर्मातुलं तं । स्नेहनीरुतयानया ॥ त्वत्स्वस्राप्यनया ह्येव—मूचेऽथो कातरं वचः ॥ १ ॥ एवं तयोर्ब्रुवाणयोरेव तत्सैन्यानां रामसैनिकैः समं युद्धं प्रावर्तत. इतस्तौ कुमारावपि युद्धायोत्तस्थितौ, रामलक्ष्मणावपि वानरराक्षससैन्य·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सहितौ लवांकुशाभ्यां समं युयुधाते, सुग्रीवाद्या नभश्चराश्च युध्यमानं तं भामंडलं ददृशुः, ततः सुग्रीवाद्यैः पृष्टो भामंडलो यथेमौ लवांकुशौ कस्य पुत्रौ यौ रामलक्ष्मणाभ्यां सार्धं संग्रामं कुर्वाते? भामंडलेन यथास्थिते प्रोक्ते हर्षितः सुग्रीवः सीतासमीपे गत्वा तां च नमस्कृत्य पृथिव्यां न्यषदत. इतश्च तौ लवांकुशौ दोष्मंतौ रामसैन्यं दुद्रुवतुः, यत्र यत्र तौ सिंहसमपराक्रमौ भ्रमतुस्तत्र तत्र तयोः पुरतोऽन्यः कोऽपि स्थातुं न शक्नोति. एवं संग्रामे भ्रममाणौ तौ न केनापि स्खलितौ, तदा रामसौमित्री पुरतः समागतौ, तौ च प्रेक्ष्य परस्परमेवमूचतुर्यदावयोर्विद्विषावेतौ कुमारौ कस्य पुत्रकौ? तदा श्रीरामं लक्ष्मणोऽवोचत्, भो भ्रातरेतयोः कुलादिकं न ज्ञायते, तदैव लक्ष्मणंप्रत्यंकुशोऽवोचद्भो लक्ष्मण! रावणेन तव रणश्रद्धा नापूर्यत, परमेषोऽहं तव रणेच्छां पूरयिष्यामि, त्वमपि च स्वरणेच्छां पूरयिष्यसि.

इत्युक्ते रामसौमित्री । द्वौ च तौ लवणांकुशौ ॥ आस्फालयामासतुः स्वं । स्वं धनुर्ध्वनिभीषणं ॥ १ ॥ रामस्यंदनसारथिः कृतांतवदनोऽभवत्, लवस्य रथसारथिर्वज्रजंघः, एवं लक्ष्मणस्य विराधो विद्याधरः, अंकुशस्य च पृथुराजा सारथिरभवत. एवमन्योन्यं महारणमभवत्, परं न केनापि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निर्जितं न च पराजितं. ततस्तेऽपसारथयः स्वस्वरथान् भृशं भ्रामयामासतुः. चत्वारश्च ते द्वंद्वयोधिनो विविधास्त्रैर्युयुधुः, विज्ञातज्ञातिसंबंधौ । सपक्षौ लवणांकुशौ ॥ युयुधाते निरपेक्षौ । त्वज्ञानाद्रामलक्ष्मणौ ॥ १ ॥ अथ रामलक्ष्मणौ विविधायुधैर्युध्ध्वा खेदं प्राप्तौ. श्रीरामः कृतांतवदनंप्रत्याह भो कृतांतवदन! शत्रुंप्रति रथं वारय? तेनोक्तं स्वामिन्नमी हयाः खेदं प्राप्ता लवबाणैश्च भृशं विद्धाः कशाभिस्ताडिता अपि न चलंति, तथा मुद्गरघातप्रहारेण तवायं रथोऽपि जर्जरतामगमत्, तथैतौ मम दोर्दण्डावपि छिद्रकांडघातजर्जरौ जातौ स्तः, तेनाश्वरश्मिं चालयितुमहमसमर्थोऽस्मि. पश्चनाभोऽप्यन्नाषिष्ट । ममापि शिथिलायते ॥ धनुश्चित्रस्थितमिव । वज्रावर्तं न कार्यकृत् ॥ १ ॥ अभून्मुशलरत्नं च । वैरिनिर्दलनक्षमं ॥ कणखंडनमात्रार्ह—मेवैतदपि संप्रति ॥ २ ॥ अनेकशोंकुशीभूतं । यद्दृष्टं नृपदंतिनां ॥ हलरत्नं तदप्येत—दभूद्भूपाटनोचितं ॥ ३ ॥ विपक्षक्षयकारिणां ममास्त्राणां केयमवस्थागता? न ज्ञायते किं भविष्यति? पुनश्चिंतितं रामेण यथा ममास्त्राणि लवंप्रति मोघीभूतानि, तथा लक्ष्मणस्यापि कुशविषये मोघीभूतानि.

अत्रांतरेऽतितीक्ष्णेनांकुशबाणेन ताडितो लक्ष्मणो मूर्छाविधुरो रथोत्संगे न्यपतत, ततो वि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राधो लक्ष्मणं रथोत्संगे पतितं दृष्ट्वा रथमयोध्यांप्रत्यचालयत्, तावल्लब्धसंज्ञो लक्ष्मणः साक्षेपं विराधंप्रत्यवोचत्, भो विराध! त्वमयोध्यांप्रति रथं किं प्रेरयसि? यतो रामभ्रातुर्दशरथसूनोरिदमनुचितं, अतस्त्वं मम रथं तत्रैव प्रापय यत्र तौ मद्वैरिणौ वर्तेते, एषोऽहं यथा तच्छीर्षे चक्रेण छिनद्मि, एवं लक्ष्मणेनोक्ते विराधो रथमंकुशंप्रत्यनैषीत. ततो लक्ष्मणः संग्रामसज्जो भूत्वांकुशंप्रति दधावे, अंकुशोऽपि तथैव सज्जो भूत्वा लक्ष्मणंप्रति दधावे, एवं तयोः संग्रामो बभूव. तस्मिन् संग्रामे तयोः पुरतोऽन्यः कोऽपि स्थातुं न शक्नोतिस्म. क्रुद्धो लक्ष्मणोंकुशंप्रति दिव्यशस्त्रैर्युध्ध्वा यावता तं जेतुं न शक्नोति तावता तेन निजं सुदर्शनचक्रं स्मृतं, सुदर्शनमपि तत्क्षणादेव तस्य करतले समागतं. अथ लक्ष्मणेन चक्रमागतं दृष्ट्वा किं कृतं तदाह—भ्राम्यदर्कभ्रमरं । भ्रामयित्वा च तद्दिवि ॥ क्रुद्धो मुमोच सौमित्रि—रंकुशायास्खलद्यं ॥ १ ॥ आपतत्ताम्ययामासा—नेकशोऽस्त्रैस्तदंकुशः ॥ सर्वात्मनापि लवण—स्ताम्ययामास तच्छरैः ॥ २ ॥ वेगेनागत्य तच्चक्र—मंकुशस्य प्रदक्षिणां ॥ कृत्वा लक्ष्मणहस्तेऽगा—त्पुनर्नीड इवांडजः ॥ ३ ॥ तद्भूयो लक्ष्मणोऽमुंच—चक्रं कृत्वा प्रदक्षिणां ॥ पुनस्तत्पाणिमेवागा—ज्ज्वालालानम इव द्विपः ॥ ४ ॥ चिंतयामासतुश्चैवं । विष-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सौ रामलक्ष्मणौ ॥ किं शिरिशार्ङ्गिणावेतौ । न चावामिह भारते ॥ ५ ॥

अत्रांतरे नारदर्षिः सिद्धार्थेन सह तत्रागत्य खिन्नं रामलक्ष्मणमेवमवोचत्, भो रामलक्ष्मणौ! युवयोर्हर्षस्थाने कथं विषादः? यतः पुत्रात्पराजयो वंशोद्योतनाय कस्य न स्यात्? सीताकुक्षिसमुत्पन्नौ श्रीरामपुत्रौ लवणांकुशनामानौ युद्धव्याजेन युवां द्रष्टुमागतौ, अत्रेदमभिज्ञानं यच्चक्रं गोत्रे न प्रभवति, यथा भरतमुक्तं चक्रं बाहुबलौ मुधाभूत्तथा लक्ष्मणमुक्तं चक्रमंकुशे मुधाभूत, एतदेवाभिज्ञानं. त्यागात्प्रभृति सीताया । वृत्तांतं नारदोऽखिलं ॥ पुत्रयुद्धांतमाचख्यौ । विश्वविस्मयदायकं ॥ १ ॥ रामोऽपि विस्मयव्रीभा—खेदहर्षसमाकुलः ॥ मुमूर्छ संज्ञां लेभे च । संसिक्तश्चंदनांभसा ॥ २ ॥ ततो लक्ष्मणेन सहितो रामो हर्षान्वितशरीरो विस्मयस्मेरमानसः साश्रुनयनः पुत्रवात्सल्यपूरितो लवणांकुशयोः समीपं जगाम. तदा विनीतौ लवांकुशावपि श्रीराममायांतं दृष्ट्वा रथदवातीर्य सन्मुखमागत्य रामलक्ष्मणयोः पादेषु पेततुः. श्रीरामो लवांकुशावालिंग्य निजोत्संगे च निवेश्य मूर्ध्नि चुंबन् शोकस्नेहसमाकुल उच्चै रुरोद. ततो लक्ष्मणोऽपि रामोत्संगाल्लवांकुशौ निजोत्संगे निवेश्य शिरसि चुंबन् बाहुभ्यां समालिंग्याश्रुपूर्णदृक् कुशलं पप्रछ. लवांकुशावपि रामलक्ष्मण-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योः पादयोः पतित्वा सर्वं स्वकुशलवृत्तांतमूचतुः. शत्रुघ्नोऽपि तथैव लवांकुशावालिलिंग. अपरेऽपि हि भूपालाः । सैन्ययोश्च द्वयोरपि ॥ प्रमोदं तेऽस्म संभूय । विवाहमिलिता इव ॥ १ ॥ पुत्रयोर्विक्रमं दृष्ट्वा । पित्रा च सह संगमं ॥ हृष्टा सीता विमानेन । पुंडरीकपुरं ययौ ॥ २ ॥ सत्पुत्रलाभेन । मुदितौ रामलक्ष्मणौ ॥ हृष्टौ च स्वामिहर्षेण । भूचराः खेचराश्च ते ॥ ३ ॥ भामंडलनृपाख्यातो । वज्रजंघनृपोऽपि हि ॥ ननाम रामसौमित्री । विनीतश्चिरपत्तिवत् ॥ ४ ॥ रामोऽपि वज्रजंघं नृपं बभाषे, भो वज्रजंघ! त्वं मम भामंडलसमोऽसि, यतस्त्वया मम पुत्रौ वर्धितौ, मम पत्नी सीता च रक्षिता. अतस्त्वं मम भ्रातृतुल्योऽसीत्युक्त्वा पुष्पकारूढः श्रीरामचंद्रः सलक्ष्मणोऽर्धासनोपविष्टाभ्यां पुत्राभ्यां सहितोऽयोध्यां पुरीं प्राविशत्, तदोद्ग्रीवपार्ष्णिभिः पौरलोकैर्मार्गे प्रेक्ष्यमाणो नागरिकैश्च स्तूयमानोऽसावयोध्यां पुरीमगच्छत्. ततः स रामो भ्रातृपुत्रसहितो विमानादुत्ततार, नगर्यां चोत्सवं कारयामास.

अथ श्रीरामंप्रति लक्ष्मणकपीश्वरबिभीषणहनूमदंगदाद्या विद्याधराः संभूय व्यजिज्ञपन् हे स्वामिन् सीता देवी परदेशस्थिता विरहविधुरा कुमाराभ्यां रहिता चातिकष्टेन तिष्ठति, अतस्तवाज्ञया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सीतात्रानीयते. तत् श्रुत्वा किंचिद्विचिंत्य रामो बभाषे, भो विद्याधरेंद्राः! लोकापवादत्वाज्जानकी कथमत्रानीयते? लोकापवादो हि बलवान्, अहं च जाने यदेषा सीता महासती, मुनिनाप्युक्तं यदेषा सीता महासती, सापि च स्वं निर्मलं वेत्ति, तथापि परलोकापवादो बलवान्, ततः कथमानीयते सीता? तदा लवकुशाभ्यामुक्तं राजन् सीताया दिव्यं देहि? दिव्ये कृते हि सा शुद्धा वाऽशुद्धेति निर्णयो भवेत सुवर्णवत्. रामेणोक्तं—प्रत्यक्षं सर्वलोकानां। दिव्यं देवी करोति सा॥ शुद्धया च तया सार्धं। गृहे वासोऽस्तु मे पुनः ॥ १ ॥ ततो रामाज्ञयोत्थाय हनूमद्बिभीषणसुग्रीवाद्या अन्येऽपि मंत्रिमहामंत्र्याद्या विद्याधराः पुष्पकविमानमारुह्य पुंडरीकपुरे गताः, तत्र सीतां नत्वा कपीश्वर इत्यूचे, हे देवि! त्वत्कृते रामेण वयं प्रेषिताः स्मः, तथा तव कृते इदं पुष्पकविमानमपि प्रेषितमस्ति, अतो हे देवि सीते त्वमस्मिन् विमाने उपविश? यथा त्वां रामोपांते नयामि. सीताप्यूचेऽद्यापि मेऽरण्यत्यागजं दुःखं न शाम्यति, ततो भूयो दुःखांतरप्रदं रामसमीपं कथं यामि? तदा भूयोऽपि कपीश्वरो नत्वा बभाषे हे देवि! ते विशुद्धिकृते लवांकुशाभ्यां तव पुत्राभ्यां श्रीरामचंद्राग्रे दिव्यं स्थापितमस्ति, अतो हे स्वामिनि! अस्मिन् विमाने समारुह्य श्रीरामोपांते एहि?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत श्रुत्वा शुद्धिकांक्षिणी जानकी विमानमारुरोह, अयोध्यायां चाजगाम. ततः सीतायोध्याया ब-
हिरुद्याने महेंद्रोदयनाम्नि वने पुष्पकविमानादुत्ततार, तत्र सर्वैर्विद्याधरैः सा सीता नमस्कृता, लक्ष्म-
णेनापि च नमस्कृता. ततो लक्ष्मण उवाच हे देवि सीते! इमां निजामयोध्यां पुरीं निजवेश्म
च स्वप्रवेशेन पवित्रीकुरु? सीताप्यूचे प्राप्तशुद्धिः । प्रवेक्ष्यामि पुरीमिमां ॥ गृहं च नान्यथा व-
त्सा—पवादो जातु शाम्यति ॥ १ ॥ इति सीताप्रतिज्ञातं । प्रोक्तं रामाय लक्ष्मणजा ॥ रामोऽप्युपेत्य
वैदेही—मित्यूचे न्यायसंयुतं ॥ २ ॥ हे देवि! अहं जाने यत्त्वं शुद्धासि, तथापि सर्वलोकसमक्ष-
मात्मनः शुद्धये त्वं दिव्यं कुरु? तदा सीता स्मित्वैवमुवाच, हे नाथ! त्वत्तोऽपरः कश्चिद्विज्ञो ना-
स्ति, अतः कथ्यते स्वामिंस्त्वया किं कृतं? आदौ दंडं विधायाथ दिव्यादिना मत्परीक्षणं कुरुषे.
सीतावचनं श्रुत्वा रामोऽप्यूचे हे देवि! अहं जाने तव कश्चिद्दोषो नास्ति, परं लोकोत्पादितदोष-
स्योत्तारणायेदं मयोच्यते. तत् श्रुत्वा सीता रामंप्रति जगाद यथा—जल १ मग्नि २ घटः ३ कोशो
४ । विषं ५ माषाश्च ६ तंदुलाः ७ ॥ फालं ८ तुला ९ सुतस्पर्शौ १० । दिव्यानां दशकं जगुः ॥
॥ १ ॥ जगाद जानकी दिव्य—पंचकं स्वीकृतं मया ॥ विशामि वह्नौ ज्वलिते १ । भक्षयाम्यथ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तंडुलान् २ ॥ २ ॥ तुलां समधिरोहामि ३ । तप्तकोशं पिबाम्यथ ४ ॥ गृह्णामि जिह्वया फालं ५ । किं तुभ्यं रोचते वद ॥ ३ ॥

रामेणोक्तं प्रथममग्निदिव्यं कुरु? यथा सर्वे लोकाः सत्यासत्यं पश्यंति. सीतयोक्तमेवं भवतु. अथ रामः खातिकां कारापयति, तस्य मानं यथा—इत्युक्त्वाखानयद्रामो । गर्ता हस्तशतत्रयां ॥ पुरुषद्वयदघ्नां चा—पूरयच्चंदनेंधनैः ॥ १ ॥ रामेण तत्र भणिया । पासहा किंकरा खणउ वाविं ॥ तिन्निवयहत्थसया । समचउरंसा समो गाढां ॥ २ ॥ एवंविधां वापीं कृत्वा खदिरांगारैश्च परिपूर्णा विधाय सीता समाहूता, सीतापि स्नानं विधाय वाप्युपकंठे समागता. अत्रांतरेंतरिक्षस्थः । सिद्धार्थो नारदोऽप्यथ ॥ लोकः सर्वश्च तुमुलं । निषिध्येदमभाषत ॥ १ ॥ भो भो राघव सीतेयं । निश्चयेन सती सती ॥ महासती च माकार्षी—र्विकल्पमिह जातुचित ॥ २ ॥ रामोऽप्युवाच हे लोका। मर्यादा कापि नास्ति वः ॥ संकल्प्य दोषं युष्माभि—रेवेयं दूषिता पुरा ॥ ३ ॥ भो भो लोकाः! सीता पूर्वं सदोषा कथमासीत्? सांप्रतं च निर्दोषा कथं जाता? युष्माकं वचने काप्यर्गला नास्ति, इति लोकान्निवार्य श्रीरामः सीतामूचे हे सीतेऽस्मिन् ज्वलितानले प्रवेशं कुरु? इत्युक्ते सीता कृ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्नाना कृतांगविलेपना करौ संयोज्य सूर्याभिमुखीभूय यावदुवाच तावद्यज्जातं तदाह—

अत्रांतरे वैताढ्यपर्वते उत्तरश्रेणिभूषणे जयपुरे नगरे हरिविक्रमाभिधो राजा राज्यं करोति, तस्य राज्ञी जयमालानाम्नी, तयोः पुत्रो जयभूषणकुमारः, तेन कुमारेण विद्याधरराज्ञां किरणमंडलाप्रमुखा अष्टोत्तरशतकन्याः परिणीताः. तस्य कुमारस्य ताभिः कन्याभिः सार्धं वैषयिकं सुखं भुंजानस्य कालो याति. अथैकस्मिन् समये तां किरणमंडलां निजपत्नीं हिमशिखरनाम्ना मातुलपुत्रेण समं सुप्तां दृष्ट्वा जयभूषणकुमारस्य द्वेषो जातः, तदा जयभूषणेन निजपत्नी यष्टिमुष्ट्यादिना हत्वा गृहान्निर्वासिता, ततः कुमारोऽपि स्वयं सद्गुरुसमीपे गत्वा तेन वैराग्येण दीक्षां जगृहे, सा किरणमंडलापि पतिगृहान्निर्वासिता ग्रामाद्ग्रामं भ्रांत्वा किंचिच्छुभध्यानेन मृत्वा विद्युद्दंष्ट्रेति नाम्ना राक्षसी जाता. अथ जयभूषणो मुनिः कर्मक्षयार्थं विहारं कुर्वन्नयोध्याया बहिरुद्यानेऽशोकवृक्षतरुतले कायोत्सर्गेण स्थितः, तावता तस्य पूर्वभवपत्नी सा राक्षसी मुनिं दृष्ट्वा पूर्वभववैरं च स्मृत्वा तत्समीपे समागता, ततश्च तया मुनेरनेकोपसर्गा विहिताः, तेन मुनिना च ते उपसर्गाः सम्यक् सोढाः, परं धर्मध्यानान्न चलितः, घनघातिकर्मक्षयाच्च तदा तस्य मुनेः केवलज्ञानमुत्पन्नं, तत्केवलो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्सवकरणाय सौधर्मेंद्रप्रमुखा देवा अयोध्यायां समाजग्मुः.

एवमेकस्मिन् पार्श्वे तस्य जयभूषणमुनेः केवलमहोत्सवो देवैः क्रियते, अन्यस्मिन् पार्श्वे च सीताया दिव्योत्सवः क्रियते, तदा सौधर्मेंद्रो मनसि चिंतयत्यहोऽकार्यं क्रियते, यल्लोकापवादेन सीता वह्नौ प्रविशति, तदस्याः साहाय्यं करोमीति विचिंत्य निजपादात्यनीकपतिं हरिणगमेषिणं सीतासाहाय्यकृते प्रेषयामास. हरिणगमेषी सीतादिव्योत्सवे गतः, इंद्रश्च स्वयं केवल्युत्सवे गतः. अथ रामाज्ञया सीता वह्निसमीपे गता, तदा रामश्चिंतयति—ज्वालाकरालतां प्रेक्ष्य । रामो दध्याविदं हृदि ॥ अहो ह्यत्यंतविषमं । किं ममेदमुपस्थितं ॥ १ ॥ एषा महासती सीता निःशंकाप्यग्नौ प्रविशति, पश्चान्न ज्ञायते किं भविष्यति? यतो दिव्यस्य दैवस्य च विषमा गतिः. एवं रामेण चिंतिते सति सीता देवान् गुरून् च स्मृत्वैवमुवाच, भो लोकाः! हे लोकपाला यूयं मद्वचनं शृणुत? यदहं रामादन्यं पुरुषं मनसा वचसा कायेन वाञ्छलषं, तदाग्निर्मां दहतु, अन्यथा सुखस्पर्शो भवतु, तथाग्निस्थाने जलं भवतु. यतः—मनसि वचसि काये जागरे स्वप्नमार्गे । यदि मम पतिभावो राघवादन्यपुंसि ॥ तदिह दह ममांगं पावकं पावकेदं । सुकृतदुःकृतभाजां येन लोकैकसाक्षी ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सीतया दुरपवादभीतया । पावके स्वतनुराहुतीकृता ॥ पावकस्तु जलतां जगाम य—त्तु शीलमहिमाविजृंभितं ॥ २ ॥ ततः सीताशीलमाहात्म्यतोऽग्निस्थाने जलं जातं, जलोपरि कमलं, कमलोपरि सिंहासनं, सिंहासनोपरि चोपविष्टा सीता शोभते यथा पद्मसरसि पद्मे पद्मा. हरिप्रेषितहरिणेगमेषिदेवप्रभावतस्तद्वाप्या जलं वारिधिवेलेवोल्लसद्ववृधे. विद्याधरा भयोद्भ्रांताः । समुत्पत्यांबरे पुनः ॥ भूचरा व्यलपंश्चैवं । पाहि सीते महासति ॥ १ ॥ सीताप्युत्तीर्णमंभस्तत् । स्वपाणिभ्यामचालयत ॥ पुनर्वापीप्रमाणं त—दभूत्तस्याः प्रभावतः ॥ २ ॥

ततः सा जलपूर्णा दिव्यभूमिर्देवैः कृता रत्नबद्धा भव्यतटा कुमुदैः पद्मैः पुंडरीकैश्च निरंतरा पुनः पुनरास्फलद्वीचिसोपानबंधुरा च सा वापी बभूव. अथ सीताशीलप्रशंसिनो नारदाद्या मुनयो जहर्षुः, तथा सुराः संतुष्टाः सीतोपरि पुष्पवृष्टिं व्यधुः, अहो शीलमहो शीलं । रामपत्न्या यशस्करं ॥ इति लोकप्रघोषोऽभू—ल्लोको हि बलवान् खलु ॥ १ ॥ मातुस्तं प्रभावं दृष्ट्वा लवांकुशौ मुदितौ हंसाविव तरंतौ मातुः समीपे समागतौ, सीतापि तौ पुत्रौ मूर्ध्न्याघ्रायोभयोः पार्श्वयोर्निवेशयामास, पुनः पुनः सौम्यदृष्ट्या च विलोकयामास. गत्वा सौमित्रिशत्रुघ्न—भामंडलबिभीषणाः ॥ सु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीवाद्याश्च वैदेहीं । नमश्चक्रुः सन्नक्तयः ॥ १ ॥ ततः श्रीरामः सीतांप्रत्युवाच हे सीते! त्वं मया लोकोक्त्या त्यक्तासि, तत्त्वं ममापराधं क्षमस्व? इदं पुष्पकं विमानं चाध्यास्व? मया सहिता च स्ववेश्मनि चलस्व? अत्र कश्चिन्मम दोषो नास्तीति रामोक्तं श्रुत्वा—सीताप्यूचे न ते दोषो । न च लोकस्य कश्चन ॥ न चान्यस्यापि कस्यापि । किं तु मत्पूर्वकर्मणां ॥ १ ॥ तथा च—मागा विषादन्नुवनं नुवनैकवीर । निःकारणावगणिता किमियं मयेति ॥ दैवेन केनचिदहं दहने निरस्ता । निस्तारिता तु नवतैव हृदि स्थितेन ॥ १ ॥ पुनः सीता प्रोचे—श्रीरामचंद्र नवदीयहृदालवाले । नाहं स्थिता शुचिगुणामृतपूरितेऽपि ॥ यत्त्वं पुनर्मम वियोगदवाग्निदीप्ते । चित्ते चिरं निवसितोऽसि ततः कृतज्ञः ॥ १ ॥ ततः सर्वसमक्षं श्रीरामोऽवोचत्—ताते स्नेहः सती कांता । पौरुषं पवनात्मजे ॥ नरते नक्तिर्नुजे वीर्यं । सेवा सौमित्रिबांधवे ॥ १ ॥

इत्याद्युक्त्वा रामेण पुनः प्रोक्तं हे सीते! अथ त्वं द्रुतं विमानमारुह? यथा स्वगृहं यावः. तद्वचनं श्रुत्वा सीता रामंप्रति प्रोचे, हे स्वामिन् पूर्ववने जयनूषणनामा केवल्यस्ति, तस्य समीपे गम्यते, गत्वा च मुनिवंदनं विधाय ततः स्वेप्सितं करिष्यते, रामेणोक्तमेवं. ततः श्रीरामो लक्ष्मण-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सीतादिभिः परिवृतो मुनिवंदनार्थं पूर्ववने गतः, तत्र वने च मुनिं वंदित्वा श्रीरामो मुनिपुरतो नि· षण्णः, मुनिना च धर्मदेशना चक्रे यथा—धर्मो जगतः सारः । सर्वसुखानां प्रधानहेतुत्वात ॥ तस्त्रा- ल्लो मानुष्ये । सारं तेनैव मानुष्यं ॥ १ ॥ एवंविधं मानुषं जन्म लब्ध्वा धर्मे प्रमादो न विधेयः, यतः—जीअं जलबिंदुसमं । संपत्तीउ तरंगलोलाउ ॥ सुविणयसमं च पिम्मं । जं जाणिसु तं करिज्जासु ॥ १ ॥ असरण मरंति इंदा । बलदेवा वासुदेवचक्कहरा ॥ ता एयं नाऊणं । करेह धम्मुज्जमं तुरियं ॥ २ ॥ भीसणनवाडवीए । एगो जीवो सयावि असहाउ ॥ कम्महउ अ ना· वालिं । आहिंडइ विविहरूवेहिं ॥ ३ ॥ अत्थो घरे नियत्तइ । बंधवरुत्तो मसाणभूमीए ॥ एगो अ जाइ जीवो । न किंचि अन्नेण सयणेण ॥ ४ ॥ जस्सत्थि मच्चुणा सक्खं । सक्कं जस्स पला- यणं ॥ जो जाणि न मरिस्सामि । सो हु कंखेसु दिसिआ ॥ ५ ॥ इत्यादिधर्मदेशनां श्रुत्वा सी· ता चिंतयति धिग्धिग् संसारमिमं, जम्मदुक्खं जरादुक्खं । रोगाणि मरणाणि य ॥ अहो दुक्खो हु संसारो । जत्थ कीसंति जंतुणो ॥ १ ॥ अहोऽस्मिन् संसारे मया कानि कानि दुःखानि सोढानि? अतः संसारं त्यजामि, धिक्संसारसौख्यं, यत्र स्वल्पं सुखं प्रचुरं च दुःखं, अतः प्रव्रज्यां गृहीष्यामी·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ति विचिंत्य सीता स्वकेशान् स्वमुष्टिनोच्चखान, रामस्य चार्पयामास, यतः—इत्युक्त्वा मैथिली के-
शा—नुच्चखान स्वमुष्टिना ॥ रामस्य चार्पयामास । शक्रस्येव जिनेश्वरः ॥ १ ॥ सद्यो मुमूर्छ का-
कुस्थो । नोत्तस्थौ यावदेष च ॥ तावत्सीता ययौ साधु—जयभूषणसन्निधौ ॥ २ ॥ केवली स ज-
यभूषणो मुनि—मैंथिलीं विधिवदप्यदीक्षयत् ॥ सुप्रभाख्यगणिनीपरिच्छदे । तां चकार च तपःप-
रायणां ॥ ३ ॥ इति श्रीमत्तपागच्छे भट्टारकश्रीहीरविजयसूरिराज्ये आचार्यश्रीविजयसेनसूरियौवर
ज्ये पंडितश्रीदेवविजयगणिविरचिते श्रीरामचरित्रे गद्यबंधे सीताशुद्धिव्रतग्रहणवर्णनो नाम नवमः
सर्गः समाप्तः ॥ श्रीरस्तु ॥

— —

## ॥ अथ दशमः सर्गः प्रारभ्यते ॥

अथ भवभीतां सीतां प्रव्रजितां दृष्ट्वा रामः प्रेमपरवशो मूर्छां गतः शीतोपचारादिभिश्च पुन-
र्लब्धचैतन्य इति व्यलपत. हे सीते ! त्वं मां त्यक्त्वा क्व गतासि ? भो बांधवलक्ष्मण ! क्वास्ति सा
सीता ? लक्ष्मणेनोक्तं—सीतां यथा दोषभीत्या—त्याक्षीस्त्वं न्यायनैष्ठिकः ॥ भवभीता स्वार्थनिष्ठा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



। तथा त्वां सापि चात्यजत् ॥ १ ॥ हे रामचंद्र! एषा सीतार्या जयभूषणमुनेः संनिधौ दीक्षां ला- त्वा सुखं तिष्ठति. तत् श्रुत्वा श्रीरामः प्रकृतिमालंब्योवाच, हे प्रिये! त्वं धन्या, त्वं कृतपुण्या, सुल- ब्धं तव मानुषं जन्म, येन त्वया जयभूषणमुनिसमीपे दीक्षांगीकृता. इत्यादि तस्याः प्रशंसां कृत्वा श्रीरामो जयभूषणकेवलिनं पप्रच्छ, हे भगवन्नहं भव्यो वाऽभव्यो वा? जयभूषणकेवलिनोक्तं त्वं भव्योऽसि, अस्मिन्नेव च भवे समुत्पन्नकेवलो मोक्षं यास्यसि. रामः पप्रच्छ भूयोऽपि ; मोक्षः प्रव्र- ज्यया भवेत् ॥ सर्वत्यागेन सा किंतु । लक्ष्मणो दुस्त्यजो मम ॥ १ ॥ मुनिराख्यदवश्यं ते । भो- क्तव्या बलसंपदः ॥ तदंते त्यक्तसंगः सन् । प्रव्रज्य शिवमाप्स्यसि ॥ २ ॥ अथ बिभीषणो मुनिं नत्वैवमपृच्छत्, हे भगवन्! केन प्राग्जन्मकर्मणा रावणः सीतां जहार, तथा संग्रामे लक्ष्मणो राव- णमहनत, तथा सुग्रीवभामंडलौ तथेमौ लवणांकुशावहं च केन कर्मणा श्रीरामेऽत्यंतभक्तिमंतो व- र्तामहे? तदा भगवान् जयभूषणकेवल्याह हे बिभीषण! यत्त्वया पृष्टं तद्वृत्तांतं त्वं सावधानीभूय शृणु? यथा—

दक्षिणभरते क्षेमपुरे नगरे नयदत्तो वणिक्, तस्य सुनंदानाम्नी पत्न्यभूत, तयोः पुत्रौ धन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दत्तवसुदत्तनामानावभूतां, तयोर्मित्रं यज्ञवल्कनामा विप्रश्चासीत्. तस्मिन्नगरे सागरदत्तनामा चैको वणिगासीत्, तस्य पत्नी रत्नप्रभानाम्नी, तयोः पुत्रो गणधरनामा, पुत्री च गुणवतीनाम्नी, सा पित्रा सागरदत्तेन नयदत्तवणिक्पुत्राय धनदत्ताय दत्ता, रत्नप्रभामात्रा च सैव गुणवती पुत्री तन्नगरनिवासिने कस्मैचित् श्रीकांतनाम्ने वृत्तायार्थलोभतो दत्ता, तत्स्वरूपं यज्ञवल्कविप्रेण ज्ञातं, तेन गत्वा स्वमित्रधनदत्तवसुदत्ताग्रे निवेदितं, तदा वसुदत्तो रात्रौ गत्वा श्रीकांतमवधीत्. श्रीकांतेनापि खड्गेन हत्वा वसुदत्तो निपातितः, ततस्तावुभावपि विंध्याटव्यां कुरंगकावभूतां, गुणवत्यप्यपरिणीतैव मृत्वा तत्रैव वने मृग्यभूत, तस्या मृग्याः कृते तत्रापि तौ युध्ध्वा मृत्वा च तत्रैव वने महिषौ जातौ. एवं भूयांसं भवं तौ भ्रमतुः, तदानीं धनदत्तोऽपि स्वभ्रातृवधपीडितोऽटन्निशि क्षुधितः साधून् ददर्श, तेभ्यः साधुभ्यश्च भोजनं ययाचे. तदैको मुनिरब्रवीत् साधूनां भक्तपानादिसंग्रहाभावाद्दिवापि हि गृहस्थेभ्यो दानं दातुं न युक्तं, तर्हि निशायां कुतो दीयते? तवापि रात्रौ भोक्तुं वा पातुं नोचितं, यतो निशायां जीवसंसक्तिर्भक्तपानादौ संभाव्यते, तथा रात्रिभोजने महादोषोऽस्ति, यतः—घोरांधकाररुद्धाक्षैः । पतंतो यत्र जंतवः ॥ नैव भोज्ये निरीक्ष्यंते । तत्र भुंजीत को निशि ॥ १ ॥ मे·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धां पिपीलिका हंति । यूका कुर्याज्जलोदरं ॥ कुरुते मक्षिका वांतिं । कुष्टरोगं च कोलिकः ॥ १ ॥
कंटको वा रुषं चर्मं । वितनोति गलव्यथां ॥ व्यंजनांतर्निपतितः । तालु विध्यति वृश्चिकः ॥ २ ॥
विलमश्च गले वालः । स्वरजंगाय जायते ॥ इत्यादयो दृष्टदोषाः । सर्वेषां निशि जोजने ॥ ३ ॥
नैवाहुतिर्न च स्नानं । न श्राद्धं देवतार्चनं ॥ दानं वा विहितं रात्रौ । जोजनं किं विशेषतः ॥४॥
इत्यायुक्त्वा मुनिना बोधितो धनदत्तः श्रावकीजूय क्रमेणायुःपर्यंते मृत्वा सौधर्मदेवलोके त्रिदशोऽजवत, ततश्च्युत्वा महीपुरे नगरे मेरुनंदनस्य व्यवहारिणो धारिण्यां सहचारिण्यां स पद्मरुचिनामा श्रेष्टिपुत्रो जातः, परं साधुसंसर्गात् श्रावकोऽजवत्, स पद्मरुचिरेकस्मिन् दिने वस्त्राद्यलंकृतोऽश्वारूढः स्वेच्छया गोकुलं गच्छन्मार्गे पतितं मरणतत्परं वृषजमेकमड्राक्षीत्, तं दृष्ट्वा स पद्मरुचिः श्रेष्टिपुत्रोऽश्वादवरुह्य तस्य वृषजस्य कर्णमूले पंचपरमेष्टिनमस्कारं ददौ, तत्प्रजावात्तन्नगराधिपश्रीदत्तराज्ञः वृषध्वजाजिधः स कुमारोऽजवत्, स च स्वयं नगरे भ्रमन्नन्यदा तां जरदूवृषजजुवं दृष्ट्वा जातिस्मरणं लेजे, ततोऽसौ वृषध्वजकुमारस्तत्र जूम्यां श्रीऋषजदेवचैत्यमकारयत्, तच्चैत्यैकजित्तौ मर्तुकामं वृषजं तत्कर्णांते नमस्कारदायिनं पुरुषं, तत्समीपे च सपर्याणमेकं तुरंगममालेखयामास, तत्र चारक्षकपु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रुपास्तेन स्थापिताः, तेन्यश्चोक्तं य एतच्चित्रं भित्तौ लिखितं पुनः पुनर्विलोकयति स शीघ्रं मम समीपे समानेतव्य इत्युक्त्वा स वृषध्वजकुमारः स्वगृहे गतः सुखान्यनुभवन्नास्ते.

अथैकस्मिन् दिने तत्र श्रीऋषभदेवचैत्ये देववंदनार्थं स पद्मरुचिः श्रेष्ठिपुत्र आगतः, तत्र देवान्नत्वा स्तुत्वा च स्वस्थमना यावता चैत्यं विलोकयति, तावता चैत्यभूमौ तच्चित्रं दृष्ट्वा विस्मितमनाश्चिंतयति किमेतदिति, एवं वारंवारं मेषोन्मेषं यथा स्यात्तथा विलोकयंतं तं दृष्ट्वारक्षकैः पृष्टं भो महाभाग! त्वं किमेतस्य स्वरूपं वेत्सि? श्रेष्ठिपुत्रेणोक्तं किंचिद्वेद्मि, तदारक्षकैर्गत्वा राजकुमाराग्रे विज्ञप्तं, वृषध्वजकुमारेणाप्यागत्य स श्रेष्ठिपुत्रः पद्मरुचिः पृष्टो भो पद्मरुचे! त्वं किं वेत्सि? किंचैतच्चित्रं? श्रेष्ठिपुत्रेणोक्तं हे कुमारेंद्र शृणु?—एकस्मिन् दिनेऽहं तुरगारूढो यावदायामि, तावन्मयैष जरद्वृषभो मार्गे पतितो दृष्टः, तं च दृष्ट्वा मम करुणा जाता, ततोऽहमश्वादवरुह्य वृषभकर्णे नमस्कारमयच्छं, तत्स्वरूपज्ञापकं चेदं चित्रमस्ति यथा—एषोऽहं, एष च सपर्याणो ममाश्वः. तत्त श्रुत्वा कुमारेणोक्तमेषोऽहं जरद्वृषस्तव नमस्कारप्रभावेण मृत्वा वृषध्वजनामा राजपुत्रो जातः, समुत्पन्नजातिस्मरणेन च मया तवोक्तं सर्वं दृष्टं करतलामलकवत. सर्वथा त्वं गुरुः स्वामी। देवस्त्वं चासि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मे खलु ॥ भुंक्ष्व राज्यमिदं प्राज्यं । त्वया दत्तं ममापि यत् ॥ १ ॥ इत्युक्त्वा पद्मरुचिना । सहैव वृषभध्वजः ॥ विजहाराकृतद्वेषो—ऽपालयत श्रावकव्रतं ॥ २ ॥ श्रावकत्वं चिरं सम्य—क्पालयित्वा विपद्य च ॥ ईशाने कल्पे जज्ञाते । तौ देवौ परमर्द्धिकौ ॥ ३ ॥

इतश्च पद्मरुचिश्रेष्ठिपुत्रजीवस्ततश्च्युत्वा वैताढ्यपर्वते नंदावर्तनगरे नंदीश्वरराज्ञः कनकाभानाम्न्यां पट्टराज्ञ्यां पुत्रो जातो नयनानंदनामा, क्रमेण राज्यं भुक्त्वा परिव्रज्यां च लात्वा माहेंद्रे त्रिदशोऽभवत. ततश्च्युत्वा प्राग्विदेहेषु क्षेमायां नगर्यां विपुलवाहनस्य राज्ञः पद्मावत्यां पत्न्यां श्रीचंद्रनामा कुमारोऽभूत. क्रमेण राज्यं भुक्त्वांते परिव्रज्यां गृहीत्वा ब्रह्मलोके इंद्रोऽभूत. ततश्च्युत्वा त्वं पद्मनामा रामेत्यपरनामा च महाबलो बलभद्रो जातः. वृषभध्वजराजपुत्रजीवश्चैष वालिभ्राता सुग्रीवनामाभूत. ॥ इति श्रीरामचंद्रसुग्रीवयोः पूर्वभवकथानकं ॥

अथ श्रीकांतवसुदत्तयोः संबंधः कथ्यते यथा—श्रीकांतजीवो वसुदत्तेन हतो मृत्वा भवं भ्रांत्वा मृणालकंदपत्तने वज्रकंबुराज्ञो हेमवतीराज्ञीकुक्ष्युद्भवः शंभुनामा राजपुत्रो जातः. वसुदत्तोऽपि श्रीकांतेन हतो मृत्वा भवं भ्रांत्वा तत्रैव नगरे तस्यैव राज्ञो विजयस्य पुरोधसो रत्नचूडाख्यायां प-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ल्यां पुत्रत्वेनोत्पन्नः श्रीभूतिनामा. अथ सीताभवकथा कथ्यते—गुणवत्यपि भवं भ्रांत्वा श्रीभूतेः पुरोहितस्य सरस्वतीकुक्षिसंभवा वेगवतीनाम्नी पुत्री जाता, सा चोद्यौवनैकस्मिन् दिने प्रतिमास्थितं मुनिं जनैः पूज्यमानं स्तूयमानं च वीक्ष्य सोपहासमदोऽवदत्, अहोऽयं साधुर्महेलया सार्धं क्रीडन्मया दृष्टः, भो जनाः! यूयममुं मुनिं कथं वंदध्वं? तद्वचः श्रुत्वा सर्वोऽपि लोको मुनिंप्रति मंदादरो जातः. सोऽपि ऋषिस्तद् ज्ञात्वेवमभिग्रहमग्रहीत्, यावत्कालं ममायं कलंको नोत्तरिष्यति तावत्कालं मे कायोत्सर्ग इत्यभिग्रहं गृहीत्वा स कायोत्सर्गेणास्थात्. तदैव शासनदेवीप्रभावाद्वेगवतीमुखं भ्रमरपत्रवर्णाभं श्यामं जातं. एवं तस्याः श्यामं मुखं दृष्ट्वा पित्रा पृष्टं हे पुत्रि! तव मुखं केन हेतुनेदृशं भयंकरं जातं? तयोक्तं साधुनिंदातो ममेदृशं मुखं जातं. तदा पित्रा पुत्री भृशं निर्भर्त्सिता यथा हे पुत्रि! त्वया किं कृतं? साधुनिंदातस्तव महादुःखं भविष्यति, अतस्त्वं याहि साधुसमीपे, गत्वा च सर्वलोकसमक्षं कथय? यथा मया साघोरसत्यः कलंको दत्तः, अयं तु पुण्यवान्निष्कलंको धर्ममूर्तिश्चास्ति, मया पापिन्या त्वस्य मुधा कलंकोऽदायि, तत्प्रभावाचाहं श्याममुखी जाता. तत श्रुत्वा सापि तत्र गत्वा सर्वलोकसमक्षं तथैवोवाच यथा पित्रा शिक्षितं. अथ हे स्वा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिन्मयि कृपां विधाय सौम्यदृष्ट्या विलोकय? कायोत्सर्गं च पारय? इति श्रुत्वा मुनिना कायोत्स- र्गं पारयित्वा वेगवत्या धर्माशीर्दत्ता. सापि स्वस्थचित्ता श्राद्धधर्मं गृहीत्वा श्राविका नूत्वा स्वगृहं गता. लोकोऽपि तथैव तं मुनिं पूजयतिस्म. मुनिरपि विहरन्नन्यत्र ययौ. अथ तां वेगवतीं विप्रपु त्रीमुद्यौवनां दृष्ट्वा शंनुभूपतिर्ययाचे. वेगवतीपिता श्रीनूती राजानंप्रत्युवाचाहं मम पुत्रीं तुन्यं मि- थ्यादृशे न दास्ये. राज्ञोक्तमहं बलात्कारेणादास्ये.

इत्युक्त्वा शंनुः श्रीनूतिं निहत्य बलात्कारेण वेगवतीं गांधर्वविवाहेन विवाहयित्वा बलात्का- रेण बुनुजे. तदा तया राज्ञः शापोऽदायि यदहं नवांतरे ते वधाय नूयासं. तद्वचनं श्रुत्वा राज्ञा सा वेगवती विसृष्टा, प्रोक्तं च याहि तत्र यत्र तव रोचते. एवं राज्ञा विसृष्टा सा वेगवती साधुस- मीपे गत्वा दीक्षां लात्वा पूर्णायुर्ब्रह्मदेवलोके गता. ततश्च्युत्वा शंनुजीव—रक्षोनाथस्य मृत्यवे ॥ निदानवशतो जज्ञे । सीतेयं जनकात्मजा ॥ १ ॥ पूर्वनवे सुदर्शनमुनेर्वेगवत्या विप्रपुत्र्याः कलं- कोऽदायि, तेन पापेनास्याः सीताया लोकेन कलंकोऽदायि. यतः—यो नूतेन्योऽनयं दद्या—द्भू- तेन्यस्तस्य नो भयं ॥ यादृग्वितीर्यते दानं । तादृगासाद्यते फलं ॥ १ ॥ तिवयरो ज पनसो ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सयगुणिअं सयसहस्सकोडिगुणो ॥ कोडाकोडिगुणो वा । हुज्ज विवागो बहुतरो वा ॥ २ ॥ अथ शंभुराज्ञो जीवो भवं भ्रांत्वा क्षितिप्रतिष्ठिते नगरे कुशध्वजनामा विप्रस्तस्य सावित्री पत्नी, तयोः कुक्षौ प्रभासनामा पुत्रोऽभूत. स प्रभासविप्रो विजयसेनसूरिपादांते प्रव्रजितः, क्रमेण परीषहान् सहमानः स तीव्रं तपस्तेपे. एकस्मिन् दिने स प्रभासमुनिवरः सम्मेतशिखरयात्रां कर्तुकामान् विद्याधरेश्वरानद्राक्षीत, तांश्च वीक्ष्य स निदानमकरोद्यथानेन तपसाहमीदृशो विद्याधरो भूयासं. ततोऽनशनं विधाय मृत्वा स तृतीयकल्पे उत्पेदे. ततश्च्युत्वायं तवाग्रजः खेचरेंद्रो रावणोऽभूत. यस्तु वसुदत्तमित्रं यज्ञवल्को द्विजोऽभूत स भवं भ्रांत्वा त्वं बिभीषणोऽभूः. ॥ इति रावणबिभीषणयोः पूर्वभवकथानकं ॥

अथ श्रीभूतिविप्रः शंभुराज्ञा हतो मृत्वा शुभध्यानाद्देवलोकं गतः, ततश्च्युत्वा स सुप्रतिष्ठिते पुरे वसुनामा विद्याधरोऽजनि. स वसुनामा विद्याधर एकस्मिन् दिने पुंडरीकविजये पुंडरीकिण्यां नगर्यां त्रिभुवनानंदचक्रिणोऽनंगसुंदरीं कन्यां जहार. ततश्चक्रिणा प्रेषितैर्विद्याधरैः सार्धं स वसुविद्याधरो यावता युद्धं करोति, तावतानंगसुंदरी विमानादवरुह्यैकस्मिन् वनिकुंजे प्रविष्टा. ते चक्रव-

For Private And Personal Use Only

र्तिसेवका विद्याधराश्च वसुविद्याधरमेकाकिनं वीक्ष्य पश्चाद्वलित्वा स्वस्थानं गताः. तदा स वसुधरविद्याधरोऽनंगसुंदरीमलब्ध्वा वैराग्याद् व्रतमाददे. चिरकालं तीव्रं तपस्तप्त्वा प्राणांते चानशनं कृत्वा निदानमकरोद्यथास्य तपसः प्रभावतो भवांतरे एषानंगसुंदरी मम पत्नी भूयादिति निदानं कृत्वा स स्वर्गं ययौ, ततश्च्युत्वा सोऽयं लक्ष्मणोऽजायत, अनंगसुंदर्यपि साध्वीसमीपे दीक्षां लात्वैकावलीश्रेणितपोधनतपःप्रतरांबिलवर्धमानप्रभृत्यनेकतपांसि तप्त्वांते विहितानशना पर्वतगुहासु सुप्ताजगरेण जग्रसे, तथापि समाधिना मृत्वेशाने देवलोके सा देव्यभूत्, ततश्च्युत्वेयं विशल्या लक्ष्मणमहिष्यभूत्. इति लक्ष्मणविशल्यापट्टराज्योः पूर्वभवकथा. ॥

योऽभूद्गुणवतीभ्राता । नाम्ना गुणधरः स तु ॥ भवं भ्रांत्वाभवद्राज—पुत्रः कुंडलमंडितः ॥१॥ श्रावकत्वं पालयित्वा । चिराय स विपद्य च ॥ सीतासहोदरो ह्येष । भामंडलनरेश्वरः ॥ १ ॥ इति भामंडलपूर्वभवसंबंधः ॥ इतोऽभूतां च काकंद्यां । वामदेवद्विजन्मनः ॥ श्यामलाकुक्षिजौ पुत्रौ । वसुनंदसुनंदनौ ॥ १ ॥ एकदा तयोर्गेहे मासोपवासी कश्चिन्मुनिः समाययौ, ताभ्यां वसुनंदसुनंदाभ्यां च प्रतिलाभितः, मृत्वा तद्दानधर्मेणोत्तरकुरुषु तौ द्वावपि भ्रातरौ युग्मिनौ जातौ, ततोऽपि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मृत्वायुःपर्यंते सौधर्मे देवौ जातौ. ततोऽपि च्युत्वा काकंद्यां नगर्यां रतिवर्धननृपतेः सुदर्शनापट्टरा-ज्ञीकुक्ष्युद्भवौ प्रियंकरशुभंकरनामानौ पुत्रौ जातौ, तत्र पित्रार्पितं राज्यं भुक्त्वा दीक्षां लात्वा बहूनि तपांसि च तप्त्वायुःपर्यंतेऽनशनेन मृत्वा ग्रैवेयके देवौ जातौ. ततश्च्युत्वा युवां लवणांकुशौ रामपुत्रौ जातौ. इति लवांकुशयोः पूर्वभवकथा. ॥

सुदर्शनानयोः पूर्व— भवमाता भवं चिरं ॥ भ्रांत्वात्रदेष सिद्धार्थो—ऽध्यापको रामपुत्रयोः॥ ॥ १ ॥ इति सिद्धार्थपूर्वभवकथा. ॥ एवं जयभूषणमुनिवचनानि श्रुत्वा बहवो लोकाः संवेगमापन्नाः, तदैव कृतांतवदनो रामसेनानी प्राव्रजत्. अथ श्रीराम उत्थाय सीतायाः समीपं गत्वा चेतस्येवं चिंतयामास, असौ शिरीषमृद्वंगी । राजपुत्री मम प्रिया ॥ सीता शीतातपक्लेशं । कथं नाम सहिष्यति ॥ १ ॥ इमं संयमभारं च । सर्वभारातिशायिनं ॥ उद्वक्ष्यति कथं नाम । हृदयेनापि दुर्वहं ॥ २ ॥ यद्वा सतीव्रतं यस्या । न भंक्तुं रावणोऽप्यलं ॥ सा निर्व्यूढप्रतिज्ञैव । भाविनी संयमेऽपि च ॥ ३ ॥ एवं विचार्य श्रीरामचंद्रः सीतां ववंदे, तथान्येऽपि राजानो लक्ष्मणप्रमुखाः सीतार्यां वंदित्वा पुनः पुनः प्रशशंसुः, सर्वेऽपि सीतां नत्वायोध्यां ययुः, कृतांतवदनो मुनिरप्युग्रं तप-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तेपे. एवंविधं चोग्रं तपस्तप्त्वा स कृतांतवदनो मृत्वा ब्रह्मलोके ययौ. सीतापि षष्टिसहस्रवर्षाणि विविधं तपस्तप्त्वा प्रांते चैकं मासं यावदनशनं कृत्वा मृत्वा च द्वाविंशतिसागरायुःस्थित्याच्युतेंद्रत्वेनोत्पन्ना. इति सीतागतिः. ॥

इतश्च वैताढ्ये शैले कांचनपुरे नगरे कनकरथो राजा विद्याधरेंद्रोऽस्ति, तस्यैका मंदाकिनी, द्वितीया च चंद्रमुखीति द्वे कन्ये स्तः. पित्रा तयोः स्वयंवरः कृतः. तस्मिन् समये स्वयंवरेऽनेके राजानो रामलक्ष्मणादयः समाहूताः, रामपुत्रौ लवांकुशावप्याकारितौ, लक्ष्मणपुत्रा अप्याकारिताः, तेन श्रीधरादिकं सार्धं द्विशतं लक्ष्मणपुत्राणां समागतं, सर्वे राजान उच्चेषु मंचेषु स्थिताः शुशुभिरे, तावता सुखासनासीने ते द्वे अपि कुमारिके समागते, तस्मिन् स्वयंवरे मंदाकिन्या लवो वव्रे, चंद्रमुख्या च कुशो वव्रे, द्वाभ्यां कन्याभ्यां लवांकुशौ वृतौ दृष्ट्वा लक्ष्मणस्य सार्धद्विशतपुत्राणां मत्सरो जातः, तेन ते लवांकुशौ हंतुं दधाविरे, तावता तयोः प्रधानेनोक्तं भो कुमाराः! यदा रामलक्ष्मणयोर्न भेदस्तदा यूयं किमर्थं युध्यध्वे? अतो युवयोर्युद्धं न युक्तं. एवमुक्ताः सर्वेऽपि ते रामलक्ष्मणपुत्रा युद्धान्निवृत्तास्ते लक्ष्मणपुत्राश्च लज्जिताः स्वं निनिंदुः. ते सर्वेऽपि संवेगमापन्नाः पि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वानुज्ञाता महाबलमुनिपादांते व्रतं जगृहुः. अथ तौ लवणांकुशौ कृतोद्वाहौ शीरिशार्ङ्गिभ्यां सहायोध्यां पुरीमीयतुः.

इतश्चैकस्मिन् दिने हर्म्यमूर्ध्नि स्थितो भामंडलश्चिंतयति, मया श्रेणिद्वयस्य राज्यं कृतं, तथा मयानेके विद्याधरराजानो वशीकृताः, अथ दीक्षादानेनात्मानं वशीकरोमि तदा वरं, किमन्यैर्दमितैः? यतः—खरकरहतुरयवसभा । मत्तगयिंदावि नाम दम्मंति ॥ इक्को नवरि न दम्मइ । निरंकुसो अप्पणो अप्पा ॥ १ ॥ वर मे अप्पा दंतो । संयमेण तवेण य ॥ माहं परेहिं दम्मंतो । बंधणेण वहेहि अ ॥ २ ॥ अप्पा चेव दमेयव्वो । अप्पा हु खलु कुद्दमो ॥ अप्पा दंतो सुही होइ । अस्सिं लोए परत्र य ॥ ३ ॥ एवं भावनां भावयतो भामंमलस्य मूर्ध्नि आकाशतो विद्युत्पपात, तत्पातेन मृत्वा स देवकुरुक्षेत्रे युगलत्वेनोत्पन्नः. ॥ इति भामंडलगतिः ॥

इतश्च हनूमांश्चैत्रपूर्णमास्यां चैत्यवंदनहेतवे मेरुपर्वते गतः, तत्र देवान् वंदित्वा प्रत्यावृत्तो मार्गे सूर्यमस्तंगतमवेक्ष्य चिंतयति धिगशाश्वतं सुखं, यतः—धीधीधी संसारो । देवो मरिऊण जं तिरी होइ ॥ मरिऊण रायराणा । परिपच्चइ नरयजालाए ॥ १ ॥ सा नत्थि कला तं नत्थि । जंस-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हं तं किंपि नत्थि विन्नाणं ॥ जेण धरिज्जइ काया । खज्जंति कालसप्पेण ॥ २ ॥ जस्सत्थि मच्चुणा सक्खं । जस्स अत्थि पलायणं ॥ जो जाणइ न मरिस्सामि । सो हु कंखे सुहे सिआ ॥ ३ ॥ इत्यादि चिंतयन् वैराग्यमापन्नो हनूमान् गृहे आगत्य स्वसुते च राज्यं न्यस्य धर्मरत्नाचार्यसमीपे स्वयं प्रव्रज्यामुपाददे, तेन सार्धं सप्तशतानि राज्ञां प्राव्रजन्. हनूमत्पत्न्यः सुज्येष्ठाद्या राज्य आर्यालक्ष्मीवतीपार्श्वे दीक्षां लात्वा तपस्तेपिरे. हनूमान्मुनिरपि तीव्रं तपस्तप्त्वा ध्यानानलेन क्रमात्कर्माणि निर्दह्य शैलेशीं च प्राप्याव्ययं पदं जगाम. ॥ इति हनूमद्वृत्तिः ॥

ततः श्रीरामचंद्रो हनूमंतं प्रव्रजितं मोक्षे गतं च श्रुत्वा चिंतयति धन्य एष हनूमान् यो दीक्षां लात्वा मोक्षं गतः, अहो! ईदृशा भोगा ईदृशं च राज्यं तेन कथं त्यक्तं? ईदृशानि सौख्यानि तेन कथं त्यक्तानि? एवं संयमवैषम्यं स यावता चिंतयति तावत्सौधर्मेंद्रेण ज्ञानं प्रयुक्तं, रामश्च संयमवैषम्यं चिंत्यमानो दृष्टः. तदेंद्रेण स्वसभामध्ये सर्वदेवसमक्षं प्रोक्तं—रामश्चरमदेहोऽपि । यद्धर्मं हसति स्वयं ॥ सौख्यं विषयसंभूतं । प्रत्युतैष प्रशंसति ॥ १ ॥ अथवानयो रामलक्ष्मणयोः कोऽपि स्नेहोऽत्यंतं दुस्त्यजः, ईदृशः स्नेहः कस्यापि न भवति, अतः संसारोऽप्ययं दुस्त्यजः. तद्वचनं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रुत्वा द्वौ देवौ कौतुकात्तत्स्नेहपरीक्षाकरणार्थं तत्रायोध्यायां लक्ष्मणस्य निकेतने समुपेयतुः. ततस्तौ देवौ मायया लक्ष्मणस्य राममरणलक्षणं करुणस्वरं सर्वांतःपुर्याक्रंदं दर्शयामासतुः, यथा—हे पद्म पद्मनयन । बंधुपद्मदिवाकर ॥ अकांडमृत्युः कोऽयं ते । विश्वस्यापि भयंकरः ॥ १ ॥ एवं रुदतीर्वक्षांस्या—घ्नानाना मुक्तकुंतलाः ॥ अंतःपुरवधूः प्रेक्ष्य । विषण्णो लक्ष्मणोऽवदत् ॥ २ ॥ मामासौ किं मृतो भ्राता । ददे तस्यापि जीवितं ॥ पिशुनेन कृतांतेन । किं कृतं छलघातिना ॥ ३ ॥ एवं च भाषमाणस्य । वचसा सह जीवितं ॥ सौमित्रेर्निर्ययौ कर्म—विपाको दुरतिक्रमः ॥ ४ ॥ स्वर्णस्तंभमवष्टभ्य । स्थितः सिंहासनेऽपि हि ॥ सोऽथ प्रसारिताक्षोऽस्था—ल्लेप्यमूर्तिरिवाक्रियः ॥ ॥ ५ ॥ लक्ष्मणं मृतं दृष्ट्वा तौ सुरौ विषण्णौ मिथो जजल्पतुरहो आवाभ्यां किमकार्यं कृतं? विश्वाधारो विश्ववात्सल्यो महापुरुषो हतः, इति तौ सुरौ स्वं निंदंतौ स्वं कल्पं जग्मतुः. अथ लक्ष्मणं मृतं वीक्ष्य सर्वा लक्ष्मणपत्न्यः सपरिवारा विलुलत्कुंतलाश्चक्रंदुः. तदाक्रंदमाकर्ण्य श्रीरामस्तत्र समाययौ, उवाच च भो युष्माभिरविचार्यामंगलं किमारब्धं? एषोऽहं जीवंस्तिष्ठामि, एष ममानुजोऽपि च जीवति, को वक्त्ययं मृतः? य एनं मृतं वदिष्यति तमनेन खड्गेन हनिष्यामि. एवमु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्त्वा ताः सर्वा अंतःपुर्यस्तेन मौनं कारिताः. पुना रामोऽवोचत् हे बांधव लक्ष्मण! तव किं बाधते? त्वं किं मौनमाधाय स्थितोऽसि? इत्युक्त्वा रामो वैद्यान् ज्योतिषिकांश्चाजूहवत्, मंत्रतंत्राणां च प्रतिक्रियां कारयामास. परमनव्ये गुरुवचनवन्न कोऽप्युपचारो लगति. एवं मंत्रतंत्राणामपि वैफल्ये श्रीरामचंद्रो मूर्छा प्राप. कथंचिल्लब्धसंज्ञः श्रीराम उच्चैःस्वरं विललाप. अथ ते बिभीषणशत्रुघ्नसुग्रीवाद्याः श्रीरामसेवका हा हताः स्म इति भाषिणो विमुक्तकंठं रुरुदुः. कौशल्याद्या मातरो विशल्याद्याश्च पत्न्यो भूयो भूयो मूर्छा गत्वा करुणस्वरं चक्रंदुः. तदा प्रतिग्रामं प्रतिगृहं प्रत्यहं विना शोकमन्यत्किमपि नाभवत. तस्मिन् समये सा नगरी शोकस्य राजधानीव दुःखस्य भांडागार इवाभवत्.

अथ रामपुत्रौ लवांकुशौ कनीयस्तातमृत्युना संप्राप्तवैराग्यौ भवाद्भीतौ च श्रीराममूचतुः, हे तात त्वं पश्य? लक्ष्मणो भवल्लघुभ्राताऽकस्मान्मरणं प्राप्तस्तर्हि का जीवितव्याशान्येषामस्मादृशां प्राणिनां? अतोऽस्माकमनुमन्यस्व यथा दीक्षांगीक्रियते. कनीयस्तातरहितानामस्माकं गृहे स्थातुं न युक्तं. इत्युक्त्वा तौ द्वावपि श्रीरामं नत्वामृतघोषमुनिपादांते दीक्षां जगृहतुः, क्रमाच्च दीक्षां परिपा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ब्य शिवमीयतुः ॥ इति लवांकुशयोर्गतिः ॥

श्रीरामो भ्रातृविपत्त्या पुत्रवियोगाच्च भूयो भूयो मुमूर्छ. लब्धसंज्ञश्च लक्ष्मणंप्रत्युवाच मया तव काचिदप्यवमानता न कृतास्ति, तर्हि त्वमीदृशं मौनमालंब्य कथं स्थितोऽसि? एवंभाषिणं श्रीरामंप्रति बिभीषणाद्याः सेवका गद्गदस्वरं जगदुः, यथा—धीरेष्वपि हि धीरस्त्वं । वीरो वीरेष्वपि प्रभो ॥ लज्जाकरमिदं तस्मा—दधैर्यं मुंच संप्रति ॥ १ ॥ लोकप्रसिद्धमधुना । सौमित्रेरौर्ध्वदेहिकं ॥ अंगसंस्कारपूर्वं हि । कर्तव्यं समयोचितं ॥ २ ॥ एवं श्रुत्वा श्रीरामः कुपितस्तान्प्रत्येवं बभाषे, भो खलाः! किं मे भ्राता मृतोऽस्ति? मे भ्राता तु जीवन्नस्ति, परं ममोपरि कुपितत्वान्न वक्ति, इत्युक्त्वा रामो लक्ष्मणं बभाषे, हे बांधव लक्ष्मण! त्वं किं मां खेदयसि? एकवारं ब्रूहि? यथा दुर्जनानां मुखबंधो भवति, तथापि लक्ष्मणो न बभाषे. ततः श्रीरामो लक्ष्मणं स्कंधे समारोप्य वनं ययौ, तत्र कुत्रचिद्वृक्षतले लक्ष्मणं निवेश्य तं निर्मलजलेनास्नापयत, चंदनैर्विलिलेप च. ततो दिव्यभोजनैर्भाजनं पूरयित्वा स्वहस्तेन तस्य पुरतो मुमोच. कदाचित्तमुत्संगे करोति, कदाचिच्छय्यायां शाययति, कदाचित्तस्यास्ये भोज्यं प्रक्षिपति, कदाचिज्जलं पाययति, कदाचित्तच्छिरसि छत्रं बि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्त्तिं, कदाचिच्चामरौ वीजयति, कदाचित्तस्याग्रे नृत्यं करोति गायति च, कदाचिच्च तं स्कंधे समा-
रोप्य परिभ्रमति. इत्यादिचेष्टां कुर्वाणस्य रामस्य षण्मासा व्यतिक्रांताः. एवंविधं श्रीरामं दृष्ट्वा इंद्र-
जित्सुंदयोः सूनवोऽन्येऽपि च द्विषत्खेचरा रामं जिघांसवोऽन्येयुः, तथायोध्यां च रुरुधुः सुप्तं सिंहं
व्याघ्रा इव. रामोऽपि लक्ष्मणमासने निवेश्य वज्रावर्तधनुरास्फाल्य विद्याधरान् हंतुं दधावे. तदा
चासनकंपेन देवैः सार्धं माहेंद्रदेवलोकाज्जटायुर्देव आययौ, तेनागत्य ते रामविद्विषो विद्याधरा
भृशं तर्जिताः स्वस्थानं गताः, भीता लज्जिताश्च ते विद्याधराः संवेगमापन्ना दीक्षां जगृहुः. ततः स
जटायुरमरः श्रीरामप्रतिबोधार्थं पुरुषरूपं कृत्वा शुष्कं तरुं सिषेच, तथा दृषदि पद्मिनीं रोपयामास,
तथा वालुकास्तैलार्थं पर्यपीलयत. तद् दृष्ट्वा रामेणोक्तं भो मूर्ख! शुष्कस्तरुः कापि पुष्पति? ते-
नोक्तं यदि तव भ्राता जीविष्यति तदा शुष्कतरुरपि पुष्पिष्यति. इत्यादि सर्वत्रापि ज्ञेयं.

पुनस्तेन पुरुषेणोक्तं यदि त्वमेवं वेत्सि यद् दृषदि पद्मिनी न भवति. वालुकायां पीलितायां
तैलं न भवति, नीरसो वृक्षश्च सिच्यमानोऽपि सरसो न भवति, तथा मृतकोऽपि पुमान् सज्जो न
भवतीति किं त्वं न वेत्सि? यतस्त्वमतिनिपुणोऽपि स्वस्कंधे मृतकं वहसि. रामेणोक्तं भो त्वममं-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गलं नाषसे, मद्दृष्टितो दूरे याहि? अथ कृतांतवदनजीवो देवस्तद्बोधार्थं पुरुषरूपं कृत्वैकां मृतां महिलां स्कंधे निधाय रामाग्रे समाययौ, राम उवाच भो पुरुष! त्वं स्त्रीशवं स्कंधे कथं वहसि? तेनोक्तं नो महापुरुष! स्वयं स्वस्कंधस्थितं मृतकं न वेत्सि, परं मम स्कंधस्थितां मृतां नार्यां वेत्सि, एवं प्रतिबोधितो रामः षण्मासपर्यंते सावधानोऽनवत, प्रकृतिं चापन्नः.

ततः श्रीरामो राजलोकपरिवृतो लक्ष्मणशरीरस्य चंदनादिनिरग्निसंस्कारं चकार. ततस्तावुनावपि देवौ जटायुकृतांतवदनौ निजं स्थानं जग्मतुः. अथ श्रीरामो दीक्षां गृहीतुकामः शत्रुघ्नंप्रति राज्यादानायादिशत, शत्रुघ्नो बनाषे हे बांधव! यदि त्वं दीक्षां प्रतिपत्से तदाहमपि त्वया सह दीक्षामादास्ये, अथाहं राज्येन किं करोमि? यथा मर्कटो नालिकेरेण, वानरी मुक्तावल्या, विधवास्त्री कंकणेन, वणिक्खड्गेन, बधिरो वीणया, दरिद्रो लीलया, दिगंबरो दुकूलेन, मुनिराजरणेन, मूर्खः पुस्तकेन, पापी सुकृतेन, अंधोंजनेन, षंढो दयितया, दुर्जन उपकारेण, शालूरः कमलेन, ग्रामीणः पंडितगोष्ठ्या, रजकः पणकग्रामेण, मक्षिका यक्षकर्दमेन, कापुरुषः संग्रामेण, पणांगना निर्धनेन पतिना, तथाहं राज्येन किं करोमि? ततः श्रीरामो लवपुत्रायानंगदेवाय राज्यं ददौ, स्वयं च मो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कार्थसाधनाय मुनिसुव्रतस्वामिवंशे श्रीसुव्रतमहामुनेः समीपेऽगमत्, तत्र शत्रुघ्नसुग्रीवबिभीषणप्रभृतिभिरन्यैश्च राजभिः परिवृतः श्रीरामचंद्रो देशनाश्रवणार्थं वंदित्वोपविष्टः, मुनिनापि देशना दत्ता. देशनांते षोडशसहस्रैर्महीनाथैः सार्धं श्रीरामो दीक्षां ललौ, तथा तेन सार्धं सप्तत्रिंशत्सहस्राणि वरयोषितः प्राव्रजन्. त्रिपंचाशत्सहस्राणि राजानः प्रव्रज्यां जगृहुः, षडब्दीं गुरुपादांते । विविधाभिग्रहोद्यतः ॥ तेपे तपांसि रामर्षिः । पूर्वांगश्रुतभावितः ॥ १ ॥ अथ रामः प्रपन्नैक—विहारो गुर्वनुज्ञया ॥ एकाकी निर्ययौ निर्भी—रण्यां गिरिकंदरे ॥ २ ॥ अथ यस्मिन् दिने गुर्वनुज्ञया स एकाकित्वविहारं प्रपन्नवांस्तस्यामेव रात्रौ ध्यानजुषः श्रीराममहामुनेरवधिज्ञानं समुत्पन्नं. तेन चावधिज्ञानेन । विश्वं सोऽथ करस्थवत ॥ ददर्श द्रुतमज्ञासी—न्नरके च निजानुजं ॥ १ ॥ तदा श्रीरामभट्टारकः स्वचेतसि चिंतयामास, यथाहं पूर्वजन्मनि धनदत्ताभिधोऽभूवं, एष च लक्ष्मणः पूर्वभवे वसुदत्ताभिधानो ममानुजोऽभूत्, तस्मिंश्च जन्मन्यकृतपुण्योऽसौ मरणं प्राप, भवं च भ्रांत्वास्मिन् भवे स वसुदत्तजीवोऽत्रापि ममानुजो लक्ष्मणनामाभूत्, तत्र कौमारत्वे शतवर्षाणि मुधा जग्मुर्धर्माभावात्, शतत्रयवर्षाणि मंडलित्वे जग्मुः, चत्वारि शतवर्षाणि दिग्विजये मुधा जग्मुः, सार्धै-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कादशसहस्राष्टषष्टिश्च राज्ये मुधा जग्मुः, सर्वेऽपि द्वादशसहस्रा लक्ष्मणस्यायुः, अकृतधर्मत्वात्सर्वायुर्मुधागमत्, तेन हेतुना स चतुर्थे नरके गतः. इति लक्ष्मणगतिः.

अथ राममहामुनिश्चिंतयति, अहो ईदृगेव कर्मणां विपाको भवति. ततोऽसौ कर्मविछेदकृतेऽधिकोद्यमपरोऽभवत. निर्ममः कर्मोन्मूलनतत्परः समाधिनिष्टश्च श्रीराममुनिरेकस्मिन् दिने षष्टोपवासांते पारणाकृते युगमात्रदत्तदृष्टिः संचरन् स्यंदनस्थले नगरे प्राविशत. तं महामुनिमागछंतं दृष्ट्वा तद्रूपमोहितो लोको मनसि चिंतयत्यहो अंबरादवतीर्णोऽयं किं चंद्रः? न हि. स तु सकलंको वर्तते, अयं तु निष्कलंको दृश्यते, तर्हि किं सूर्यः? न हि स तु तीक्ष्णांशुर्वर्तते. तर्हि किमनंगः? न हि. स त्वनंगोऽयं त्वंगवानित्यादिविकल्पैर्वीक्ष्यमाणं श्रीराममहामुनिं प्रचुरसंमदाः पौराः संमुखिनः समाययुः, तस्य मुनेर्भिक्षादानाय नार्यः स्वस्वगृहद्वारे विचित्रभोज्यपूर्णानि भाजनानि पुरो दधुः. तस्मिन् समये तत्र नगरे श्रीबलभद्रमुनिसमागमनोद्भवो कोलाहलयुतो महोत्सवो बभूव. तेन कोलाहलेन गजवरा आलानस्तंभानुन्मूल्योन्मत्ता इव नगरे भृशं बभ्रमुः, हयाश्चोत्कर्णा बभूवुः, तेन श्रीराममहामुनिः पौरलोकढौकितमाहारमशुद्धत्वादनेषणीयत्वाच्च नाग्रहीत. ततः स राम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुनिः प्रतिनंदिराजवेश्मन्यगात्, तत्र स शुद्धमाहारपाने श्रलन्नत, तत्र च पंच दिव्यानि जाता- नि. ततो नगवान् रामचंद्रोऽप्यरण्यं ययौ. पुनः श्रीराममुनिना चिंतितं मा नूद्भूयो नगरे क्षोभ इ- ति विचार्यात्रैवारण्ये यदा जिक्षा लभ्यते तदानीं मया पारणदिने पारणं कार्यमित्यजिग्रहोऽग्रहीत्. इत्यजिग्रहं गृहीत्वा श्रीरामो विविधं तपस्तप्यमानः समाधिमापन्नः प्रतिमाधरो वनं विचचार.

अथैकस्मिन् दिने स प्रतिनंदी नरेश्वरो विपरीताश्वेनापह्रियमाणस्तस्मिन् वने समागतो यत्र वने राममहामुनिर्वर्तते. ततः प्रतिनंदिनरेश्वरानुपदं राज्ञः सैन्यं समागतं. सैनिकैश्च तत्र शिबिरं न्यस्तं, तत्र शिबिरे च स प्रतिनंदी समागतः, तत्र राज्ञः स्नानं कारितं, सपरिछदश्च स प्रतिनंदी जोजितः, जोजनानंतरं पर्यंकोपरि स्थितो गांधर्वैर्गीयमानयशाः सुखमनुनवन्नास्ते. इतश्च श्रीरामम- हामुनिर्मासक्षपणपारणे पारणेछया यत्र स प्रतिनंदी राजास्ति तत्राजगाम. स प्रतिनंदी राट् राम- महामुनिं दृष्ट्वा रोमांचितशरीरो दानभूषणपंचकेन सहितः प्रासुकैषणीयाहारपानादिजिः प्रत्यलाभ- यत. तत्रापि तथैव पंच दिव्यानि देवैः कृतानि. रामर्षिर्जोजनानंतरं तस्य राज्ञोऽग्रे देशनां चक्रे. सोऽपि राजा मुनेर्देशनां श्रुत्वा सम्यग्द्वादशव्रतधारको बनूव. ततः प्रभृति श्रीरामस्तत्रैव वने देव-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देवीभिर्गीयमानयशास्तस्थौ. कदाचिन्मासांते कदाचित्पक्षांते एवं द्वित्रिचतुर्मासपर्यंते रामर्षिः पारणकं चक्रे. कदाचित्पर्यंकस्थः, कदाचित्प्रलंबभुजः, कदाचिदुत्कटिकासनः, कदाचिदूर्ध्वबाहुः, कदाचित्पादांगुष्टस्थः, कदाचित्पार्ष्णिस्थश्चेति नानासनो ध्यानी मौनी च स दुस्तपं तपस्तेपे. एकस्मिन् दिने स श्रीराममहामुनिः पृथिव्यां विहरन् कोटिशिलां ययौ, या शिला लक्ष्मणेन पूर्वं विद्याधरसमक्षं भुजाभ्यामुध्धृता, श्रीराममहामुनिस्तां शिलामध्यास्य क्षपकश्रेणिमाश्रितो निशायां प्रतिमाधरः शुक्लध्यानांतरं भेजे, तदावधिज्ञानेन ज्ञात्वा सीतेंद्रश्चिंतयत्यहं श्रीराममहामुनिमनुकूलैरुपसर्गैः क्षपकश्रेणिवर्तिनमप्युपद्रवं करोमि, यथायं महामुनिर्मम पार्श्वे मित्रत्वेन भवेदिति संचिंत्य सीतेंद्रः सीतारूपं विधाय विद्याधरकुमारिकापरिवृता श्रीराममुनिसमीपमाययौ, तत्रागत्य प्रथमं वसंतर्तुविभूषितं महोद्यानं विचक्रे, वसंततुवर्णनं यथा—चूतचंपककंकेल्लि—पाटलाबकुलादयः ॥ दधुः सद्योऽपि पुष्पाणि । नव्यास्त्राणि मनोभुवः ॥ १ ॥ चुकूजकोकिलकुलं । ववौ च मलयानिलः ॥ रणंतो भ्रमरा भ्रेमुः । कुसुमामोदमोदिनः ॥ २ ॥ सीतारूपं च सीतेंद्रो । विकृत्य स्त्रीजनानपि ॥ ऊचे प्रिय प्रिया तेऽस्मि । सीतेह समुपस्थिता ॥ ३ ॥ रक्तं त्यक्त्वा तदानीं त्वा—महं पंडितमा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निनी ॥ प्राव्रजं नाथ पश्चाच्च । पश्चात्तापो ममात्यभूत ॥ ५ ॥

तथा हे स्वामिन्नेताः सानुरागा विद्याधर्यस्तव पाणिग्रहणं कर्तुकामा विज्ञपयंति यथा स्वामिन्नस्माकं पाणिग्रहणं कुरु? अहमपि च तवादेशात्तपस्यां त्यजामि. एवं यावत्सीता प्रोचे तावत्ता विद्याधर्यः स्मरोज्जीवनभेषजमेवंविधं विविधं संगीतं चक्रुः, परं श्रीराममुनिस्तैः सीतेंद्रवचनैस्तेन च संगीतकेन वसंतेन च ध्यानान्न चलितः, तथा तस्य महामुनेर्मनः संयमान्न चचाल. अथ श्रीरामहामुनेः केवलज्ञानं समुत्पन्नं, यथा—माघस्य शुक्लद्वादश्यां । तदा यामेंतिमे निशः ॥ उत्पद्यत च रामर्षेः । केवलज्ञानमुज्ज्वलं ॥ १ ॥ रामस्य केवलज्ञान—महिमानं सभक्तिकः ॥ सीतेंद्रो नाकिनोऽन्ये च । विदधुर्विधिपूर्वकं ॥ २ ॥ दिव्यस्वर्णांबुजासीनो । दिव्यचामरराजितः ॥ दिव्यातपत्रवान् रामो । विदधे धर्मदेशनां ॥ ३ ॥ यथा—देहे ऽन्ये कुटुंबे च । सर्वसंसारिणां रतिः ॥ जिने जिनमते संघे । पुनर्धर्माधिकारिणां ॥ १ ॥ तवसंजमेण मुक्खो । दाणेण य हुंति उत्तमा भोगा ॥ देवच्चणेण रज्जं । अणसणमरणेण इदत्तं ॥ २ ॥ संबुज्झह किं न बुज्झइ । संबोही खलु पेच्च दुल्लहा भणिआ ॥ जंति दिणाणि अ राइओ । नो सुलहं पुणरवि जीविअं ॥ ३ ॥ इत्या·

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिदेशनां श्रीराममहामुनिमुखात् श्रुत्वा सीतेंद्रः क्षामयित्वा शंबूकलक्ष्मणरावणगतिं पृष्टवान्. ततः श्रीराममहामुनिरभ्यधात श्रूयतां? नो सीतेंद्र! अधुना चतुर्थे नरके शंबूको दशाननो लक्ष्मणश्चेति, यतः कर्माधीना हि देहिनां गतयः, तत्र नरके नरकायुश्चानुभूय तौ दशाननलक्ष्मणौ प्राग्विदेहे विजयवत्यां नगर्यां सुनंदराट्रोहिणीपुत्रौ जिनदाससुदर्शननामानौ भविष्यतः, तावुभावपि श्रावकावर्हद्धर्मं च पालयिष्यतः, ततो विपद्य तौ द्वावपि सौधर्मे त्रिदशौ भविष्यतः, ततस्तौ द्वावपि मृत्वा विजयपुर्यां श्रावकौ भाविनौ, ततो मृत्वा हरिवर्षक्षेत्रे पुरुषौ भविष्यतः, ततस्तौ द्वावपि मृत्वा देवलोकं गमिष्यतः, ततश्च्युत्वा विजयपुर्यां जयकांतजयप्रभनामानौ राजकुमारौ भविष्यतः. तत्र जिनोक्तं संयमं पालयित्वा मृत्वा च लांतके कल्पे तावुभावपि देवौ भविष्यतः, तदा त्वमच्युतदेवलोकाच्च्युत्वात्रैव भारते सर्वरत्नमतिनामा चक्रवर्ती भविष्यसि. अथ तौ लांतकाच्च्युत्वा इंद्रायुधमेघरथाभिधानौ तव पुत्रौ भविष्यतः, ततस्त्वं चक्रवर्ती राज्यं परिपाल्य संयमं लात्वा तीव्रं तपस्तप्त्वा वैजयंते विमाने व्रजिष्यसि, इंद्रायुधः स तु जीवो। रावणस्य भवत्रयं ॥ शुभं भ्रांत्वा तीर्थकर—गोत्रकर्मार्जयिष्यति ॥ १ ॥ ततो रावणजीवः स। तीर्थनाथो भविष्यति ॥ वैजयंताच्च्यु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्तस्य । भावी गणधरो भवान् ॥ २ ॥

ततो द्वावपि सीतारावणजीवौ मोक्षं यास्यतः. लक्ष्मणस्य जीवो भवत्सूनुर्मेघरथो प्रव्रजिष्यति, प्रव्रज्यां च पालयित्वा देवो भविष्यति, ततश्च्युत्वा लक्ष्मणजीवः पुष्करद्वीपे प्राग्विदेहे रत्नचिंतायां नगर्यां जयनामा चक्रवर्ती भविष्यति, तत्र चक्रवर्तिश्रियं भुक्त्वा परिव्रज्यां च लात्वा क्रमेण तीर्थनाथो भूत्वा निर्वाणं प्रयास्यति. श्रीराममहामुनिमुखात्सीतेंद्रो रावणलक्ष्मणचरित्रं श्रुत्वा श्रीराममुनिं च प्रणम्य प्राक्स्नेहवशतो यत्र लक्ष्मणोऽस्ति तत्र ययौ, तत्र शंबूकरावणौ सिंहादिरूपं विकृत्य लक्ष्मणेन सह संग्रामं कुर्वाणौ स ददर्श, तथा परमाधार्मिकाः क्रुद्धास्तानग्निकुंडेषु न्यधुः, ततस्ते त्रयो दह्यमाना गलितांगका उच्चै रटंतो दृष्टाः सीतेंद्रेण, चिंतितं चाहो कर्मणां विपाकः! इत्यादि तेषां बहुदुःखं प्रेक्ष्य परमाधार्मिकसुरेभ्यस्तेन प्रोक्तं किं रे यूयमेतान् महापुरुषान् दुःखं दद्ध्वे? तैरुक्तमथास्माभिर्दुःखं न दास्यते, तथापि क्षेत्रवेदनादिदुःखं परस्परकृतं च दुःखं पूर्वकर्मवशान्न यास्यति. ततः सीतेंद्रो रावणलक्ष्मणौ दृष्ट्वोवाच भो युवां किमर्थं युध्येथाः? अथ पूर्ववैरं विमुंचतं, युवाभ्यां पूर्वभवे तत्पापं कृतं येन पापेन नरके उत्पन्नौ, तदद्यापि पूर्ववैरं किं न मुंचथः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवमुक्त्वा तौ रावणलक्ष्मणौ युद्धान्निवार्य संतोषितौ. तथा रामकेवलिनाख्याता ताननयोरग्रेतनभवांस्तयोः प्रतिबोधार्थं सीतेंद्रोऽकथयत. तथा भो रावणलक्ष्मणौ! युवां प्राग्जन्मोपार्जितैः क्रूरकर्मभिर्नरकंप्रत्यर्पितौ, अथ युवयोर्दीर्घसंसारो नास्ति.

अथाहं यूयं त्रीनपीतो नरकात्सुरलोके नेष्यामि, युष्माभिः काचिदपि चिंता न विधेया, इत्युक्त्वा तेन त्रयोऽपि ते स्वेन पाणिनोद्दध्रिरे, किंतु ते त्रयोऽपि ध्रियमाणाः पारदवत्करतलाग्रतः कणशो भूत्वा पेतुः. त्रयोऽपि मिलितांगांस्तानुद्दध्रे, परं पुनस्तथैव पेतुः. एवं द्वित्रिवारान् यावत् सीतेंद्रो विषण्णः, तदा ते प्रोचुर्हे सीतेंद्र! त्वया मोचयतामुध्रियमाणानां चास्माकं महद्दुःखं जायते, यतः—कृतकर्मक्षयो नास्ति। कल्पकोटिशतैरपि ॥ अवश्यमेव भोक्तव्यं। कृतं कर्म शुभाशुभं ॥ १ ॥ पुनस्तैस्त्रिभिरुक्तं भो सीतेंद्र! त्वमस्मान् मुक्त्वा स्वस्थानं याहि, ततस्तांस्तत्रैव मुक्त्वा श्रीराममहामुनिं नत्वा नंदीश्वरे चाष्टाह्निकां कृत्वा सीतेंद्रो देवकुरुप्रदेशे भामंडलजीवं प्रतिबोध्य स्वयमच्युतदेवलोकं गतः. उत्पन्ने सति केवले स शरदां पंचाधिकां विंशतिं। मेदिन्यां भविकान् प्रबोध्य भगवान् श्रीरामभट्टारकः ॥ आयुश्च व्यतिलंघ्य पंचदश चाब्दानां सहस्रान् कृती। शैलेशीं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिपद्य शाश्वतसुखानंदं प्रपेदे पदं ॥ १ ॥ इति श्रीमत्तपागच्छे भट्टारकश्रीहीरविजयसूरिराज्ये आचार्यश्रीविजयसेनसूरियौवराज्ये पंडितश्रीदेवविजयगणिविरचिते गद्यबंधे श्रीरामचरित्रे श्रीरामनिर्वाणगमनो नाम दशमः सर्गः समाप्तः ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

लब्ध्वा यदीयचरणांबुजतारसारं । स्वादच्छटाधरितदिव्यसुधासमूहं ॥
संसारकाननतटे ह्यटतालिनेव । पीतो मया प्रवरबोधरसप्रवाहः ॥ १ ॥
वंदे मम गुरुं तं च । चारित्रविजयाह्वयं ॥ परोपकारिणां धुर्यं । चित्रं चारित्रमाश्रितं ॥ २ ॥ युग्मं.
चारित्रपूर्वा विजयाभिधाना । मुनीश्वराः सूरिवरस्य शिष्याः ।
आनंदपूर्वविजयाभिधस्य । जातास्तपागच्छसुनेतुरेते ॥ ३ ॥

---

आ ग्रंथ श्रीजामनगरनिवासी पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्यो छे.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीरामचरित्रं समाप्तं ॥

For Private And Personal Use Only